तत्त्वशब्दो भाववाचीत्युक्तः। स कथं जीवादिभिर्द्रव्यवचनैः सामानाधिकरण्यं प्रतिपद्यते ? अव्यतिरेकात्तद्भावाध्यारोपाच्च सामानाधिकरण्यं भवति। यथा 'उपयोग एवात्मा' इति। यद्येवं तत्तल्लिङ्गसङ्ख्यानुवृत्तिः प्राप्नोति ? [1]'विशेषणविशेष्यसम्बन्धे सत्यपि शब्दशक्तिव्यपेक्षया उपात्तलिङ्गसङ्ख्याव्यतिक्रमो न भवति।' अयं क्रम आदि-
५ सूत्रेऽपि योज्यः।

शंका—तत्त्व शब्द भाववाची है यह पहले कह आये हैं इस लिये उसका द्रव्यवाची जीवादि शब्दों के साथ समानाधिकरण कैसे हो सकता है ?

समाधान—एक तो भाव द्रव्य से अलग नहीं पाया जाता दूसरे भाव में द्रव्य का अध्यारोप कर लिया जाता है इस लिये समानाधिकरण बन जाता है। जैसे, 'उपयोग ही आत्मा है' इस वचन
१० में गुणवाची उपयोग शब्द के साथ द्रव्यवाची आत्मा शब्द का समानाधिकरण है उसी प्रकार प्रकृत में जानना चाहिये।

शंका—यदि ऐसा है तो विशेष्य का जो लिंग और संख्या है वही विशेषण को भी प्राप्त होते हैं ?

समाधान—व्याकरण का ऐसा नियम है कि 'विशेषण विशेष्य सम्बन्ध के रहते हुए भी शब्द
१५ शक्ति की अपेक्षा जिसने जो लिंग और संख्या प्राप्त कर ली है उसका उल्लंघन नहीं होता।' अतः यहाँ विशेष्य और विशेषण के लिंग और संख्या के जुदे जुदे रहने पर भी कोई दोष नहीं है। यह क्रम प्रथम सूत्र में भी लगा लेना चाहिये।

विशेषार्थ—इस सूत्र में सात तत्त्वों का निर्देश किया गया है। इसकी व्याख्या करते हुए मुख्यतया पाँच बातों पर प्रकाश डाला गया है। जो निम्न प्रकार हैं—
२० (१) जीवादि सात तत्त्वों का स्वरूप निर्देश।

(२) सूत्र में जीव, अजीव इस क्रम से सात तत्त्वों के निर्देश करने की सार्थकता।

(३) पुण्य और पाप को पृथक् तत्त्व नहीं मानने का कारण।

(४) भाववाची शब्दों का द्रव्यवाची शब्दों के साथ कैसे सामान्याधिकरण बनता है इसकी सिद्धि।
२५ (५) विशेषण और विशेष्य में समान लिंग और समान संख्या क्यों आवश्यक नहीं इसका निर्देश।

तीसरी बात का खुलासा करते हुए जो लिखा है उसका आशय यह है कि जीव की शुभाशुभ प्रवृत्ति के आधार से बँधनेवाले कर्मों में अनुभाग के अनुसार पुण्य पाप का विभाग होता है इस

(१)—'आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्त्तते उत्पत्तिप्रभृत्या विनाशान्न तल्लिङ्गं जहाति।' पा० १।२।५३।' अन्येऽपि वै गुणवचना नावश्यं द्रव्यस्य लिङ्गसंख्ये अनुवर्तन्ते।—पा० म० भा० ५।१।१।५९।

एवमेषामुद्दिष्टानां सम्यग्दर्शनादीनां जीवादीनां च संव्यवहारविशेषव्यभिचार-निवृत्त्यर्थमाह—

नामस्थापनाद्रव्यभावतस्तन्न्यासः ॥ ५ ॥

अतद्गुणे वस्तुनि सव्यवहारार्थं पुरुषकारान्नियुज्यमानं संज्ञाकर्म नाम। काष्ठ-पुस्तचित्रकर्माक्षनिक्षेपादिषु सोऽयमिति स्थाप्यमाना स्थापना। गुणैर्गुणान्वा द्रुतं गतं गुणै- ५ द्रोंष्यते गुणान्द्रोष्यतीति वा द्रव्यम्। वर्तमानतत्पर्यायोपलक्षितं द्रव्यं भावः। तद्यथा, नामजीव. स्थापनाजीवो द्रव्यजीवो भावजीव इति चतुर्धा जीवशब्दार्थो न्यस्यते। जीवन-गुणमनपेक्ष्य यस्य कस्यचिन्नाम क्रियमाणं नामजीव.। अक्षनिक्षेपादिषु जीव इति वा

लिये आस्रव और बन्ध में इनका अन्तर्भाव किया गया है। पाँचवीं बात का खुलासा करते हुए जो यह लिखा है कि विशेषण विशेष्य सम्बन्ध के रहते हुए भी शब्द शक्ति की अपेक्षा जिसने जो लिंग १० और संख्या प्राप्त कर ली है उसका उल्लंघन नहीं होता। सो इसका यह आशय है कि एक तो जिस शब्द का जो लिंग है वह नहीं बदलता। उदाहरणार्थ 'ज्ञानं आत्मा' इस प्रयोग में ज्ञान शब्द नपुंसक लिंग और आत्मा शब्द पुंल्लिंग रहते हुए भी इनमें बदल नहीं होता। इन दोनों शब्दों का विशेषण विशेष्य रूप से जब भी प्रयोग किया जायगा तब वह इसी प्रकार ही किया जायगा। दूसरे प्रयोग के समय जिस शब्द ने जो संख्या प्राप्त कर ली है उसमें भी बदल नहीं होता। जैसे 'साधोःकार्यं तपः १५ श्रुते' इस प्रयोग में विशेषण विशेष्य सम्बन्ध के रहते हुए भी 'कार्यम्' एक वचन है और 'तपःश्रुते' द्विवचन है। इसी प्रकार प्रकृत में जानना चाहिये। शेष कथन सुगम है।

इस प्रकार पहले जो सम्यग्दर्शन आदि और जीवादि पदार्थ कहे हैं उनका शब्द प्रयोग करते समय जो गड़बड़ी होती है उसको दूर करने के लिये आगे का सूत्र कहते हैं—

नाम, स्थापना, द्रव्य और भाव रूप से उनका अर्थात् सम्यग्दर्शन आदि और जीव २० आदि का न्यास अर्थात् निक्षेप होता है ॥ ५ ॥

संज्ञा के अनुसार गुण रहित वस्तु में व्यवहार के लिये अपनी इच्छा से की गई संज्ञाको नाम कहते हैं। काष्ठ कर्म, पुस्तकर्म, चित्रकर्म और अक्षनिक्षेप आदि में 'यह वह है' इस प्रकार स्थापित करने को स्थापना कहते हैं। जो गुणों के द्वारा प्राप्त हुआ था या गुणों को प्राप्त हुआ था अथवा जो गुणों के द्वारा प्राप्त किया जायगा या गुणों को प्राप्त होगा उसे द्रव्य कहते है। वर्तमान २५ पर्याय से युक्त द्रव्य को भाव कहते है। खुलासा इस प्रकार है—नाम जीव, स्थापना जीव, द्रव्य जीव, और भाव जीव इस प्रकार जीव पदार्थ का न्यास चार प्रकार से किया जाता है। जीवन गुण की अपेक्षा न करके जिस किसी का 'जीव' ऐसा नाम रखना नाम जीव है। अक्षनिक्षेप आदि में यह

(१) पुरुषाका--मु०।

मनुष्यजीव इति वा व्यवस्थाप्यमानः स्थापनाजीवः। द्रव्यजीवो द्विविधः आगम-
द्रव्यजीवो नोआगमद्रव्यजीवश्चेति। तत्र जीवप्राभृतज्ञायी मनुष्यजीवप्राभृतज्ञायी वा
अनुपयुक्त आत्मा आगमद्रव्यजीवः। नोआगमद्रव्यजीवस्त्रेधा व्यवतिष्ठते ज्ञायक-
शरीर-भावि-तद्व्यतिरिक्तभेदात्। तत्र ज्ञातुर्यच्छरीरं त्रिकालगोचरं तज् ज्ञायक-
५ शरीरम्। सामान्यापेक्षया नोआगमभाविजीवो नास्ति, जीवनसामान्यस्य सदाऽपि
विद्यमानत्वात्। विशेषापेक्षया त्वस्ति। गत्यन्तरे जीवो व्यवस्थितो मनुष्यभव[1]प्राप्तिं
प्रत्यभिमुखो मनुष्यभाविजीवः। तद्व्यतिरिक्तः कर्मनोकर्मविकल्पः। भावजीवो
द्विविधः आगमभावजीवो नोआगमभावजीवश्चेति। तत्र जीवप्राभृतविषयोपयोगा-
विष्टो मनुष्यजीवप्राभृतविषयोपयोगयुक्तो वा आत्मा आगमभावजीवः। जीवनपर्यायेण
१० मनुष्यजीवत्वपर्यायेण वा समाविष्ट आत्मा नोआगमभावजीवः। एवमितरेषामपि
पदार्थानां[2] नामादिनिक्षेपविधिर्नियोज्यः। स किमर्थः? अप्रकृतनिराकरणाय प्रकृतनि-

'जीव है' या 'मनुष्य जीव है' ऐसा स्थापित करना स्थापना जीव है। द्रव्य जीव के दो भेद हैं—
आगम द्रव्य जीव और नो आगम द्रव्य जीव। इनमें से जो जीव विषयक या मनुष्य जीव विषयक
शास्त्र को जानता है किन्तु वर्तमान में उसके उपयोग से रहित है वह आगम द्रव्य जीव है। नोआगम
१५ द्रव्य जीव के तीन भेद हैं—ज्ञायक शरीर, भावी और तद्व्यतिरिक्त। ज्ञाता के शरीर को ज्ञायक
शरीर कहते हैं। जीवन सामान्य की अपेक्षा 'नोआगम भावी जीव' यह भेद नहीं बनता, क्योंकि
जीव में जीवत्व सदा पाया जाता है। हाँ पर्यायार्थिक नयकी अपेक्षा 'नोआगम भावी जीव' यह भेद
बन जाता है क्योंकि जो जीव दूसरी गति में विद्यमान है वह जब मनुष्य भव को प्राप्त करने के लिये
सन्मुख होता है तब वह मनुष्य भावि जीव कहलाता है। तद्व्यतिरिक्त के दो भेद हैं कर्म और
२० नोकर्म। भाव जीव के दो भेद हैं—आगम भाव जीव और नोआगम भाव जीव। इनमें से जो
आत्मा जीव विषयक शास्त्र को जानता है और उसके उपयोग से युक्त है अथवा मनुष्य जीवविषयक
शास्त्र को जानता है और उसके उपयोग से युक्त है वह आगम भाव जीव कहलाता है। तथा जीवन
पर्याय या मनुष्य जीवन पर्याय से युक्त आत्मा नोआगम भाव जीव कहलाता है। इसी प्रकार
अजीवादि अन्य पदार्थों की भी नामादि निक्षेप विधि लगा लेना चाहिये।

२५ शंका—निक्षेप विधि का कथन किस लिये किया जाता है?

समाधान—अप्रकृत का निराकरण करने के लिये और प्रकृत का निरूपण करने के लिये इसका
कथन किया जाता है। तात्पर्य यह है कि किस शब्द का क्या अर्थ है यह निक्षेप विधि के द्वारा
विस्तार से बतलाया जाता है।

(१) -भ्यभाव-आ०, दि० २। (२)-र्थानामजीवानां नामा-मु०।

रूपणाय च। निक्षेपविधिना[1] शब्दार्थः प्रस्तीर्यते। तच्छब्दग्रहणं किमर्थम्? सर्वसङ्ग्रहार्थम्। असति हि तच्छब्दे सम्यग्दर्शनादीनां प्रधानानामेव न्यासेनाभिसम्बन्धः स्यात्, तद्विषयभावेनोपगृहीतानां जीवादीनां अप्रधानानां न स्यात्। तच्छब्दग्रहणे पुनः क्रियमाणे सति सामर्थ्यात्प्रधानानामप्रधानानां च ग्रहणं सिद्धं भवति।

एवं नामादिभिः प्रस्तीर्णानामधिकृतानां तत्त्वाधिगमः कुतः? इत्यत इदमुच्यते—　५

शंका—सूत्र में 'तत्' पद का ग्रहण किस लिये किया है?

समाधान—सब का संग्रह करने के लिये सूत्र में 'तत्' पद का ग्रहण किया है। यदि सूत्र में तत् पद न रखा जाय तो प्रधान भूत सम्यग्दर्शनादिक का ही न्यास के साथ सम्बन्ध होता। सम्यग्दर्शनादिक के विषय रूप से ग्रहण किये गये अप्रधानभूत जीवादिक का न्यास के साथ सम्बन्ध न होता। परन्तु सूत्र में 'तत्' पद के ग्रहण कर लेने पर सामर्थ्य से प्रधान और अप्रधान सब का　१० ग्रहण बन जाता है।

विशेषार्थ—नि उपसर्ग पूर्वक क्षिप् धातु से निक्षेप शब्द बना है। निक्षेप का अर्थ 'रखना' है। न्यास शब्द का भी यही अर्थ है। आशय यह है कि एक-एक शब्द का लोक में और शास्त्र में अनेक अर्थों में प्रयोग किया जाता है। यह प्रयोग कहाँ किस अर्थ में किया गया है इस बात को बतलाना ही निक्षेप विधि का काम है। यों तो आवश्यकतानुसार निक्षेप के अनेक भेद किये जा सकते हैं।　१५ शास्त्रों में भी ऐसे विविध भेदों का उल्लेख देखने में आता है। किन्तु मुख्यतया यहाँ इसके चार भेद किये गये हैं—नाम, स्थापना, द्रव्य और भाव। इनका लक्षण और दृष्टान्त द्वारा कथन टीका में किया ही है। आशय यह है कि जैसे टीका में एक जीव शब्द का नाम निक्षेप की अपेक्षा भिन्न अर्थ बतलाया है, स्थापना निक्षेप की अपेक्षा भिन्न अर्थ बतलाया है, द्रव्य निक्षेप की अपेक्षा भिन्न अर्थ बतलाया है और भाव निक्षेप की अपेक्षा भिन्न अर्थ बतलाया है। उसी प्रकार प्रत्येक शब्द का　२० नामादि निक्षेप विधि के अनुसार पृथक् पृथक् अर्थ होता है। इससे अप्रकृत अर्थ का निराकरण होकर प्रकृत अथ का ग्रहण हो जाता है जिससे व्यवहार करने में किसी प्रकार की गड़बड़ी नहीं होती। इससे वक्ता और श्रोता दोनों ही एक दूसरे के आशय को भले प्रकार समझ जाते हैं। ग्रंथ का हार्द समझने के लिये भी इस विधि का ज्ञान होना अत्यन्त आवश्यक है। जैन परम्परा में इसका बड़ा भारी महत्त्व माना गया है। इसी बात को ध्यान में रख कर यहाँ निक्षेप विधि का निर्देश　२५ किया गया है।

इस प्रकार नामादिक के द्वारा विस्तार को प्राप्त हुए और अधिकृत जीवादिक व सम्यग्दर्शनादिक के स्वरूप का ज्ञान किसके जरिये होता है इस बात के बतलाने के लिये आगे का सूत्र कहते हैं—

(१)-धिना नामशब्दा-मु० आ०।

प्रमाणनयैरधिगमः ॥ ६ ॥

नामादिनिक्षेपविधिनोपक्षिप्तानां जीवादीनां [1]तत्त्वं प्रमाणाभ्यां नयैश्चाधिगम्यते ॥ प्रमाणनया वक्ष्यमाणलक्षणविकल्पाः। तत्र प्रमाणं द्विविधं स्वार्थं परार्थं च। तत्र स्वार्थं प्रमाणं श्रुतव[3]र्ज्जम्। श्रुतं पुनः स्वार्थं भवति परार्थं च। ज्ञानात्मकं स्वार्थं वचनात्मकं परार्थम्।
५ तद्विकल्पा नयाः। अत्राह--नयशब्दस्य अल्पाच्तरत्वात्पूर्वनिपातः प्राप्नोति? नैष दोषः। अभ्यर्हितत्वात्प्रमाणस्य पूर्वनिपातः। अभ्यर्हितत्वं च सर्वतो बलीयः। कुतोऽभ्यर्हितत्वम्? नयप्ररूपणप्रभवयोनित्वात्। एवं ह्युक्तं **"प्रगृह्य प्रमाणतः परिणतिविशेषादर्थावधारणं नय"** इति। सकलविषयत्वाच्च प्रमाणस्य। तथा चोक्तं--**"सकलादेशः प्रमाणाधीनो विकलादेशो नयधीन** इति" ॥ नयो द्विविधो द्रव्यार्थिकः पर्यायार्थिकश्च। पर्यायार्थि-
१० कनये[6]न भावतत्त्वमधिगन्तव्यम्। इतरेषां त्र[7]याणां द्रव्यार्थिकनयेन, सामान्यात्मकत्वात्।

प्रमाण और नयों से पदार्थों का ज्ञान होता है। ॥ ६ ॥

जिन जीवादि पदार्थों का नाम आदि निक्षेप विधि के द्वारा विस्तार से कथन किया है उनका स्वरुप प्रमाण और नयों के द्वारा जाना जाता है। प्रमाण और नयों के लक्षण और भेद आगे कहेंगे। प्रमाण के दो भेद हैं—स्वार्थ और पदाथ। श्रुतज्ञान को छोड़ कर शेष सब ज्ञान
१५ स्वार्थ प्रमाण हैं। परन्तु श्रुतज्ञान स्वार्थ और पदार्थ दोनों प्रकार का है। ज्ञानात्मक प्रमाण को स्वार्थ प्रमाण कहते है और वचनात्मक प्रमाण परार्थ प्रमाण कहलाता है। इनके भेद नय हैं।

शंका—नय शब्द में थोड़े अक्षर हैं इसलिये सूत्र में उसे पहले रखना चाहिये?

समाधान—यह कोई दोष नहीं, क्यों कि प्रमाण श्रेष्ठ है अतः उसे पहले रखा है। 'श्रेष्ठता सबसे बलवती होती है' ऐसा नियम है।

२०　शंका—प्रमाण श्रेष्ठ क्यों है?

समाधान—क्योंकि प्रमाण से ही नयप्ररूपणा की उत्पत्ति हुई है, अतः प्रमाण श्रेष्ठ है। आगम में ऐसा कहा है कि वस्तु को प्रमाण से जान कर अनन्तर किसी एक अवस्था द्वारा पदार्थ का निश्चय करना नय है।

दूसरे प्रमाण समग्र को विषय करता है। आगम में भी इस प्रकार कहा है कि 'सकलादेश
२५ प्रमाण का विषय है और विकलादेश नयका विषय है।' इसलिये भी प्रमाण श्रेष्ठ है।

नय के दो भेद हैं—द्रव्यार्थिक और पर्यायार्थिक। पर्यायार्थिक नयका विषय भावनिक्षेप है और

(१) तत्त्वं प्रमाणेभ्यो नयै-मु०। (२) आभिग-आ०, दि० १, दि० २। (३)-वर्ज्यम्। श्रु-मु०। (४) 'जावइया वयणवहा तावइया चेव होंति णयवाया।'-सन्मति० ३।४७। (५)-णस्य तत्पूर्व-मु०। (६)-येन पर्यायत-मु०। (७)-रेषां नामस्थापनाद्रव्याणां द्रव्या-मु०।

द्रव्यमर्थ प्रयोजनमस्येत्यसौ द्रव्यार्थिकः। पर्यायोऽर्थः प्रयोजनमस्येत्यसौ पर्यायार्थिकः। तत्सर्वं समुदितं प्रमाणेनाधिगन्तव्यम्।

शेष तीन को द्रव्यार्थिक नय ग्रहण करता है, क्यों कि द्रव्यार्थिक नय सामान्यरूप है। द्रव्य जिसका प्रयोजन है वह द्रव्यार्थिकनय है और पर्याय जिसका प्रयोजन है वह पर्यायार्थिक नय है। तथा द्रव्य और पर्याय ये सब मिल कर प्रमाण के विषय हैं। ५

विशेषार्थ—इस सूत्र में ज्ञान के प्रमाण और नय ऐसे भेद करके उनके द्वारा जीवादि पदार्थों का ज्ञान होता है यह बतलाया गया है। इसकी व्याख्या करते हुए टीका में मुख्यतया चार बातों पर प्रकाश डाला गया है—

(१) ज्ञान के पाँच भेदों में से किस ज्ञान का प्रमाण और नय इनमें से किस में अन्तर्भाव होता है।

(२) नय शब्द में अल्प अक्षर होने पर भी सूत्र में प्रमाण शब्द पहले रखने का कारण। १०

(३) नय के भेद करके चार निक्षेपों में से कौन निक्षेप किस नय का विषय है इसका विचार।

(४) प्रमाण के विषय की चर्चा।

प्रथम बात का खुलासा करते हुए जो कुछ लिखा है उसका आशय यह है कि ज्ञान के पाँच भेदों में से श्रुत ज्ञान के सिवा चार ज्ञान केवल ज्ञानरूप तो माने ही गये हैं। साथ ही वे वितर्क रहित हैं इस लिये उनका अन्तर्भाव प्रमाण ज्ञान में ही होता है। किन्तु श्रुत ज्ञान ज्ञान और वचन १५ उभय रूप माना गया है। साथ ही वह सवितर्क भी है इस लिये इसके प्रमाणज्ञान और नयज्ञान ऐसे दो भेद हो जाते हैं। यहाँ यह शंका की जा सकती है कि श्रुत ज्ञान यह शेष ज्ञानों के समान ज्ञान का ही एक भेद है तो फिर इसे ज्ञान और वचन उभय रूप क्यों बतलाया है। सो इसका यह समाधान है कि आगम द्रव्य श्रुत का अन्तर्भाव श्रुतमें किया जाता है इस लिये द्रव्य श्रुतको भी उपचारसे श्रुत ज्ञान कह दिया गया है। २०

दूसरी बात का खुलासा करते हुए प्रमाण की श्रेष्ठता में दो हेतु दिये हैं। प्रथम हेतु तो यह दिया है कि नय प्ररूपणा की उत्पत्ति प्रमाण ज्ञान से होती है अतः प्रमाण श्रेष्ठ है। इसका आशय यह है कि जो पदार्थ प्रमाण के विषय हो गये है उन्हीं में नय की प्रवृत्ति व्यवहार का कारण माना गया है अन्य में नहीं, अतः प्रमाण श्रेष्ठ है। दूसरा हेतु यह दिया है कि सकलादेश प्रमाण के आधीन है और विकलादेश नय के आधीन है अतः प्रमाण श्रेष्ठ है। सो इसका यह आशय है कि प्रमाण २५ समुदाय को विषय करता है और नय अवयव को विषय करता है अतः प्रमाण श्रेष्ठ है। जो वचन कालादिक की अपेक्षा अभेदवृत्ति की प्रधानता से या अभेदोपचार से प्रमाण के द्वारा स्वीकृत अनन्त धर्मात्मक वस्तु का एक साथ कथन करता है उसे सकलादेश कहते हैं। और जो वचन कालादिक की अपेक्षा भेदवृत्ति की प्रधानता से या भेदोपचार से नय के द्वारा स्वीकृत वस्तु धर्म का क्रम से कथन करता है उसे विकलादेश कहते हैं। इनमें से प्रमाण सकलादेशी होता है और नय विकला- ३०

एवं प्रमाणनयैरधिगतानां जीवादीनां पुनरप्यधिगमोपायान्तरप्रदर्शनार्थमाह—

निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः ॥ ७ ॥

निर्देशः स्वरूपाभिधानम् । स्वामित्वमाधिपत्यम् । साधनमुत्पत्तिनिमित्तम् । अधिकरणमधिष्ठानम् । स्थितिः कालपरिच्छेदः । विधानं प्रकारः । तत्र सम्यग्दर्शनं किमिति ५ प्रश्ने तत्त्वार्थश्रद्धानमिति निर्देशो नामादिर्वा[1] । कस्येत्युक्ते सामान्येन जीवस्य । विशेषेण गत्यनुवादेन नरकगतौ सर्वासु पृथिवीषु नारकाणां पर्याप्तकानामौपशमिकं क्षायोपशमिकं

देशी, अतः प्रमाण श्रेष्ठ माना गया है यह उक्त कथन का तात्पर्य है ।

तीसरी बात का खुलासा करते हुए नय के द्रव्यार्थिक और पर्यायार्थिक ऐसे दो भेद करके जो नामादि तीन निक्षेपों को द्रव्यार्थिक नयका और भाव निक्षेप को पर्यायार्थिक नय का विषय बतलाया १० है सो इसका यह अभिप्राय है कि नाम, स्थापना और द्रव्य ये तीनों निक्षेप सामान्य रूप हैं अतः इन्हें द्रव्यार्थिक नय का विषय बतलाया है और भाव निक्षेप पर्याय रूप है अतः इसे पर्यायार्थिक नय का विषय बतलाया है । यहाँ इतना विशेष जानना कि नाम को सादृश्य सामान्यात्मक माने बिना शब्द व्यवहार की प्रवृत्ति नहीं हो सकती है इस लिये नाम निक्षेप द्रव्यार्थिक नय का विषय है और जिसकी जिसमें स्थापना की जाती है उनमें एकत्वका अध्यवसाय किये बिना स्थापना नहीं बन सकती १५ है, इस लिये स्थापना द्रव्यार्थिक नयका विषय है । शेष कथन सुगम है ।

इस प्रकार प्रमाण और नय के द्वारा जाने गये जीवादि पदार्थों के जानने के दूसरे उपाय बतलाने के लिये आगे का सूत्र कहते हैं—

निर्देश, स्वामित्व, साधन, अधिकरण, स्थिति और विधान से सम्यग्दर्शन आदि विषयों का ज्ञान होता है ।

२० किसी वस्तु के स्वरूप का कथन करना निर्देश है । स्वामित्व का अर्थ आधिपत्य है । जिस निमित्त से वस्तु उत्पन्न होती है वह साधन है । अधिष्ठान या आधार अधिकरण है । जितने काल तक वस्तु रहती है वह स्थिति है और विधान का अर्थ प्रकार या भेद है ।

'सम्यग्दर्शन क्या है' यह प्रश्न हुआ इस पर 'जीवादि पदार्थों का श्रद्धान करना सम्यग्दर्शन है' ऐसा कथन करना निर्देश है या नामादिक के द्वारा सम्यग्दर्शन का कथन करना निर्देश है ।

२५ सम्यग्दर्शन किसके होता है ?

सामान्य से जीव के होता है और विशेष की अपेक्षा गति मार्गणा के अनुवाद से नरकगति में सब पृथिवियों में पर्याप्तक नारकियों के औपशमिक और क्षायोपशमिक सम्यग्दर्शन होता है ।

---

(१)–दिर्वा । सम्यग्दर्शनं क–मु० ।

चास्ति । प्रथमाया पृथिव्यां पर्याप्तापर्याप्तकानां क्षायिकं क्षायोपशमिकं चास्ति । तिर्यग्गतौ तिरश्चां पर्याप्तकानामौपशमिकमस्ति । क्षयिकं क्षायोपशमिकं च पर्याप्तापर्याप्तकानामस्ति । तिरश्चीना क्षायिकं नास्ति[1] । औपशमिकं क्षायोपशमिकं च पर्याप्तिकानामेव नापर्याप्तिकानाम् । मनुष्यगतौ मनुष्याणा पर्याप्तापर्याप्तकानां क्षायिकं क्षायोपशमिकं चास्ति । औपशमिकं पर्याप्तकानामेव नापर्याप्तकानाम् । मानुषीणां त्रितयमप्यस्ति पर्याप्तिकानामेव नापर्याप्तिकानाम्[2] । देवगतौ[3] देवानां पर्याप्तापर्याप्तकानां त्रितयमप्यस्ति । औपशमिकमपर्याप्तकाना कथमिति चेच्चारित्रमोहोपशमेन सह मृतान्प्रति[4] । भवनवासिव्यन्तरज्योतिष्काणां देवाना देवीनां च सौधर्मैशानकल्पवासिनीनां च क्षायिकं

पहली पृथिवी में पर्याप्तक और अपर्याप्तक नारकियों के औपशमिक और क्षायोपशमिक सम्यग्दर्शन होता है ।

तिर्यंच गति में पर्याप्तक तिर्यंचोंके औपशमिक सम्यग्दर्शन होता है । क्षायिक और क्षायोपशमिक पर्याप्तक और अपर्याप्तक दोनों प्रकार के तिर्यंचोंके होता है । तिर्यंचनी के क्षायिक सम्यग्दर्शन नहीं होता । औपशमिक और क्षायोपशमिक पर्याप्तक तिर्यंचनी के ही होता है अपर्याप्तक तिर्यंचनी के नहीं ।

मनुष्य गति में क्षायिक और क्षायोपशमिक सम्यग्दर्शन पर्याप्तक और अपर्याप्तक दोनों प्रकार के मनुष्यों के होता है । औपशमिक सम्यग्दर्शन पर्याप्तक मनुष्यके ही होता है अपर्याप्तक मनुष्यके नहीं । मनुष्यनियों के तीनों ही सम्यग्दर्शन होते हैं किन्तु ये पर्याप्तक मनुष्यनी के ही होते हैं अपर्याप्तक मनुष्यनी के नहीं ।

देवगति में पर्याप्तक और अपर्याप्तक दोनों प्रकारके देवोंके तीनों ही सम्यग्दर्शन होते हैं ।

शंका—अपर्याप्तक देवों के औपशमिक सम्यग्दर्शन कैसे होता है ?

समाधान—जो मनुष्य चरित्रमोहनीय का उपशम करके या करते हुए उपशमश्रेणी में मर कर देव होते हैं उन देवों के अपर्याप्तक अवस्था में औपशमिक सम्यग्दर्शन होता है ।

भवनवासी, व्यन्तर और ज्योतिषी देवों के, इन तीनों की देवांगनाओं के, तथा सौधर्म और

(१) नास्ति । कुत इत्युक्ते मनुष्यः कर्मभूमिज एव दर्शनमोहक्षपणाप्रारम्भको भवति । क्षपणाप्रारम्भकालात्पूर्वं तिर्यक्षु बद्धायुष्कोऽपि उत्कृष्टभोगभूमितिर्यक्पुरुषेष्वेवोत्पद्यते न तिर्यक्स्त्रीषु द्रव्यवेदस्त्रीणा तासा क्षायिकासम्भवात् । एवं तिरश्चामप्यपर्याप्तकाना क्षायोपशमिकं ज्ञेय न पर्याप्तकानाम् । औप–मु० । (२)–कानाम् । क्षायिकं पुनर्भाववेदेनैव । देव–मु० । (३)–गतौ सामन्येन देवा–मु० । (४) प्रति । विशेषेण भवन–मु० ।

नास्ति। तेषां पर्याप्तकानामौपशमिकं क्षायोपशमिकं चास्ति।

इन्द्रियानुवादेन पञ्चेन्द्रियाणां संज्ञिनां त्रितयमप्यस्ति नेतरेषाम्। कायानुवादेन त्रसकायिकानां त्रितयमप्यस्ति नेतरेषाम्। योगानुवादेन त्रयाणां योगानां त्रितयमप्यस्ति। अयोगिनां क्षायिकमेव। वेदानुवादेन त्रिवेदानां त्रितयमप्यस्ति। अपगतवेदानामौपशमिकं

५ क्षायिकं चास्ति। कषायानुवादेन चतुष्कषायाणां त्रितयमप्यस्ति। अकषायाणामौपशमिकं क्षायिकं चास्ति। ज्ञानानुवादेन आभिनिबोधिकश्रुतावधिमनःपर्ययज्ञानिनां त्रितयमप्यस्ति। केवलज्ञानिनां क्षायिकमेव। संयमानुवादेन सामायिकच्छेदोपस्थापनसंयतानां त्रितयमप्यस्ति। परिहारविशुद्धिसंयतानामौपशमिकं नास्ति, इतरत् द्वितयमप्यस्ति। सूक्ष्मसाम्परायथाख्यातसंयतानामौपशमिकं क्षायिकं चास्ति। संयतासंयतानां असंयतानां[1]

१० च त्रितयमप्यस्ति। दर्शनानुवादेन चक्षुदर्शनाचक्षुर्दर्शनावधिदर्शनिनां त्रितयमप्यस्ति[2]।

ऐशान कल्प में उत्पन्न हुई देवांगनाओं के क्षायिक सम्यग्दर्शन नहीं होता शेष दो होते हैं सो वे भी पर्याप्तक अवस्था में ही होते हैं।

इन्द्रिय मार्गणाके अनुवादसे संज्ञी पंचेन्द्रिय जीवोंके तीनों सम्यग्दर्शन होते हैं। अन्य जीवोंके कोई भी सम्यग्दर्शन नहीं होता।

१५ कायमार्गणाके अनुवादसे त्रसकायिक जीवोंके तीनों सम्यग्दर्शन होते हैं। अन्य कायवाले जीवोंके कोई भी सम्यग्दर्शन नहीं होता।

योगमार्गणाके अनुवादसे तीनों योगवाले जीवोंके तीनों सम्यग्दर्शन होते हैं किन्तु अयोगी जीवोंके एक क्षायिक सम्यग्दर्शन ही होता है।

वेदमार्गणाके अनुवादसे तीनों वेदवाले जीवोंके तीनों ही सम्यग्दर्शन होते हैं किन्तु अपगतवेदी

२० जीवोंके औपशमिक और क्षायिक ये दो सम्यग्दर्शन होते हैं।

कषायमार्गणाके अनुवादसे चारों कषायवाले जीवोंके तीनों ही सम्यग्दर्शन होते हैं किन्तु कषायरहित जीवोंके औपशमिक और क्षायिक ये दो सम्यग्दर्शन होते हैं।

ज्ञानमार्गणाके अनुवादसे आभिनिबोधिक ज्ञानी, श्रुतज्ञानी, अवधिज्ञानी और मनःपर्ययज्ञानी जीवोंके तीनों ही सम्यग्दर्शन होते हैं किन्तु केवलज्ञानी जीवोंके एक क्षायिक सम्यग्दर्शन होता है।

२५ संयम मार्गणाके अनुवादसे सामायिक और छेदोपस्थापना संयत जीवोंके तीनों सम्यग्दर्शन होते हैं। परिहारविशुद्धिसंयतोंके औपशमिक सम्यग्दर्शन नहीं होता शेष दो होते हैं।

सूक्ष्मसाम्परायिकसंयत और यथाख्यातसंयत जीवोंके औपशमिक और क्षायिक सम्यग्दर्शन होते हैं। संयतासंयत और असंयत जीवोंके तीनों सम्यग्दर्शन होते हैं।

दर्शनमार्गणाके अनुवादसे चक्षुदर्शनवाले, अचक्षुदर्शनवाले और अवधिदर्शनवाले जीवोंके

३० तीनों सम्यग्दर्शन होते हैं किन्तु केवल दर्शनवाले जीवोंके एक क्षायिक सम्यग्दर्शन ही होता है।

(१) संयतासंयतानां च मु०। (२)-तयमस्ति ता०।

केवलदर्शनिनां क्षायिकमेव । लेश्यानुवादेन षड्लेश्यानां त्रितयमप्यस्ति । अलेश्यानां क्षायिकमेव । भव्यानुवादेन भव्यानां त्रितयमप्यस्ति नाभव्यानाम् । सम्यक्त्वानुवादेन यत्र यत्सम्यग्दर्शनं तत्र तदेव ज्ञेयम् । संज्ञानुवादेन संज्ञिनां त्रितयमप्यस्ति नासंज्ञिनाम् । तदुभयव्यपदेशरहितानां क्षायिकमेव । आहारानुवादेन आहारकाणां त्रितयमप्यस्ति । अनाहारकाणां छद्मस्थानां त्रितयमप्यस्ति केवलिनां ५ समुद्घातगतानां क्षायिकमेव ।

लेश्यामार्गणाके अनुवादसे छहों लेश्यावाले जीवोंके तीनों सम्यग्दर्शन होते हैं किन्तु लेश्यारहित जीवोंके एक क्षायिक सम्यग्दर्शन ही होता है।

भव्य मार्गणाके अनुवादसे भव्य जीवोंके तीनों सम्यग्दर्शन होते हैं । अभव्योंके कोई भी सम्यग्दर्शन नहीं होता । १०

सम्यक्त्व मार्गणाके अनुवादसे जहां जो सम्यग्दर्शन है वहां वही जानना।

संज्ञा मार्गणाके अनुवादसे संज्ञी जीवोंके तीनों सम्यग्दर्शन हैं । असंज्ञियोंके कोई भी सम्यग्दर्शन नहीं हैं। तथा संज्ञी और असंज्ञी इस संज्ञासे रहित जीवोंके एक क्षायिक सम्यग्दर्शन ही होता है।

आहारक मार्गणाके अनुवादसे आहारकोंके तीनों सम्यग्दर्शन होते हैं। अनाहारक छद्मस्थोंके १५ भी तीनों सम्यग्दर्शन होते हैं। किन्तु समुद्धातगत केवली अनाहारकोंके एक क्षायिक सम्यग्दर्शन ही होता है।

विशेषार्थ—पदार्थोंके विवेचन करनेकी प्राचीन दो परम्पराएं रहीं हैं—निर्देश आदि छह अधिकारों द्वारा विवेचन करनेकी एक परम्परा और सदादि आठ अधिकारों द्वारा विवेचन करनेकी दूसरी परम्परा। यहा तत्त्वार्थसूत्रके कर्ता गृद्धपिच्छ आचार्यने ७वें और ८वें सूत्रों द्वारा इन्हीं दो २० परम्पराओंका निर्देश किया है। यहां टीकामें निर्देश आदिके स्वरूपका कथन करके उन द्वारा सम्यग्दर्शनका विचार किया गया है। उसमें भी स्वामित्वकी अपेक्षा जो कथन किया है उसका भाव समझनेके लिये यहां मुख्य बातोंका उल्लेख कर देना आवश्यक प्रतीत होता है। इन बातोंको ध्यानमें रखनेसे चारों गतियोंमें किस अवस्थामें कहां कौन सम्यग्दर्शन होता है इसका निर्णय करनेमें सहायता मिलती है! वे बातें ये हैं— २५

१—क्षायिक सम्यग्दर्शनका प्रस्थापक कर्मभूमिका मनुष्य ही होता है । किन्तु ऐसा जीव कृतकृत्यवेदक सम्यग्दृष्टि या क्षायिक सम्यग्दृष्टि हो जानेके बाद मरकर चारों गतियोंमें जन्म ले सकता है।

२—नरकमें उक्त जीव प्रथम नरकमें ही जाता है। दूसरे आदि नरकोंमें कोई भी सम्यग्दृष्टि मरकर नहीं उत्पन्न होता। ३०

४

साधनं द्विविधं अभ्यन्तरं बाह्यं च । अभ्यन्तरं दर्शनमोहस्योपशमः क्षयः क्षयोपशमो वा । बाह्यं नारकाणां प्राक्चतुर्थ्याः सम्यग्दर्शनस्य साधनं केषाञ्चिज्जातिस्मरणं केषाञ्चिद्धर्मश्रवणं केषाञ्चिद्वेदनाभिभवः । चतुर्थीमारभ्य आ सप्तम्या

३—तिर्यंचोंमें व मनुष्योंमें उक्त जीव उत्तम भोगभूमिके पुरुषवेदी तिर्यंचोंमें व मनुष्योंमें ही उत्पन्न हो सकता है।

४—तिर्यंच, मनुष्य और देवगतिके स्त्रीवेदियोंमें कोई भी सम्यग्दृष्टि जीव मरकर नहीं उत्पन्न होता।

५—भवनत्रिकमें भी कोई भी सम्यग्दृष्टि जीव मरकर नहीं उत्पन्न होता।

६—उपशम सम्यग्दृष्टि जीव मरकर देवोंमें ही उत्पन्न होता है। उसमें भी उपशमश्रेणिमें स्थित उपशम सम्यग्दृष्टिका ही मरण सम्भव है अन्यका नहीं।

७—कृतकृत्यवेदक सम्यग्दर्शन क्षयोपशम सम्यग्दर्शनका एक भेद है। इसके सिवा दूसरे प्रकारके क्षयोपशम सम्यग्दृष्टि जीव मरकर देव और मनुष्यगतिमें ही जन्म लेते हैं नरक और तिर्यंचगतिमें नहीं। ऐसे जीव यदि तिर्यंचगति और मनुष्यगतिके होते हैं तो वे देवोंमें उत्पन्न होते हैं। यदि नरकगति और देवगतिके होते हैं तो वे मनुष्योंमें उत्पन्न होते हैं।

८—सम्यग्दृष्टि जीव मरकर नपुंसक वेदियोंमें उत्पन्न होता हुआ भी प्रथम नरकके नपुंसक वेदियोंमें ही उत्पन्न होता है। मनुष्यगति और तिर्यंचगतिके नपुंसकवेदियोंमें नहीं उत्पन्न होता[1]।

ये ऐसी बातें हैं जिनको ध्यानमें रखनेसे किस गतिकी किस अवस्थामें कौन सम्यग्दर्शन होता है इसका पता लग जाता है जिसका स्पष्ट उल्लेख मूल टीकामें किया ही है। एक बातका उल्लेख कर-देना और आवश्यक प्रतीत होता है वह यह कि गति मार्गणाके अवान्तर भेद यद्यपि भाववेदकी प्रधानतासे किये गये हैं द्रव्य वेदकी प्रधानतासे नहीं, इसलिये यहां सर्वत्र भाववेदी स्त्रियोंका ही ग्रहण किया गया है। तथापि द्रव्यस्त्रियोंमें सम्यग्दृष्टि मरकर नहीं उत्पन्न होता यह बात अन्य प्रमाणोंसे जानी जाती है। इस प्रकार किस गतिकी किस अवस्थामें कौन सम्यग्दर्शन होता है इसका विचार किया। शेष मार्गणाओंमें कहां कितने सम्यग्दर्शन हैं और कहां नहीं इसका विचार सुगम है, इसलिये यहां हमने खुलासा नहीं किया।

साधन दो प्रकार है—अभ्यन्तर और बाह्य। दर्शनमोहनीयका उपशम, क्षय या क्षयोपशम अभ्यन्तर साधन है। बाह्य साधन निम्न प्रकार है—नारकियोंके चौथे नरकसे पहले तक अर्थात् तीसरे नरक तक किन्हींके जातिस्मरण, किन्हींके धर्मश्रवण और किन्हींके वेदनाभिभव से सम्य-

(१) इस नियमके अनुसार जीवकाण्डकी 'हेट्ठिमछप्पुढवीणं' इत्यादि नम्बरकी गाथामें 'सव्वइत्थीणं' के स्थानमें 'संढइत्थीणं' पाठ समीचीन प्रतीत होता है।

नारकाणां जातिस्मरणं वेदनाभिभवश्च । तिरश्चां केषाञ्चिज्जातिस्मरणं केषाञ्चिद्ध-
र्मश्रवणं केषाञ्चिज्जिनबिम्बदर्शनम् । मनुष्याणामपि तथैव । देवानां केषाञ्चिज्जाति-
स्मरणं केषाञ्चिद्धर्मश्रवणं केषाञ्चिज्जिनमहिमदर्शनं केषाञ्चिद्देवर्द्धिदर्शनम् । एवं
प्रागानतात् । आनतप्राणतारणाच्युतदेवानां देवर्द्धिदर्शनं मुक्त्वाऽन्यत्त्रितयमप्यस्ति ।
नवग्रैवेयकवासिनां केषाञ्चिज्जातिस्मरणं केषाञ्चिद्धर्मश्रवणम् । अनुदिशानुत्तरविमान- ५
वासिनामियं कल्पना न सम्भवति; प्रागेव गृहीतसम्यक्त्वानां तत्रोत्पत्तेः ।

अधिकरणं द्विविधं अभ्यन्तरं बाह्यं च । अभ्यन्तरं स्वस्वामिसम्बन्धार्ह एव
आत्मा, विवक्षात. कारकप्रवृत्तेः । बाह्यं लोकनाडी । सा कियती ? एकरज्जुविष्कम्भा
चतुर्दशरज्ज्वायामा ।

स्थितिरौपशमिकस्य जघन्योत्कृष्टा चान्तर्मौहूर्तिकी । क्षायिकस्य संसारिणो १०

ग्दर्शन उत्पन्न होता है। चौथेसे लेकर सातवें तक किन्हींके जातिस्मरण और किन्हींके वेदनाभि-
भवसे सम्यग्दर्शन उत्पन्न होता है।

तिर्यंचोंमें किन्हींके जातिस्मरण, किन्हींके धर्मश्रवण, और किहींके जिनबिम्बदर्शनसे सम्यग्दर्शन
उत्पन्न होता है। मनुष्योंके भी इसी प्रकार जानना चाहिये।

देवोंमें किन्हींके जातिस्मरण, किन्हींके धर्मश्रवण किन्हींके जिनमहिमादर्शन, और किन्हींके देव- १५
ऋद्धिदर्शनसे सम्यग्दर्शन उत्पन्न होता है। यह व्यवस्था आनत कल्पसे पूर्वतक जानना चाहिये।
आनत, प्राणत, आरण और अच्युत कल्पके देवोंके देवऋद्धिदर्शनको छोड़कर शेष तीन साधन पाये
जाते हैं। नौ ग्रैवेयकमें निवास करनेवाले देवोंके सम्यग्दर्शनका साधन किन्हींके जातिस्मरण और
किन्हींके धर्मश्रवण है। अनुदिश और अनुत्तरविमानोंमें रहनेवाले देवोंके यह कल्पना नहीं है, क्योंकि
वहां सम्यग्दृष्टि जीव ही उत्पन्न होते हैं। २०

अधिकरण दो प्रकारका है—अभ्यन्तर और बाह्य। अभ्यन्तर अधिकरण–जिस सम्यग्दर्शनका
जो स्वामी है वही उसका अभ्यन्तर अधिकरण है। यद्यपि सम्बन्धमें षष्ठी और अधिकरणमें सप्तमी
विभक्ति होती है फिर भी विवक्षाके अनुसार कारककी प्रवृत्ति होती है, अतः षष्ठी विभक्ति द्वारा पहले
जो स्वामित्वका कथन किया है उसके स्थानमें सप्तमी विभक्ति करनेसे अधिकरणका कथन
हो जाता है। २५

बाह्य अधिकरण लोकनाडी है।

शंका—वह कितनी बड़ी है ?

समाधान—एक राजु चौड़ी और चौदह राजु लम्बी है।

औपशमिक सम्यग्दर्शनकी जघन्य और उत्कृष्ट स्थिति एक अन्तर्मुहूर्त है। क्षायिक सम्यग्द-

जघन्यान्तर्मौहूर्तिकी । उत्कृष्टा त्रयस्त्रिंशत्सागरोपमाणि सान्तर्मुहूर्ताष्टवर्षहीनपूर्वकोटिद्वयाधिकानि । मुक्तस्य सादिरपर्यवसाना । क्षायोपशमिकस्य जघन्याऽन्तर्मौहूर्तिकी उत्कृष्टा षट्षष्टिसागरोपमाणि ।

विधानं सामान्यादेकं सम्यग्दर्शनम् । द्वितयं निसर्गजाधिगमजभेदात्[1] । त्रितयं ५ औपशमिकक्षायिकक्षायोपशमिकभेदात् । एवं सङ्ख्येया विकल्पाः शब्दतः । असङ्ख्येया

र्शनकी संसारी जीवके जघन्य स्थिति अन्तर्मुहूर्त है और उत्कृष्ट स्थिति आठ वर्ष और अन्तर्मुहूर्तकम दो पूर्वकोटि अधिक तेतीस [2]सागर है। मुक्त जीवके सादि—अनन्त है। क्षायोपशमिक[3] सम्यग्दर्शनकी जघन्य स्थिति अन्तर्मुहूर्त है और उत्कृष्ट स्थिति छ्यासठ सागर है।

भेदकी अपेक्षा सम्यग्दर्शन सामान्यसे एक है। निसर्गज और अधिगमजके भेदसे दो प्रकार- १० का है। औपशमिक, क्षायिक और क्षायोपशमिकके भेदसे तीन प्रकारका है। शब्दोंकी अपेक्षा संख्यात प्रकारका है तथा श्रद्धान करनेवालोंकी अपेक्षा असंख्यात प्रकारका और श्रद्धान करने

(१)—गमजभेदात् । एवं मु० ।

(२) क्षायिक सम्यग्दृष्टि उसी भवमें, तीसरे भवमें या चौथे भवमें मोक्ष जाता है। जो चौथे भवमें मोक्ष जाता है वह पहले भोगभूमि में उसके बाद देव पर्यायमें जन्म लेकर और अन्तमें मनुष्य होकर मोक्ष जाता है। जो तीसरे भवमें मोक्ष जाता है वह पहले नरकमें या देवपर्यायमें जन्म लेकर और अन्तमें मनुष्य होकर मोक्ष जाता है। यहां तीन और चार भवोंमें क्षायिक सम्यग्दर्शनके उत्पन्न होनेके भवका भी ग्रहण कर लिया है। संसारी जीवके क्षायिक सम्यग्दर्शनकी यह उत्कृष्ट स्थिति तीन भवकी अपेक्षा बतलाई है। प्रथम और अन्तके दो भव मनुष्य पर्यायके लिए गये हैं और दूसरा भव देव पर्यायका लिया गया है। इन तीनों भवोंकी उत्कृष्ट स्थिति दो पूर्व कोटि अधिक तेतीस सागर होती है। किन्तु क्षायिक सम्यग्दर्शन की प्राप्ति आठ वर्ष और अन्तर्मुहूर्त के पहले नहीं हो सकती, इस लिये उक्त कालमें से इतना काल कम करके क्षायिक सम्यग्दर्शनकी उत्कृष्ट स्थिति आठ वर्ष अन्तर्मुहूर्त कम दो पूर्व कोटि वर्ष अधिक तेतीस सागर बतलाई है।

(३) खुद्दाबन्धमें क्षायोपशमिकसम्यग्दर्शनका उत्कृष्ट काल छयासठ सागर इस प्रकार घटित करके बतलाया है—एक जीव उपशम सम्यक्त्वसे वेदक सम्यक्त्वको प्राप्त होकर शेष भुज्यमान आयुसे कम बीस सागरकी आयु वाले देवोंमें उत्पन्न हुआ। फिर मनुष्यों में उत्पन्न होकर पुनः मनुष्यायुसे कम बाईस सागर की आयुवाले देवोंमें उत्पन्न हुआ। फिर मनुष्यगतिमें जाकर भुज्यमान मनुष्यायुसे तथा दर्शनमोह की क्षपणा पर्यन्त आगे भोगी जानेवाली मनुष्यायुसे कम चौबीस सागर की आयुवाले देवोंमें उत्पन्न हुआ। वहां से फिर मनुष्य गतिमें आकर वहां वेदक सम्यक्त्वके कालमें अन्तर्मुहूर्त रह जाने पर दर्शनमोहकी क्षपणाका प्रारम्भ करके कृतकृत्य वेदक सम्यग्दृष्टि हो गया। यह जीव जब कृतकृत्यवेदकके अन्तिम समयमें स्थित होता है तब क्षायोपशमिक सम्यग्दर्शन का उत्कृष्ट काल छयासठ सागर प्राप्त होता है।

अनन्ताश्च भवन्ति श्रद्धातृश्रद्धातव्यभेदात् । एवमयं निर्देशादिविधिर्ज्ञानचारित्रयोर्जीवाजीवादिषु चागमानुसारेण योजयितव्यः ।

किमेतैरेव जीवादीनामधिगमो भवति उत अन्योऽप्यधिगमोपायोऽस्तीति परिपृष्टोऽस्तीत्याह—

सत्सङ्ख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च ॥ ८ ॥ ५

सदित्यस्तित्वनिर्देशः[1] । स प्रशंसादिषु वर्तमानो नेह गृह्यते । सङ्ख्या भेदगणना । क्षेत्रं निवासो वर्तमानकालविषयः । तदेव स्पर्शनं त्रिकालगोचरम् । कालो द्विविधः मुख्यो व्यावहारिकश्च । तयोरुत्तरत्र निर्णयो वक्ष्यते । अन्तरं विरहकालः । भावः औपशमिकादिलक्षणः । अल्पबहुत्वमन्योऽन्यापेक्षया विशेषप्रतिपत्तिः । एतैश्च सम्यग्दर्शनादीनां जीवादीनां चाधिगमो वेदितव्यः । ननु च निर्देशादेव सद्ग्रहणं सिद्धम् । विधान- १० ग्रहणात्सङ्ख्यागतिः । अधिकरणग्रहणात्क्षेत्रस्पर्शनावबोधः । स्थितिग्रहणात्कालसङ्ग्रहः ।

योग्य पदार्थोंकी अपेक्षा अनन्त प्रकारका है ।

इसी प्रकार यह निर्देश आदि विधि ज्ञान और चारित्रमें तथा जीव और अजीव आदि पदार्थोंमें आगमके अनुसार लगा लेना चाहिये ।

क्या इन उपर्युक्त कारणोंसे ही जीवादि पदार्थोंका ज्ञान होता है या और दूसरे भी ज्ञानके १५ उपाय हैं इस प्रकार ऐसा प्रश्न करनेपर दूसरे उपाय है यह बतलानेके लिये आगेका सूत्र कहते हैं—

सत्, संख्या, क्षेत्र, स्पर्शन, काल, अन्तर, भाव और अल्पबहुत्वसे भी सम्यग्दर्शन आदि विषयोंका ज्ञान होता हैं ॥८॥

'सत्' अस्तित्वका सूचक है। वह प्रशंसा आदि अनेक अर्थोंमें रहता है पर उनका यहां ग्रहण नहीं किया है। संख्यासे भेदोंकी गणना ली है। वर्तमानकाल विषयक निवासको क्षेत्र २० कहते हैं। त्रिकाल विषयक निवासको स्पर्शन कहते हैं। काल दो प्रकारका है—मुख्य और व्यावहारिक। इनका निर्णय आगे करेंगे। विरहकालको अन्तर कहते हैं। भावसे औपशमिक आदि भावोंका ग्रहण किया गया है और एक दूसरेकी अपेक्षा न्यूनाधिकका ज्ञान करनेको अल्पबहुत्व कहते हैं। इन सत् आदिके द्वारा सम्यग्दर्शनादिक और जीवादि पदार्थोंका ज्ञान होता है ऐसा यहां जानना चाहिये । २५

शंका—निर्देशसे ही 'सत्'का ग्रहण हो जाता है। विधानके ग्रहण करनेसे संख्याका ज्ञान हो जाता है। अधिकरणके ग्रहण करनेसे क्षेत्र और स्पर्शनका ज्ञान हो जाता है। स्थितिके ग्रहण करनेसे

(१)–र्देशः । प्रशंसा–मु० ता० न० ।

भावो नामादिषु सङ्गृहीत एव । पुनरेषां किमर्थं ग्रहणमिति । सत्यं, सिद्धम् । विनेयाशयवशात्तत्त्वदेशनाविकल्पः । केचित्सङ्क्षेपरुचयः[2] केचित् विस्तररुचयः अपरे नातिसङ्क्षेपेण नातिविस्तरेण प्रतिपाद्याः । सर्वसत्त्वानुग्रहार्थो हि सतां प्रयास इति अधिगमाभ्युपायभेदोद्देशः कृतः । इतरथा हि "प्रमाणनयैरधिगमः" इत्यनेनैव
५ सिद्धत्वादितरेषां ग्रहणमनर्थकं स्यात् ।

तत्र जीवद्रव्यमधिकृत्य सदाद्यनुयोगद्वारनिरूपणं क्रियते । जीवाश्चतुर्दशसु गुणस्थानेषु व्यवस्थिताः । मिथ्यादृष्टिः सासादनसम्यग्दृष्टिः सम्यङ्मिथ्यादृष्टिः असंयतसम्यग्दृष्टिः संयतासंयतः प्रमत्तसंयतः अप्रमत्तसंयतः अपूर्वकरणस्थाने उपशमकः क्षपकः अनिवृत्तिबादरसाम्परायस्थाने उपशमकः क्षपकः सूक्ष्मसाम्परायस्थाने उपशमकः क्षपकः
१० उपशान्तकषायवीतरागछद्मस्थः क्षीणकषायवीतरागछद्मस्थः सयोगकेवली अयोगकेवली चेति । एतेषामेव जीवसमासानां निरूपणार्थं चतुर्दश मार्गणास्थानानि ज्ञेयानि । गतीन्द्रियकाययोगवेदकषायज्ञानसंयमदर्शनलेश्याभव्यसम्यक्त्वसञ्ज्ञाऽऽहारका इति ।

कालका संग्रह हो जाता है । भावका नामादिकमें संग्रह हो ही गया है फिर इनका अलगसे किस लिये ग्रहण किया है ?

१५ समाधान—यह बात सही है कि निर्देश आदिके द्वारा 'सत्' आदिकी सिद्धि हो जाती है तो भी शिष्योंके अभिप्रायानुसार तत्त्वदेशनामें भेद पाया जाता है । कितने ही शिष्य संक्षेपरुचिवाले होते हैं । कितने ही शिष्य विस्तार रुचिवाले होते हैं और दूसरे शिष्य न तो अतिसंक्षेप कथन करनेसे समझते हैं और न अति विस्तृत कथन करनेसे समझते हैं । किन्तु सज्जनोंका प्रयास सब जीवोंका उपकार करना है इसलिये यहाँ अलगसे ज्ञानके उपायके भेदोंका निर्देश किया है ।
२० अन्यथा 'प्रमाणनयैरधिगमः' इतनेसे ही काम चल जाता दूसरे उपायोंका ग्रहण करना निष्फल होता ।

अब जीव द्रव्यकी अपेक्षा 'सत्' आदि अनुयोगद्वारोंका कथन करते हैं यथा—जीव चौदह गुणस्थानोंमें स्थित हैं । मिथ्यादृष्टि, सासादनसम्यग्दृष्टि, सम्यग्मिथ्यादृष्टि, असंयतसम्यग्दृष्टि, संयतासंयत, प्रमत्तसंयत, अप्रमत्तसंयत, अपूर्वकरण गुणस्थानवर्ती उपशमक और क्षपक, अनिवृत्ति-
२५ बादरसाम्पराय गुणस्थानवर्ती उपशमक और क्षपक, सूक्ष्मसाम्पराय गुणस्थानवर्ती उपशमक और क्षपक, उपशान्तकषाय वीतराग छद्मस्थ, क्षीणकषाय वीतराग छद्मस्थ, सयोगकेवली और अयोगकेवली । इन चौदह जीवसमासोंके निरूपण करनेकेलिये चौदह मार्गणास्थान जानने चाहिये ।

---

(१) ग्रहणमुच्यते ? सत्यं ता० न० । (२) संक्षेपरुचयः । अपरे नाति–मु० ।

तत्र सत्प्ररूपणा द्विविधा सामान्येन विशेषेण च। सामान्येन अस्ति मिथ्यादृष्टिः सासादनसम्यग्दृष्टिरित्येवमादि। विशेषेण गत्यनुवादेन नरकगतौ सर्वासु पृथिवीषु आद्यानि चत्वारि गुणस्थानानि सन्ति। तिर्यग्गतौ तान्येव संयतासंयतस्थानाधिकानि सन्ति। मनुष्यगतौ चतुर्दशापि सन्ति। देवगतौ नारकवत्। इन्द्रियानुवादेन एकेद्रियादिषु चतुरिन्द्रियपर्यन्तेषु एकमेव मिथ्यादृष्टिस्थानम्। पञ्चेन्द्रियेषु चतुर्दशापि सन्ति। ५ कायानुवादेन पृथिवीकायादिवनस्पतिकायान्तेषु[1] एकमेव मिथ्यादृष्टिस्थानम्। त्रसकायेषु चतुर्दशापि सन्ति। योगानुवादेन त्रिषु योगेषु त्रयोदश गुणस्थानानि भवन्ति। ततः परं अयोगकेवली। वेदानुवादेन त्रिषु वेदेषु मिथ्यादृष्टयाद्यनिवृत्तिबादरान्तानि सन्ति। अपगतवेदेषु अनिवृत्तिबादराद्ययोगकेवल्यन्तानि। कषायानुवादेन क्रोधमानमायासु मिथ्यादृष्टयादीनि अनिवृत्तिबादरस्थानान्तानि सन्ति। लोभकषाये तान्येव सूक्ष्मसाम्पराय- १०

यथा–गति, इन्द्रिय, काय योग, वेद, कषाय, ज्ञान, संयम, दर्शन, लेश्या, भव्य, सम्यक्त्व, संज्ञा और आहारक।

इनमेंसे सामान्य और विशेषकी अपेक्षा सत्प्ररूपणा दो प्रकारकी है। मिथ्यादृष्टि है, सासादन सम्यग्दृष्टि है इत्यादिरूपसे कथन करना सामान्यकी अपेक्षा सत्प्ररूपणा है।

विशेषकी अपेक्षा गति मार्गणाके अनुवादसे नरक गतिमें सब पृथिवियोंमें प्रारम्भके चार १५ गुणस्थान हैं। तिर्यंचगतिमें वे ही चार गुणस्थान हैं किन्तु संयतासंयत एक गुणस्थान और है। मनुष्यगतिमें चौदह ही गुणस्थान हैं और देवगतिमें नारकियोंके समान चार गुणस्थान हैं।

इन्द्रिय मार्गणाके अनुवादसे एकेन्द्रियों से लेकर चौइन्द्रिय तकके जीवोंमें एक ही मिथ्यादृष्टि गुणस्थान है। पंचेन्द्रियोंमें चौदह ही गुणस्थान हैं।

कायमार्गणाके अनुवादसे पृथिवी काय से लेकर वनस्पति तकके जीवों में एक ही मिथ्यादृष्टि २० गुणस्थान है। त्रसकायिकोंमें चौदह ही गुणस्थान हैं।

योग मार्गणाके अनुवादसे तीनों योगोंमें तेरह गुणस्थान हैं और इसके बाद अयोगकेवली गुणस्थान है।

वेदमार्गणाके अनुवादसे तीनों वेदोंमें मिथ्यादृष्टि से लेकर अनिवृत्तिबादर तक नौ गुणस्थान है। अपगतवेदियों में अनिवृत्तिबादरसे लेकर अयोगकेवली तक छह गुणस्थान हैं। २५

कषाय मार्गणाके अनुवादसे क्रोध, मान और माया कषायमें मिथ्यादृष्टि से लेकर अनिवृत्ति-बादर तक नौ गुणस्थान हैं। लोभकषायमें वे ही नौ गुणस्थान है किन्तु सूक्ष्यसाम्पराय एक गुण-

---

(१)–कायादिषु वनस्प–मु० न०।

स्थानाधिकानि । अकषायः उपशान्तकषायः क्षीणकषायः सयोगकेवली अयोगकेवली[1] चेति । ज्ञानानुवादेन मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानेषु मिथ्यादृष्टिः सासादनसम्यग्दृष्टि-श्चास्ति[2] । आभिनिबोधिकश्रुतावधिज्ञानेषु असंयतसम्यग्दृष्ट्यादीनि क्षीणकषायान्तानि सन्ति । मनःपर्ययज्ञाने प्रमत्तसंयतादयः क्षीणकषायान्ताः सन्ति । केवलज्ञाने सयोगोऽयो-
५ गश्च । संयमानुवादेन संयताः प्रमत्तादयोऽयोगकेवल्यन्ताः । सामायिकच्छेदोपस्थापनाशुद्धि-संयताः प्रमत्तादयोऽनिवृत्तिस्थानान्ताः । परिहारविशुद्धिसंयताः प्रमत्ताश्चाप्रमत्ताश्च । सूक्ष्मसाम्परायशुद्धिसंयता एकस्मिन्नेव सूक्ष्मसाम्परायस्थाने । यथाख्यातविहारशुद्धिसंयता उपशान्तकषायादयोऽयोगकेवल्यन्ताः। संयतासंयता एकस्मिन्नेव संयतासंयतस्थाने । असंयता आद्येषु चतुर्षु गुणस्थानेषु । दर्शनानुवादेन चक्षुर्दर्शनाचक्षुर्दर्शनयोर्मिथ्यादृष्ट्यादीनि
१० क्षीणकषायान्तानि सन्ति । अवधिदर्शने असंयतसम्यग्दृष्ट्यादीनि क्षीणकषायान्तानि । केवलदर्शने सयोगकेवली अयोगकेवली च । लेश्यानुवादेन कृष्णनीलकपोतलेश्यासु मिथ्या-दृष्ट्यादीनि असंयतसम्यग्दृष्ट्यन्तानि सन्ति । तेजःपद्मलेश्ययोर्मिथ्यादृष्ट्यादीनि

स्थान और है। उपशान्तकषाय, क्षीणकषाय, सयोगी और अयोगी ये चार गुणस्थान कषायरहित हैं।

ज्ञानमार्गणाके अनुवादसे मत्यज्ञान श्रुताज्ञान और विभंगज्ञानमें मिथ्यादृष्टि और सासादन-
१५ सम्यग्दृष्टि ये दो गुणस्थान हैं। आभिनिबोधिक ज्ञान, श्रुतज्ञान और अवधिज्ञानमें असंयतसम्यग्दृष्टि से लेकर क्षीणकषायतक नौ गुणस्थान हैं । मनःपर्ययज्ञानमें प्रमत्तसंयतसे लेकर क्षीणकषाय तक सात गुणस्थान हैं। केवलज्ञानमें सयोग और अयोग ये दो गुणस्थान हैं।

संयम मार्गणाके अनुवादसे प्रमत्तसंयतसे लेकर अयोगकेवली गुणस्थान तक संयत जीव होते हैं। सामायिक संयत और छेदोपस्थापनशुद्धिसंयत जीव प्रमत्तसंयतसे लेकर अनिवृत्ति गुणस्थान
२० तक होते हैं। परिहारविशुद्धिसंयत जीव प्रमत्तसंयत और अप्रमत्तसंयत गुणस्थानमें होते हैं। सूक्ष्मसाम्परायशुद्धिसंयत जीव एक सूक्ष्मसाम्पराय गुणस्थानमें होते हैं। यथाख्यात विहारशुद्धिसंयत जीव उपशान्तकषाय गुणस्थानसे लेकर अयोगकेवली गुणस्थान तक होते हैं। संयतासंयत जीव एक संयतासंयत गुणस्थानमें होते हैं। असंयत जीव प्रारम्भके चार गुणस्थानोंमें होते हैं।

दर्शन मार्गणाके अनुवादसे चक्षुदर्शन और अचक्षुदर्शनमें मिथ्यादृष्टि से लेकर क्षीणकषाय तक
२५ बारह गुणस्थान हैं। अवधिदर्शनमें असंयतसम्यग्दृष्टिसे लेकर क्षीणकषाय तक नौ गुणस्थान हैं। केवलदर्शनमें सयोगकेवली और अयोगकेवली ये दो गुणस्थान हैं।

लेश्या मार्गणाके अनुवादसे कृष्ण, नील और कपोत लेश्यामें मिथ्यादृष्टिसे लेकर असंयत-

(१)–वली च । ज्ञाना–ता० न० । (२)–दृष्टिश्चास्ति । सम्यग्मिथ्यादृष्टेः टिप्पनकारकाभिप्रायेण ज्ञातव्यम् । आभिनि–न० ।

अप्रमत्तस्थानान्तानि । शुक्ललेश्यायां मिथ्यादृष्टयादीनि सयोगकेवल्यन्तानि । अलेश्या अयोगकेवलिनः । भव्यानुवादेन भव्येषु चतुर्दशापि सन्ति । अभव्या आद्य एव स्थाने । सम्यक्त्वानुवादेन क्षायिकसम्यकत्वे असंयतसम्यग्दृष्टयादीनि अयोगकेवल्यन्तानि सन्ति । क्षायोपशमिकसम्यक्त्वे असंयतसम्यग्दृष्टयादीनि अप्रमत्तान्तानि । औपशमिकसम्यक्त्वे असंयतसम्यग्दृष्टयादीनि उपशान्तकषायान्तानि । सासादनसम्यग्दृष्टिः सम्यङ्मिथ्यादृष्टिर्मिथ्यादृष्टिश्च स्वे स्वे स्थाने । संज्ञानुवादेन संज्ञिसु द्वादश गुणस्थानानि क्षीणकषायान्तानि । असंज्ञिषु एकमेव मिथ्यादृष्टिस्थानम् । तदुभयव्यपदेशरहितः सयोगकेवली अयोगकेवली च । आहारानुवादेन आहारकेषु मिथ्यादृष्टयादीनि केवल्यन्तानि । अनाहारकेषु विग्रहगत्यापन्नेषु त्रीणि गुणस्थानानि मिथ्यादृष्टिः सासादनसम्यग्दृष्टिरसंयतसम्यग्दृष्टिश्च । समुद्घातगतः सयोगकेवली अयोगकेवली च । सिद्धाः परमेष्ठिनः अतीतगुणस्थानाः । उक्ता सत्प्ररूपणा ।

सम्यग्दृष्टि तक चार गुणस्थान हैं। पीत और पद्मलेश्यामें मिथ्यादृष्टिसे लेकर अप्रमत्तसंयत तक सात गुणस्थान है। शुक्ललेश्यामें मिथ्यादृष्टि से लेकर सयोगकेवली तक तेरह गुणस्थान हैं। किन्तु अयोगकेवली जीव लेश्या रहित हैं।

भव्य मार्गणाके अनुवादसे भव्योंमें चौदह ही गुणस्थान हैं। किन्तु अभव्य पहले ही गुणस्थान में पाये जाते हैं।

सम्यक्त्व मार्गणाके अनुवादसे क्षायिकसम्यक्त्वमें असंयतसम्यग्दृष्टिसे लेकर अयोगकेवली तक ग्यारह गुणस्थान हैं। क्षायोपशमिक सम्यक्त्वमें असंयतसम्यग्दृष्टिसे लेकर अप्रमत्तसंयत तक चार गुणस्थान हैं। औपशमिक सम्यक्त्वमें असंयतसम्यग्दृष्टिसे लेकर उपशान्तकषायतक आठ गुणस्थान हैं। सासादनसम्यग्दृष्टि, सम्यग्मिथ्यादृष्टि और मिथ्यादृष्टि अपने अपने गुणस्थान में होते हैं।

संज्ञामार्गणाके अनुवादसे संज्ञियोंमें क्षीणकषायतक बारह गुणस्थान हैं। असंज्ञियोंमें एक ही मिथ्यादृष्टि गुणस्थान है। संज्ञी और असंज्ञी इस संज्ञासे रहित जीव सयोगकेवली और अयोगकेवली इन दो गुणस्थावाले होते हैं।

आहार मार्गणाके अनुवादसे आहारकोंमें मिथ्यादृष्टि गुणस्थानसे लेकर सयोगकेवली तक तेरह गुणस्थान होते हैं। विग्रहगतिको प्राप्त अनाहारकों में मिथ्यादृष्टि, सासादनसम्यग्दृष्टि और असंयतसम्यग्दृष्टि ये तीन गुणस्थान होते हैं। तथा समुद्घातगत सयोगकेवली और अयोगकेवली जीव भी अनाहारक होते है।

सिद्ध परमेष्ठी गुणस्थानातीत हैं।

इस प्रकार सत्प्ररूपणाका कथन समाप्त हुआ।

सङ्ख्याप्ररूपणोच्यते। सा द्विविधा[1] सामान्येन विशेषेण च। सामान्येन तावत् जीवा मिथ्यादृष्टयोऽनन्तानन्ताः। सासादनसम्यग्दृष्टयः सम्यङ्मिथ्यादृष्टयोऽसंयतसम्यग्दृष्टयः संयतासंयताश्च पल्योपमासङ्ख्येयभागप्रमिताः। प्रमत्तसंयताः कोटीपृथक्त्वसङ्ख्याः। पृथक्त्वमित्यागमसंज्ञा तिसृणां कोटीनामुपरि नवानामधः। अप्रमत्तसंयताः संख्येयाः। ५ चत्वार उपशमकाः प्रवेशेन एको वा द्वौ वा त्रयो वा। उत्कर्षेण चतुःपञ्चाशत्। स्वकालेन समुदिताः संख्येयाः। चत्वारः क्षपका अयोगकेवलिनश्च प्रवेशेन एको वा द्वौ वा त्रयो वा। उत्कर्षेणाष्टोत्तरशतसंख्याः। स्वकालेन समुदिताः संख्येयाः। सयोगकेवलिनः प्रवेशेन एको वा द्वौ वा त्रयो वा। उत्कर्षेणाष्टोत्तरशतसंख्याः। स्वकालेन समुदिताः शतसहस्रपृथक्त्वसंख्याः।

१० विशेषेण गत्यनुवादेन नरकगतौ प्रथमायां पृथिव्यां नारका मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः। द्वितीयादिष्वा सप्तम्या मिथ्यादृष्टयः श्रेण्य-

अब संख्या प्ररूपणाका कथन करते हैं। सामान्य और विशेषकी अपेक्षा वह दो प्रकारकी है। सामान्यकी अपेक्षा मिथ्यादृष्टि जीव अनन्तानन्त हैं। सासादनसम्यग्दृष्टि सम्यग्मिथ्यादृष्टि, असंयतसम्यग्दृष्टि और संयतासंयत इनमेंसे प्रत्येक गुणस्थानवाले जीव पल्यके असंख्यातवें भागप्रमाण हैं। १५ प्रमत्तसंयतोंकी संख्या कोटिपृथक्त्व है। पृथक्त्व यह आगमिक संज्ञा है। इससे तीनसे ऊपर और नौके नीचे मध्यकी किसी संख्याका बोध होता है। अप्रमत्तसंयत जीव संख्यात हैं। चारों उपशमक गुणस्थानवाले जीव प्रवेशकी अपेक्षा एक दो या तीन हैं, उत्कृष्टरूपसे चौवन हैं और अपने कालके द्वारा संचित हुए उक्त जीव संख्यात हैं। चारों क्षपक और अयोगकेवली प्रवेशकी अपेक्षा एक दो या तीन हैं, उत्कृष्टरूपसे एकसौ आठ हैं और अपने कालके द्वारा संचित हुए उक्त जीव संख्यात हैं। २० सयोगकेवली जीव प्रवेशकी अपेक्षा एक, दो या तीन हैं, उत्कृष्टरूपसे एकसौ आठ हैं और अपने कालके द्वारा संचित हुए उक्त जीव लाखपृथक्त्व हैं।

विशेषकी अपेक्षा गति मार्गणाके अनुवादसे नरकगतिमें पहली पृथिवी में मिथ्यादृष्टि नारकी असंख्यात जगश्रेणीप्रमाण[2] हैं जो जगश्रेणियां जगप्रतरके[3] असंख्यातवें भागप्रमाण हैं। दूसरी पृथि-

(१) द्विविधा। सामान्येन तावत्–मु०

(२) सात राजु लम्बी और एक प्रदेशप्रमाण चौडी आकाश प्रदेश पंक्तिको जगश्रेणि कहते हैं। ऐसी जगप्रतरके असंख्यातवें भागप्रमाण जगश्रेणियोंमें जितने प्रदेश होते हैं उतने प्रथम नरकके मिथ्यादृष्टि नारकी हैं यह उक्त कथनका तात्पर्य है।

(३) जगश्रेणिके वर्गको जगप्रतर कहते हैं।

संख्येयभागप्रमिताः। स चासंख्येयभागः असंख्येया योजनकोटीकोट्यः। सर्वासु पृथिवीषु सासादनसम्यग्दृष्टयः सम्यङ्मिथ्यादृष्टयोऽसंयतसम्यग्दृष्टयश्च पल्योपमासंख्येयभागप्रमिताः। तिर्यग्गतौ तिरश्चां[1] मध्ये मिथ्यादृष्टयोऽनन्तानन्ताः। सासादनसम्यग्दृष्टयादयः संयतासंयतान्ताः पल्योपमासंख्येयभागप्रमिताः। मनुष्यगतौ मनुष्या मिथ्यादृष्टयः श्रेण्यसंख्येयभागप्रमिताः। स चासंख्येयभागः असख्येया योजनकोटीकोट्यः। सासादनसम्यग्दृष्टयादयः संयतासयतान्ताः सख्येयाः। प्रमत्तादीनां सामान्योक्ता संख्या। देवगतौ देवा मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः। सासादनसम्यग्दृष्टिसम्यङ्मिथ्यादृष्टयसंयतसम्यग्दृष्टयः पल्योपमासंख्येयभागप्रमिताः। इन्द्रियानुवादेन एकेन्द्रिया

वींसे लेकर सातवीं पृथिवीतक प्रत्येक पृथिवीमें मिथ्यादृष्टि नारकी जगश्रेणीके असंख्यातवें[2] भागप्रमाण हैं। जो जगश्रेणीका असंख्यातवां भाग असंख्यात कोटि योजनप्रमाण है। सब पृथिवियोंमें सासादनसम्यग्दृष्टि, सम्यग्मिथ्यादृष्टि और असंयतसम्यग्दृष्टि नारकी पल्यके असंख्यातवें भागप्रमाण हैं।

तिर्यंचगतिमें मिथ्यादृष्टि तिर्यंच अनन्तानन्त हैं। सासादनसम्यग्दृष्टिसे लेकर संयतासंयत तक प्रत्येक गुणस्थानवाले तिर्यंच पल्यके असंख्यातवें भागप्रमाण हैं।

मनुष्यगतिमें मिथ्यादृष्टि मनुष्य जगश्रेणीके[3] असंख्यातवें भागप्रमाण हैं। जो जगश्रेणीका असंख्यातवां भाग असंख्यातकोटि योजन प्रमाण है। सासादनसम्यग्दृष्टिसे[4] लेकर संयतासंयत तक प्रत्येक गुणस्थानवाले मनुष्य संख्यात हैं। प्रमत्तसंयत आदि मनुष्योंकी वही संख्या है जो सामान्यसे कह आये हैं।

देवगतिमें मिथ्यादृष्टि देव असंख्यात जगश्रेणीप्रमाण[5] है जो जगश्रेणियां जगप्रतरके असंख्यातवें भागप्रमाण हैं। सासादनसम्यग्दृष्टि, सम्यग्मिथ्यादृष्टि और असंयतसम्यग्दृष्टि इनमेंसे प्रत्येक गुणस्थानवाले देव पल्यके असंख्यातवें भागप्रमाण हैं।

(१) तिरश्चा मिथ्या–मु०

(२) जगश्रेणिमें ऐसे असंख्यातका भाग दो जिससे असख्यात योजन कोटि प्रमाण आकाश प्रदेश प्राप्त हो, इतनी दूसरे आदि प्रत्येक नरकके नारकियो की सख्या है। यह संख्या उत्तरोत्तर हीन है।

(३) इसमें समूच्छिम मनुष्योंकी संख्या सम्मिलित है।

(४) सासादनसम्यग्दृष्टि आदि गुणस्थानवाले मनुष्योंकी संख्या जीवस्थान द्रव्यप्रमाणानुगमकी धवला टीकामें विस्तारसे बतलाई है।

(५) मिथ्यादृष्टि देवोंकी सख्याका खुलासा प्रथम नरकके मिथ्यादृष्टि नारकियोंके खुलासाके समान जानना चाहिये। आगे भी इसी प्रकार यथायोग्य खुलासा कर लेना चाहिये।

मिथ्यादृष्टयोऽनन्तानन्ताः । द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रिया असंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः । पञ्चेन्द्रियेषु मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः । सासादनसम्यग्दृष्टयादयोऽयोगकेवल्यन्ताः सामान्योक्तसंख्याः । कायानुवादेन पृथिवीकायिका अप्कायिकास्तेजःकायिका वायुकायिका असंख्येया लोकाः । वनस्पतिकायिकाः अनन्तानन्ताः । त्रसकायिकसंख्या पञ्चेन्द्रियवत् । योगानुवादेन मनोयोगिनो वाग्योगिनश्च[1] मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः । काययोगिनो मिथ्यादृष्टयोऽनन्तानन्ताः[2] । त्रयाणामपि योगिनां सासादनसम्यग्दृष्टयादयः संयतासंयतान्ता पल्योपमासंख्येयभागप्रमिताः । प्रमत्तसंयतादयःसयोगकेवल्यन्ताः संख्येयाः । अयोगकेवलिनः सामान्योक्तसङ्ख्याः । वेदानुवादेन स्त्रीवेदाः पुंवेदाश्च मिथ्यादृष्टयोऽसङ्ख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः । नपुंसक-

इन्द्रियमार्गणाके अनुवादसे एकेन्द्रिय मिथ्यादृष्टि जीव अनन्तानन्त हैं। दोइन्द्रिय तीनइन्द्रिय और चार इन्द्रिय जीव असंख्यात जगश्रेणीप्रमाण हैं जो जगश्रेणियां जगप्रतरके असंख्यातवें भागप्रमाण हैं। पंचेन्द्रियोंमें मिथ्यादृष्टि जीव असंख्यात जगश्रेणीप्रमाण हैं जो जगश्रेणियां जगप्रतरके असंख्यातवें भागप्रमाण हैं । सासादनसम्यग्दृष्टिसे लेकर अयोगकेवली गुणस्थान तक प्रत्येक गुणस्थानवाले पंचेन्द्रियोंकी वही संख्या है जो सामान्यसे कह आये हैं।

काय मार्गणाके अनुवादसे पृथिवीकायिक, जलकायिक, अग्निकायिक और वायुकायिक जीवोंकी संख्या असंख्यात लोकप्रमाण है । वनस्पतिकायिक जीव अनन्तानन्त हैं । और त्रसकायिक जीवोंकी संख्या पंचेन्द्रियोंके[3] समान है।

योग मार्गणाके अनुवादसे मनोयोगी और वचनयोगी मिथ्यादृष्टि जीव असंख्यात जगश्रेणीप्रमाण हैं जो जगश्रेणियां जगप्रतरके असंख्यातवें भाग प्रमाण हैं । काययोगियोंमें मिथ्यादृष्टि जीव अनन्तानन्त हैं। तीनों योगवालोंमें सासादनसम्यग्दृष्टिसे लेकर संयतासंयत तक प्रत्येक गुणस्थानवाले जीव पल्यके असंख्यातवें भागप्रमाण हैं । प्रमत्तसंयतसे लेकर सयोगकेवली गुणस्थान तकके तीनों योगवाले जीव प्रत्येक गुणस्थानमें संख्यात हैं। अयोगकेवलियोंकी वही संख्या है जो सामान्यसे कह आये हैं।

वेद मार्गणाके अनुवादसे स्त्रीवेदवाले और पुरुषवेदवाले मिथ्यादृष्टि जीव असंख्यात जगश्रेणीप्रमाण हैं जो जगश्रेणियां जगप्रतरके असंख्यातवें भागप्रमाण हैं। नपुंसकवेदवाले मिथ्या-

(१)–योगिषु मिथ्या–मु० ।–योगेषु मिथ्या–दि० २ । (२)–नन्ताः । त्रियोगिनां सासा–मु० ।

(३) वैसे तो त्रस कायिकोंकी संख्या पंचेन्द्रियोंकी संख्यासे अधिक है । पर असंख्यात सामान्यकी अपेक्षा यहां त्रसकायिकोंकी संख्याको पंचेन्द्रियों की संख्याके समान बतलाया है ।

वेदा मिथ्यादृष्टयोऽनन्तानन्ताः । स्त्रीवेदा नपुंसकवेदाश्च सासादनसम्यग्दृष्टयादयः संयतासंयतान्ताः सामान्योक्तसंख्याः । प्रमत्तसंयतादयोऽनिवृत्तिबादरान्ता. संख्येयाः[1]। पुंवेदाः सासादनसम्यग्दृष्टयादयोऽनिवृत्तिबादरान्ताः सामान्योक्तसंख्याः । अपगतवेदा अनिवृत्तिबादरादयोऽयोगकेवल्यन्ता. सामान्योक्तसंख्या. ॥कषायानुवादेन क्रोधमानमायासु मिथ्यादृष्टयादय. सयतासयतान्ताः सामान्योक्तसंख्याः । प्रमत्तसंयतादयोऽनिवृत्तिबादरान्ताः ५ संख्येयाः । लोभकषायाणामुक्त एव क्रमः । अयं तु विशेषः सूक्ष्मसाम्परायसंयताः सामान्योक्तसख्याः । अकषाया उपशान्तकषायादयोऽयोगकेवल्यन्ताः सामान्योक्तसंख्याः । ज्ञानानुवादेन मत्यज्ञानिनः श्रुताज्ञानिनश्च मिथ्यादृष्टिसासादनसम्यग्दृष्टयः[2] सामान्योक्तसंख्याः ।

दृष्टि जीव अनन्तानन्त हैं। सासादनसम्यग्दृष्टिसे लेकर संयतासंयत तक स्त्रीवेदवाले और नपुंसकवेदवाले जीवोंकी वही संख्या है जो सामान्यसे कही है । प्रमत्तसंयतसे लेकर अनिवृत्तिबादर १० तक स्त्रीवेदवाले और नपुंसक वेदवाले जीव संख्यात हैं। सासादनसम्यग्दृष्टिसे लेकर संयतासंयत तक पुरुषवेदवाले जीवोंकी वहीं संख्या है जो सामान्यसे कही है । प्रमत्तसंयतसे लेकर अनिवृत्तिबादर तक पुरुषवेदवालोंकी वही संख्या है जो सामान्यसे कही है। अनिवृत्तिबादरसे लेकर अयोगकेवली गुणस्थान तक अपगतवेदवाले जीवोंकी वही संख्या है जो सामान्यसे कही है।

कषाय मार्गणाके अनुवादसे क्रोध, मान और माया कषायमें मिथ्यादृष्टिसे लेकर १५ संयतासंयत तक प्रत्येक गुणस्थानवाले जीवोंकी वही संख्या है जो [3]सामान्यसे कही है। प्रमत्तसंयतसे लेकर अनिवृत्तिबादर तक उक्त कषायवाले जीव संख्यात हैं। यही क्रम लोभकषायवाले जीवोंका जानना चाहिये। किन्तु इतनी विशेषता है कि सूक्ष्मसाम्परायिक संयत जीवोंकी वही संख्या है जो सामान्यसे कही गई है। उपशान्त कषायसे लेकर अयोगकेवली गुणस्थान तक कषायरहित जीवोंकी संख्या सामान्यवत्[4] है। २०

ज्ञान मार्गणाके अनुवादसे मत्यज्ञानी और श्रुताज्ञानी मिथ्यादृष्टि और सासादनसम्यग्दृष्टि जीवोंकी संख्या सामान्यवत्[5] है। विभंगज्ञानी मिथ्यादृष्टि जीव असंख्यात जगश्रेणीप्रमाण हैं जो

(१)-दयो सयतासयतान्ताः सामान्योक्तसंख्याः। प्रमत्तसयतादयोऽनिवृत्ति-मु०,आ०, दि० १ दि० २। (२)-दृष्टयःसासा-ता०

(३) यों तो जिस गुणस्थानवालो की जो सख्या बतलाई है वह क्रोध आदि चार भागोमें बट जाती है फिर भी सामान्यसे उस सख्याका अतिक्रम नहीं होता इस लिये क्रोध, मान, माया और लोभ कषायमें मिथ्यादृष्टि से लेकर सयतासंयततक प्रत्येक गुणस्थानवालोकी संख्या ओघके समान बतलाई है। आगे भी जहा इस प्रकार संख्या बतलाई हो वहाँ यही क्रम जान लेना चाहिये।

(४) सख्यात। (५) अनन्तानन्त।

विभङ्गज्ञानिनो मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः । सासादन-सम्यग्दृष्टयः पल्योपमासंख्येयभागप्रमिताः । मतिश्रुतज्ञानिनोऽसंयतसम्यग्दृष्ट्यादयः क्षीण-कषायान्ताः सामान्योक्तसंख्याः । अवधिज्ञानिनोऽसंयतसम्यग्दृष्टिसंयतासंयता[१] सामान्यो-क्तसंख्याः । प्रमत्तसंयतादयः क्षीणकषायान्ताः संख्येयाः । मनःपर्ययज्ञानिनः प्रमत्तसंय-
५ तादयः क्षीणकषायान्ताः संख्येयाः । केवलज्ञानिनः सयोगा अयोगाश्च सामान्योक्तसं-ख्याः । संयमानुवादेन सामायिकच्छेदोपस्थापनशुद्धिसंयताः प्रमत्तादयोऽनिवृत्तिबादरान्ताः सामान्योक्तसंख्याः । परिहारविशुद्धिसंयताः प्रमत्ताश्चाप्रमत्ताश्च संख्येयाः । सूक्ष्मसा-म्परायशुद्धिसंयता यथाख्यातविहारशुद्धिसंयताः संयतासंयता असंयताश्च सामान्योक्त-संख्याः । दर्शनानुवादेन चक्षुर्दर्शनिनो मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयभाग-
१० प्रमिताः । अचक्षुर्दर्शनिनो मिथ्यादृष्टयोऽनन्तानन्ताः । उभये च सासादनसम्यग्दृष्ट्यादयः

जगश्रेणियां जगप्रतरके असंख्यातवें भाग प्रमाण हैं। सासादनसम्यग्दृष्टि विभंगज्ञानी जीव पल्यके असंख्यातवें भाग प्रमाण हैं। असंयतसम्यग्दृष्टिसे लेकर क्षीणकषाय गुणस्थान तक मतिज्ञानी और श्रुतज्ञानी जीवोंकी संख्या सामान्यवत्[२] है। असंयतसम्यग्दृष्टि और संयतासंयत अवधिज्ञानी जीवोंकी संख्या सामान्यवत्[३] है। प्रमत्तसंयतसे लेकर क्षीणकषाय गुणस्थान तक प्रत्येक
१५ गुणस्थानमें अवधिज्ञानी जीव संख्यात हैं। प्रमत्तसंयतसे लेकर क्षीणकषायतक प्रत्येक गुणस्थानमें मनःपर्ययज्ञानी जीव संख्यात हैं। सयोगी और अयोगी केवलज्ञानियों की संख्या सामान्यवत्[४] है।

संयम मार्गणाके अनुवादसे प्रमत्तसंयतसे लेकर अनिवृत्तिबादर तक सामायिकसंयत और छेदोपस्थापनासंयत जीवोंकी संख्या सामान्यवत्[५] है। प्रमत्त और अप्रमत्त गुणस्थानमें परिहार-विशुद्धि संयत जीव संख्यात हैं। सूक्ष्मसाम्परायशुद्धिसंयत, यथाख्यातविहारशुद्धिसंयत, संयता-
२० संयत और असंयत जीवोंकी संख्या सामान्यवत्[६] है।

दर्शन मार्गणाके अनुवादसे चक्षुदर्शनवाले मिथ्यादृष्टि जीव असंख्यात जगश्रेणी प्रमाण हैं जो श्रेणियां जगप्रतरके असंख्यातवें भागप्रमाण हैं। अचक्षुदर्शनवाले मिथ्यादृष्टि जीव अनन्ता-

(१)-यतान्ताः सामा-मु०, दि० १, दि० २, आ०।

(२) जिस गुणस्थानवालों की जितनी संख्या है सामान्यसे उतनी संख्या है।

(३) पल्यके असंख्यातवें भागप्रमाण।

(४) संख्यात।

(५) संख्यात।

(१) इमानीन्द्रियाणि कदाचित्स्वातन्त्र्येण विवक्षितानि भवन्ति । तद्यथा—इद मे अक्षि सुष्ठु पश्यति, अयं मे कर्णः सुष्ठु शृणोतीति । कदाचित्पारतन्त्र्येण विवक्षितानि भवन्ति—अनेनाक्ष्णा सुष्ठु पश्यामि । अनेन कर्णेन सुष्ठु शृणोमि इति ।– पा० म० भा० १।२।२।५९। (२) गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः।'—वा० भा० १, १, ४१।

निर्देश.। स्पर्शनं स्पर्श । रसनं रस·। गन्धनं गन्धः। वर्णनं वण·। शब्दनं शब्द[1] इति। एषां क्रम इन्द्रियक्रमेणैव व्याख्यात·।

अत्राह, यत्तावन्मनोऽनवस्थानादिन्द्रिय न भवतीति प्रत्याख्यातं तत्किमुपयोगस्योपकारि उत नेति ? तदप्युपकार्येव । तेन विनेन्द्रियाणां विषयेषु स्वप्रयोजनवृत्त्यभावात् । किमस्यैषां सहकारित्वमात्रमेव प्रयोजनमुतान्यदपीत्यत आह— ५

श्रुतमनिन्द्रियस्य ॥२१॥

श्रुतज्ञानविषयोऽर्थ· श्रुतम् । स विषयोऽनिन्द्रियस्य; परिप्राप्तश्रुतज्ञानावरणक्षयोपशमस्यात्मनः श्रु[2]तार्थेऽनिन्द्रियालम्बनज्ञानप्रवृत्ते.। अथवा श्रुतज्ञानं श्रुतम्, तदनिन्द्रियस्यार्थं प्रयोजनमिति यावत् । स्वातन्त्र्यसाध्यमिदं प्रयोजनमनिन्द्रियस्य।

जैसे—स्पर्शन स्पर्श है, रसन रस है, गन्धन गन्ध है, वर्णन वर्ण है और शब्दन शब्द है। इस व्युत्पत्तिके १० अनुसार ये सब स्पर्शादिक धर्म निश्चित होते है।

इन स्पर्शादिकका क्रम इन्द्रियोके क्रमसे ही व्याख्यात है। अर्थात् इन्द्रियोंके क्रमको ध्यानमे रखकर इनका कथन किया है।

आगे कहते है कि मन अनवस्थित है इसलिये वह इन्द्रिय नही। इस प्रकार जो मनके इन्द्रियपनेका निषेध किया है सो यह मन उपयोगका उपकारी है या नही ? मन भी उपकारी है, क्योकि मनके बिना १५ स्पर्शादि विषयोमे इन्द्रियाँ अपने अपने प्रयोजनकी सिद्धि करनेमे समर्थ नही होती। तो क्या इन्द्रियोंकी सहायता करना ही मनका प्रयोजन है या और भी इसका प्रयोजन है ? इसी बातके बतलानेके लिये आगेका सूत्र कहते है—

श्रुत मनका विषय है ॥ २१ ॥

श्रुतज्ञानका विषयभूत अर्थ श्रुत है वह अनिन्द्रिय अर्थात् मनका विषय है, क्योंकि श्रुतज्ञानावरणके २० क्षयोपशमको प्राप्त हुए जीवके श्रुतज्ञानके विषयमे मनके आलम्बनसे ज्ञान होता है। अथवा श्रुत शब्द का अर्थ श्रुतज्ञान है। और वह मनका अर्थ अर्थात् प्रयोजन है। यह प्रयोजन मनके स्वत. आधीन है इसमे उसे दूसरेके साहाय्यकी आवश्यकता नही लेनी पड़ती।

विशेषार्थ—यहाँ श्रुत शब्दका अर्थ श्रुतज्ञानका विषय या श्रुतज्ञान किया है और उसे अनिन्द्रियका विषय बतलाया है। आशय यह है कि श्रुतज्ञानकी उपयोग दशा पाँच इन्द्रियोंके निमित्तसे न होकर २५ केवल अनिन्द्रियके निमित्तसे होती है। इसका यह अभिप्राय नही कि अनिन्द्रियके निमित्तसे केवल श्रुतज्ञान ही होता है, किन्तु इसका यह अभिप्राय है कि जिस प्रकार मतिज्ञान इन्द्रिय और अनिन्द्रिय दोनोके निमित्तसे होता है उस प्रकार श्रुतज्ञान इन दोनोके निमित्तसे न होकर केवल अनिन्द्रियके निमित्तसे होता है।

---

(१)–शब्द । एषा मु० ता०। शब्दः। तेषा मु०। (२) श्रुतस्यार्थे मु०, ता०, ना०।

उक्तानामिन्द्रियाणां प्रतिनियतविषयाणां स्वामित्वनिर्देशे कर्तव्ये यत्प्रथमं गृहीतं स्पर्शनं तस्य तावत्स्वामित्वावधारणार्थमाह—

वनस्पत्यन्तानामेकम् ॥२२॥

एकं प्रथममित्यर्थः। किं तत् ? स्पर्शनम्। तत्केषाम् ? पृथिव्यादीनां वनस्प-
५ त्यन्तानां वेदितव्यम्। तस्योत्पत्तिकारणमुच्यते—वीर्यान्तरायस्पर्शनेन्द्रियावरणक्षयोपशमे सति शेषेन्द्रियसर्वघातिस्पर्धकोदये च शरीरनामलाभावष्टम्भे एकेन्द्रियजातिनामोदयवशवर्तितायां च सत्यां स्पर्शनमेकमिन्द्रियमाविर्भवति।

इतरेषामिन्द्रियाणां स्वामित्वप्रदर्शनार्थमाह—

कृमिपिपीलकाभ्रमरमनुष्यादीनामेकैकवृद्धानि ॥२३॥

१० 'एकैकम्' इति वीप्सायां द्वित्वम्। एकैकेन वृद्धानि एकैकवृद्धानि। कृमिमादिं[1] कृत्वा, स्पर्शनाधिकारात् स्पर्शनमादिं कृत्वा एकैकवृद्धानीत्यभिसम्बन्धः क्रियते। 'आदि' शब्दः प्रत्येकं परिसमाप्यते। कृम्यादीनां स्पर्शन रसनाधिकम्, पिपीलिकादीनां स्पर्शनरसने

किस इन्द्रियका क्या विषय है यह बतला आये। अब उनके स्वामीका कथन करना है अतः सर्व प्रथम जो स्पर्शन इन्द्रिय कही है उसके स्वामीका निश्चय करनेके लिये आगेका सूत्र कहते हैं—

१५ **वनस्पतिकायिक तक के जीवोंके एक अर्थात् प्रथम इन्द्रिय होती है ॥ २२ ॥**

सूत्रमें आये हुए 'एक' शब्द का अर्थ प्रथम है।

शंका—वह कौन है ?

समाधान—स्पर्शन।

शंका—वह किन जीवोंके होती है ?

२० समाधान—पृथिवीकायिक जीवोंसे लेकर वनस्पतिकायिक तकके जीवोंके जानना चाहिये।

अब उसकी उत्पत्तिके कारणका कथन करते हैं—वीर्यान्तराय तथा स्पर्शन इन्द्रियावरण कर्मके क्षयोपशमके होनेपर और शेष इन्द्रियोंके सर्वघाती स्पर्धकोंके उदयके होनेपर तथा शरीर नामकर्मके आलम्बनके होनेपर और एकेन्द्रिय जाति नामकर्मके उदयकी आधीनताके रहते हुए एक स्पर्शन इन्द्रिय प्रकट होती है।

२५ अब इतर इन्द्रियोंके स्वामित्वका ज्ञान करानेके लिये आगेका सूत्र कहते हैं—

कृमि, पिपीलिका, भ्रमर और मनुष्य आदिके क्रम से एक एक इन्द्रिय अधिक होती है ॥२३॥

'एकैकम्' यह वीप्सामें द्वित्व है। इन्द्रियाँ एक एकके क्रम से बढी है इसलिये वे 'एकैकवृद्ध' कही गई है। ये इन्द्रियाँ कृमिसे लेकर बढ़ी है। यहाँ स्पर्शन इन्द्रियका अधिकार होनेसे स्पर्शन इन्द्रियसे लेकर एक एकके क्रमसे बढ़ी है इस प्रकार यहाँ सम्बन्ध कर लेना चाहिये। आदि शब्दका प्रत्येकके साथ
३० सम्बन्ध होता है। जिससे यह अर्थ हुआ कि कृमि आदि जीवोंके स्पर्शन और रसना ये दो इन्द्रियाँ

(१) कृम्यादि आ०। कृम्यादि दि० १, दि० २।

घ्राणाधिके, भ्रमरादीनां स्पर्शनरसनघ्राणानि चक्षुरधिकानि, मनुष्यादीनां तान्येव श्रोत्राधिकानीति यथासंख्येनाभिसम्बन्धो व्याख्यात । तेषां निष्पत्तिः स्पर्शनोत्पत्त्या व्याख्याता उत्तरोत्तरसर्वघातिस्पर्धकोदयेन ।

एवमेतेषु ससारिषु द्विभेदेषु इन्द्रियभेदात्पञ्चविधेषु ये पञ्चेन्द्रियास्तद्भेदस्यानुक्तस्य प्रतिपादनार्थमाह—— ५

संज्ञिनः समनस्काः ॥२४॥

मनो व्याख्यातम् । सह तेन ये वर्तन्ते ते समनस्का. । सज्ञिन[1] इत्युच्यन्ते । पारिशेष्यादितरे संसारिण. प्राणिनोऽसंज्ञिन इति सिद्धम् । ननु च सज्ञिन इत्यनेनैव गतार्थत्वात्समनस्का इति विशेषणमनर्थकम्[2]। यतो मनोव्यापारो हिताहितप्राप्तिपरिहारपरीक्षा। संज्ञापि सैवेति ? नैतद्युक्तम्, सज्ञाशब्दार्थव्यभिचारात् । सज्ञा नामेत्युच्यते। १० तद्वन्त सञ्ज्ञिन इति सर्वेषामतिप्रसङ्ग । संज्ञा ज्ञानमिति चेत् , सर्वेषा प्राणिनां

होती है। पिपीलिका आदि जीवोके स्पर्शन, रसना और घ्राण ये तीन इन्द्रियाँ होती है। भ्रमर आदि जीवोके स्पर्शन, रसना, घ्राण और चक्षु ये चार इन्द्रियाँ होती है। मनुष्यादिकके श्रोत्र इन्द्रियके और मिला देनेपर पाँच इन्द्रियाँ होती है। इस प्रकार उक्त जीव और इन्द्रिय इनका यथाक्रमसे सम्बन्ध का व्याख्यान किया। पहले स्पर्शन इन्द्रियकी उत्पत्तिका व्याख्यान कर आये है उसी प्रकार शेष १५ इन्द्रियोकी उत्पत्तिका व्याख्यान करना चाहिये। किन्तु उत्पत्तिके कारणका व्याख्यान करते समय जिस इन्द्रियकी उत्पत्तिके कारणका व्याख्यान कियाजाय, वहाँ उससे अगली इन्द्रिय सम्बन्धी सर्वघाती स्पर्धकोके उदयके साथ वह व्याख्यान करना चाहिये।

इस प्रकार इन दो प्रकारके और इन्द्रिय-भेदोंकी अपेक्षा पाँचप्रकारके ससारी जीवोमे जो पंचेन्द्रिय जीव है उनके भेद नही कहे अत उनका कथन करनेके लिये आगेका सूत्र कहते है—— २०

मनवाले जीव संज्ञी होते हैं ॥ २४ ॥

मनका व्याख्यान कर आये। उसके साथ जो रहते है वे समनस्क कहलाते है। और उन्हे ही सज्ञी कहते है। परिशेष न्यायसे यह सिद्ध हुआ कि इनसे अतिरिक्त जितने ससारी जीव होते है वे सब असज्ञी होते हैं।

शका——सूत्रमे 'सज्ञिन.' इतना पद देनेसे ही काम चल जाता है, अत. 'समनस्का.' यह विशेषण २५ देना निष्फल है, क्योकि हितकी प्राप्ति और अहितके त्यागकी परीक्षा करनेमे मनका व्यापार होता है और यही सज्ञा है ?

समाधान——यह कहना उचित नही, क्योकि सज्ञा शब्दके अर्थमे व्यभिचार पाया जाता है। अर्थात् सज्ञा शब्दके अनेक अर्थ है। सज्ञाका अर्थ नाम है। यदि नामवाले जीव संज्ञी माने जायँ तो सब जीवोंको संज्ञीपनेका प्रसंग प्राप्त होता है। संज्ञाका अर्थ यदि ज्ञान लिया जाता है तो भी सभी ३०

---

(१)–ज्ञिन· उच्य-दि० १, दि० २, आ०। (२)–नर्थकम्। मनो-ता०, ना०।

ज्ञानात्मकत्वादतिप्रसङ्गः। आहारादिविषयाभिलाषः संज्ञेति चेत् ? तुल्यम्। तस्मात्समनस्का इत्युच्यते। एवं च कृत्वा गर्भाण्डजमूर्च्छितसुषुप्त्याद्यवस्थासु हिताहितपरीक्षाभावेऽपि मनःसन्निधानात्सञ्ज्ञित्वमुपपन्नं भवति।

यदि हिताहितादिविषयपरिस्पन्दः प्राणिनां मनःप्रणिधानपूर्वकः। अथाभि-
५ नवशरीरग्रहणं प्रत्यागूर्णस्य विशीर्णपूर्वमूर्तेर्निर्मनस्कस्य यत्कर्म तत्कृत इत्युच्यते——

विग्रहगतौ कर्मयोगः ॥२५॥

विग्रहो देहः। विग्रहार्था गतिर्विग्रहगतिः। अथवा विरुद्धो ग्रहो विग्रहो व्याघातः[1]। कर्मादानेऽपि नोकर्मपुद्गलादाननिरोध इत्यर्थः। विग्रहेण गतिर्विग्रहगतिः। सर्व-

---

प्राणी ज्ञान स्वभाव होनेसे सबको संज्ञीपनेका प्रसंग प्राप्त होता है। यदि आहारादि विषयोंकी अभि-
१० लाषाको संज्ञा कहा जाता है तो भी पहलेके समान दोष प्राप्त होता है। अर्थात् आहारादि विषयक अभिलाषा सबके पाई जाती है इसलिये भी सबको सज्ञीपनेका प्रसंग प्राप्त होता है। चूंकि ये दोष न प्राप्त हों अतः सूत्रमें 'समनस्काः' यह पदरखा है। इससे यह लाभ है कि गर्भज, अण्डज, मूछित और सुषुप्ति आदि अवस्थाओंमें हिताहितकी परीक्षाके न होनेपर भी मनके सम्बन्धसे संज्ञीपना बन जाता है।

१५ विशेषार्थ——प्रायः एकेन्द्रिय आदि प्रत्येक जीव अपने इष्ट विषयमें प्रवृत्ति करता है और अनिष्ट विषयस निर्वृत्त होता है, फिर भी मनकी स्वतन्त्र सत्ता स्वीकार की गई है सो इसका कारण यह है कि तुलनात्मक अध्ययन, लोक परलोकका विचार, हिताहितका विवेक आदि कार्य ऐसे हैं जो मनके बिना नहीं हो सकते। इसीसे मनकी स्वतन्त्र सत्ता स्वीकार की गई है। यह मन जिनके होता है वे संज्ञी होते है अन्य नही। जीवोंका संज्ञी और असंज्ञी यह भेद पञ्चेन्द्रिय जीवोंमें ही पाया जाता है।
२० अन्य एकेन्द्रियसे लेकर चतुरिन्द्रिय तकके जीव तो असंज्ञी ही होते हैं। अर्थात् उनके मन न होने से उक्त प्रकारके ज्ञानसे वंचित रहते है।

यदि जीवोंके हित और अहित आदि विषयके लिये क्रिया मनके निमित्तसे होती है तो जिसने पूर्व शरीरको छोड़ दिया हैं और जो मनरहित है ऐसा जीव जब नूतन शरीरको ग्रहण करनेके लिये उद्यत होता है तब उसके जो क्रिया होती है वह किस निमित्त से होती है यही बतलानेके लिये आगेका
२५ सूत्र कहते है——

विग्रहगतिमें कर्मयोग होता है ॥ २५ ॥

विग्रहका अर्थ देह है। विग्रह अर्थात् शरीरके लिये जो गति होती है वह विग्रहगति है। अथवा विरुद्ध ग्रहको विग्रह कहते है जिसका अर्थ व्याघात है। तात्पर्य यह है कि जिस अवस्थामें कर्मके ग्रहण होनेपर भी नोकर्मरूप पुद्गलोंका ग्रहण नहीं होता वह विग्रह है और इस विग्रहके साथ होनेवाली

---

(१)—व्याघात.। नोकर्म-ता०, ना०।

शरीरप्ररोहणबीजभूतं कार्मणं शरीरं कर्मेत्युच्यते । योगो वाङ्मनसकायवर्गणानिमित्त आत्मप्रदेशपरिस्पन्द । कर्मणा कृतो योग. कर्मयोगो विग्रहगतौ भवतीत्यर्थः । तेन कर्मादानं देशान्तरसंक्रमश्च भवति ।

आह जीवपुद्गलानां गतिमास्कन्दता देशान्तरसंक्रम किमाकाशप्रदेशक्रमवृत्त्या भवति, उताविशेषेणेत्यत आह— ५

अनुश्रेणि गतिः ॥२६॥

लोकमध्यादारभ्य ऊर्ध्वमधस्तिर्यक् च आकाशप्रदेशाना क्रमसन्निविष्टानां पङ्क्तिः श्रेणिः इत्युच्यते। 'अनु' शब्दस्यानुपूर्व्येण वृत्ति । श्रेणेरा[1]नुपूर्व्येणानुश्रेणीति जीवानां पुद्गलानां च गतिर्भवतीत्यर्थ । अनधिकृताना पुद्गलानां कथं ग्रहणमिति चेत् ? गति-ग्रहणात्। यदि जीवानामेव गतिरिष्टा स्याद् गतिग्रहणमनर्थकम्, अधिकारात्तत्सिद्धे.। १० उत्तरत्र जीवग्रहणाच्च पुद्गलसप्रत्यय.। ननु चन्द्रादीना ज्योतिष्काणा[2] मेरुप्रदक्षिणा-काले विद्याधरादीना च विश्रेणिगतिरपि दृश्यते, तत्र किमुच्यते 'अनुश्रेणि गति.' इति ?

गतिका नाम विग्रहगति है। सब शरीरोकी उत्पत्तिके मूलकारण कार्मण शरीरको कर्म कहते है। तथा वचनवर्गणा, मनोवर्गणा और कायवर्गणाके निमित्तसे होनेवाले आत्मप्रदेशोके हलन चलनको योग कहते है। कर्म के निमित्तसे जो योग होता है वह कर्मयोग है। वह विग्रहगतिमे होता है १५ यह उक्त कथनका तात्पर्य है। इससे नूतन कर्मका ग्रहण और एक देशसे दूसरे देशमे गमन होता है।

गमन करनेवाले जीव और पुद्गलोका एक देशसे दूसरे देशमे गमन आकाशप्रदेशोकी पवितक्रमसे होता है या इसके बिना होता है, अब इसका खुलासा करनेके लिये आगेका सूत्र कहते है—

गति श्रेणिके अनुसार होती है ॥ २६ ॥

लोकके मध्यसे लेकर ऊपर नीचे और तिरछे क्रमसे स्थित आकाशप्रदेशोकी पक्तिको श्रेणि कहते २० है। अनु शब्द 'आनुपूर्वी' अर्थमे समसित है। इसलिये 'अनुश्रेणि' का अर्थ 'श्रेणिकी आनुपूर्वीसे' होता है। इस प्रकारकी गति जीव और पुद्गलोकी होती है यह इसका भाव है।

शका—पुद्गलोका अधिकार न होनेसे यहाँ उनका ग्रहण कैसे हो सकता है ?

समाधान—सूत्रमे गतिपदका ग्रहण किया है इससे सिद्ध हुआ कि अनधिकृत पुद्गल भी यहाँ विवक्षित है। यदि जीवोकी गति ही इष्ट होती तो सूत्रमे गति पदके ग्रहण करनेकी आवश्यकता न २५ थी, क्योंकि गति पदका ग्रहण अधिकारसे सिद्ध है। दूसरे अगले सूत्रमे जीव पदका ग्रहण किया ह इसलिये इस सूत्रमे पुद्गलोंका भी ग्रहण इष्ट है यह ज्ञान होता है।

शका—चन्द्रमा आदि ज्योतिषियोकी और मेरुकी प्रदक्षिणा करते समय विद्याधरोकी विश्रेणि गति देखी जाती है, इसलिये जीव और पुद्गलोंकी अनुश्रेणि गति होती है यह किसलिये कहा ?

---

(१)–रानुपूर्व्येणा-आ०। (२) ज्योतिषा आ०, दि० १, दि० २।

कालदेशनियमोऽत्र वेदितव्यः। तत्र कालनियमस्तावज्जीवानां मरणकाले भवान्तरसंक्रम मुक्तानां चोर्ध्वगमनकाले अनुश्रेण्येव गतिः। देशनियमोऽपि ऊर्ध्वलोकादधोगतिः, अधोलोकादूर्ध्वगतिः, तिर्यग्लोकादधोगतिरूर्ध्वा वा तत्रानुश्रेण्येव। पुद्गलानां च या लोकान्तप्रापिणी सा नियमादनुश्रेण्येव। इतरा गतिर्भजनीया।

५ पुनरपि गतिविशेषप्रतिपत्त्यर्थमाह—

अविग्रहा जीवस्य ॥२७॥

विग्रहो व्याघातः कौटिल्यमित्यर्थः। स यस्यां न विद्यतेऽसावविग्रहा गतिः। कस्य? जीवस्य। कीदृशस्य? मुक्तस्य। कथं गम्यते मुक्तस्येति? उत्तरसूत्रे संसारिग्रहणादिह मुक्तस्येति विज्ञायते। ननु च 'अनुश्रेणि गतिः, इत्यनेनैव श्रेण्यन्तरसंक्रमाभावो १० व्याख्यातः। नार्थोऽनेन? पूर्वसूत्रे विश्रेणिगतिरपि क्वचिदस्तीति ज्ञापनार्थमिदं

समाधान—यहाँ कालनियम और देशनियम जानना चाहिये। कालनियम यथा—मरणके समय जब जीव एक भवको छोड़कर दूसरे भवके लिये गमन करते हैं और मुक्त जीव जब ऊर्ध्व गमन करते हैं तब उनकी गति अनुश्रेणि ही होती है। देशनियम यथा—जबकोई जीव ऊर्ध्वलोकसे अधोलोकके प्रति या अधोलोकसे ऊर्ध्वलोकके प्रति आता जाता है। इसी प्रकार तिर्यग्लोकसे अधोलोकके प्रति या १५ ऊर्ध्वलोकके प्रति जाता है तब उस अवस्थामें गति अनुश्रेणि ही होती है। इसी प्रकार पुद्गलोंकी जो लोकके अन्तको प्राप्त करानेवाली गति होती है वह अनुश्रेणि ही होती है। हाँ, इसके अतिरिक्त जो गति होती है वह अनुश्रेणि भी होती है और विश्रेणि भी। किसी एकप्रकारकी होनेका कोई नियम नहीं है।

अब फिर भी गति विशेषका ज्ञान करानेके लिये आगेका सूत्र कहते हैं—

मुक्त जीवकी गति विग्रहरहित होती है ॥ २७ ॥

२० विग्रहका अर्थ व्याघात या कुटिलता है। जिस गतिमें विग्रह अर्थात् कुटिलता नहीं होती वह विग्रहरहित गति है।

शंका—यह किसके होती है?

समाधान—जीवके।

शंका—किस प्रकारके जीवके?

२५ समाधान—मुक्त जीवके।

शंका—यह किस प्रमाणसे जाना जाता है कि मुक्तजीवके विग्रहरहित गति होती है?

समाधान—अगले सूत्रमें संसारी पदका ग्रहण किया है इससे ज्ञात होता है कि इस सूत्रमें मुक्त जीवके विग्रहरहित गति ली गई है।

शंका—'अनुश्रेणि गतिः' इस सूत्रसे ही यह ज्ञात हो जाता है कि एक श्रेणिसे दूसरी श्रेणिमें संक्रमण ३० नहीं होता फिर इस सूत्रके लिखनेसे क्या प्रयोजन है?

वचनम् । ननु तत्रैव देशकालनियम उक्तः ? न; अतस्तत्सिद्धेः ।

यद्यसङ्गस्यात्मनोऽप्रतिबन्धेन गतिरालोकान्तादवधृ[1]तकाला प्रतिज्ञायते, सदेहस्य पुनर्गतिः किं प्रतिबन्धिनी उत मुक्तात्मवदित्यत आह—

विग्रहवती च संसारिणः प्राक् चतुर्भ्यः ॥२८॥

कालावधारणार्थं 'प्राक्चतुर्भ्यः' इत्युच्यते। 'प्राग्' इति वचनं मर्यादार्थम्, चतुर्थात्समयात्प्राग्विग्रहवती गतिर्भवति न चतुर्थे इति। कुत इति चेत् ? सर्वोत्कृष्टविग्रहनिमित्तनिष्कुटक्षेत्रे उत्पित्सु. प्राणी निष्कुटक्षेत्रानुपूर्व्यनुश्रेण्यभावादिषुगत्यभावे निष्कुटक्षेत्रप्रापणनिमित्तां त्रिविग्रहां गतिमारभते नोर्ध्वाम्, तथाविधोपपादक्षेत्राभावात्। 'च' शब्दः समुच्चयार्थः। विग्रहवती चाविग्रहा[2] चेति।

समाधान—पूर्व सूत्रमें कहीपर विश्रेणिगति भी होती है इस बातका ज्ञान करानेके लिये यह सूत्र रचा है।

शंका—पूर्वसूत्रकी टीकामें ही देशनियम और कालनियम कहा है ?

समाधान—नही, क्योकि उसकी सिद्धि इस सूत्रसे होती है।

मुक्तात्माकी लोकपर्यन्त गति बिना प्रतिबन्धके नियत समयके भीतर होती है यदि ऐसा आपका निश्चय है तो अब यह बतलाइये कि सदेह आत्माकी गति क्या प्रतिबन्धके साथ होती है या मुक्तात्माके समान बिना प्रतिबन्धके होती है, इसी बातका ज्ञान करानेके लिये आगेका सूत्र कहते है—

संसारी जीवकी गति विग्रहरहित और विग्रहवाली होती है। उसमें विग्रहवाली गति चार समय से पहले तीन समय तक होती है ॥ २८ ॥

कालका अवधारण करनेके लिये 'प्राक्चतुर्भ्यः' पद दिया है। 'प्राक्' पद मर्यादा निश्चित करनेके लिये दिया है। चार समयसे पहले मोड़ेवाली गति होती है चौथे समयमे नही यह इसका तात्पर्य है।

शंका—मोड़ेवाली गति चार समयसे पूर्व अर्थात् तीन समय तक ही क्यों होती है चौथे समयमे क्यों नही होती ?

समाधान—निष्कुट क्षेत्रमे उत्पन्न होनेवाले जीवको सबसे अधिक मोड़े लेने पड़ते है, क्योकि वहाँ आनुपूर्वीसे अनुश्रेणिका अभाव होनेसे इषुगति नही हो पाती। अतः यह जीव निष्कुट क्षेत्रको प्राप्त करनेके लिये तीन मोड़ेवाली गतिका आरम्भ करता है। यहाँ इससे अधिक मोड़ोकी आवश्यकता नही पड़ती, क्योकि इस प्रकारका कोई उपपादक्षेत्र नही पाया जाता, अत. मोड़ेवाली गति तीन समय तक ही होती है, चौथे समयमें नही होती।

'च' शब्द समुच्चय के लिये दिया है। जिससे विग्रहवाली और विग्रहरहित दोनों गतियोंका समुच्चय होता है।

(१)—न्तादवगतकाला मु०। (२) चाविग्रहवती चेति मु०।

विग्रहवत्या गतेः कालोऽवधृतः। अविग्रहायाः कियान् काल इत्युच्यते—

एकसमयाऽविग्रहा ।।२९।।

एकः समयो य[1]स्याः सा एकसमया। न विद्यते विग्रहो[2] यस्याः सा अविग्रहा। गतिमतां हि जीवपुद्गलानामव्याघातेनैकसमयिकी गतिरालोकान्तादपीति।

५ अनादिकर्मबन्धसन्ततौ मिथ्यादर्शनादिप्रत्ययवशात्कर्माण्याददानो विग्रहगताव्प्याहारकः प्रसक्तस्ततो नियमार्थमिदमुच्यते—

एकं द्वौ त्रीन्वाऽनाहारकः ।।३०।।

अधिकारात्समयाभिसम्बन्धः। 'वा'शब्दो विकल्पार्थः। विकल्पश्च यथेच्छातिसर्गः। एकं वा द्वौ वा त्रीन्वा स[3]मयाननाहारको भवतीत्यर्थः। त्रयाणां शरीराणां षण्णां १० पर्याप्तीनां योग्यपुद्गलग्रहणमाहारः। तदभावादनाहारकः। कर्मादानं हि निरन्तरं कार्मणशरीरसद्भावे। उपपादक्षेत्रं प्रति ऋज्व्यां गतौ आहारकः। इतरेषु त्रिषु समयेषु अनाहारकः ।।

विग्रहवाली गतिका काल मालूम पड़ा। अब विग्रहरहित गतिका कितना काल है इस बातका ज्ञान करानेके लिये आगेका सूत्र कहते हैं:—

१५ **एक समयवाली गति विग्रहरहित होती है ।। २९ ।।**

जिस गतिमें एक समय लगता है वह एक समयवाली गति है। जिस गतिमें विग्रह अर्थात् मोड़ा नहीं लेना पड़ता वह मोड़ारहित गति है। गमन करनेवाले जीव और पुद्गलोंके व्याघातके अभावमे एक समयवाली गति लोकपर्यन्त भी होती है यह इस सूत्रका तात्पर्य है।

कर्मबन्धकी परंपरा अनादिकालीन है अत. मिथ्यादर्शन आदि बन्ध कारणोंके वशसे कर्मोको २० ग्रहण करनेवाला जीव विग्रहगतिमें भी आहारक प्राप्त होता है, अतः नियम करनेके लिये आगेका सूत्र कहते है—

एक, दो या तीन समय तक जीव अनाहारक रहता है ।। ३० ।।

समयका अधिकार होनेसे यहाँ उसका सम्बन्ध होता है। 'वा' पदका अर्थ विकल्प है और विकल्प जहाँ तक अभिप्रेत है वहाँ तक लिया जाता है। जीव एक समय तक, दो समय तक या तीन समयतक २५ अनाहारक होता है यह इससूत्रका अभिप्राय है। तीन शरीर और छहपर्याप्तियोंके योग्य पुद्गलोंके ग्रहण करनेको आहार करते हैं। जिन जीवोंके इस प्रकारका आहार नहीं होता वे अनाहारक कहलाते हैं। किन्तु कार्मण शरीरके सद्भावमें कर्मके ग्रहण करनेमें अन्तर नहीं पड़ता। जब यह जीव उपपादक्षेत्रके प्रति ऋजुगतिमें रहता है तब आहारक होता है। बाकीके तीन समयोंमें अनाहारक होता है।

---

(१) समयोऽस्याः एक-आ०, दि० १। समयोऽस्याः सा एक-दि० २, ता०, ना०। (२)-ग्रहोऽस्याः अवि-आ०, दि०१, ता०, ना०। (३) 'कालाध्वनोरत्यन्तसंयोगे।'-पा० २, ३, ५।

एवं गच्छतोऽभिनवमूर्त्यन्तरनिर्वृत्ति[1]प्रकारप्रतिपादनार्थमाह—

सम्मूर्च्छनगर्भोपपादा जन्म ॥३१॥

त्रिषु लोकेषूर्ध्वमधस्तिर्यक् च देहस्य समन्ततो मूर्च्छनं सम्मूर्च्छनमवयवप्रकल्पनम्। स्त्रिया उदरे शु[2]क्रशोणितयोर्गरणं मिश्रणं गर्भः। मातु[3]पभुक्ताहारगरणाद्वा गर्भः। उपेत्य[4] पद्यतेऽस्मिन्निति उपपादः। देवनारकोत्पत्तिस्थानविशेषसञ्ज्ञा। एते त्रयः ५ संसारिणां जीवानां जन्मप्रकाराः शुभाशुभपरिणामनिमित्तकर्मभेदविपाककृताः।

अथाधिकृतस्य संसारविषयोपभोगोपलब्ध्य[5]धिष्ठानप्रवणस्य जन्मनो योनिविकल्पा[6] वक्तव्या इत्यत आह—

सचित्तशीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः ॥३२॥

आत्मनश्चैतन्यविशेषपरिणामश्चित्तम्। सह चित्तेन वर्तत इति सचित्तः। १० शीत इति स्पर्शविशेषः, शुक्लादिवदुभयवचनत्वात्तद्युक्तं द्रव्यमप्याह। [7]सम्यग्वृतः संवृतः।

इस प्रकार अन्य गतिको गमन करनेवाले जीवके नूतन दूसरे पर्यायकी उत्पत्तिके भेदोको दिखलानेके लिये आगेका सूत्र कहते है—

सम्मूर्छन, गर्भ और उपपाद ये (तीन) जन्म हैं ॥ ३१ ॥

तीनो लोकोंमे ऊपर, नीचे और तिरछे देहका चारो ओरसे मूर्च्छन अर्थात् ग्रहण होना समूर्च्छन १५ है। इसका अभिप्राय है चारो ओरसे पुद्गलोको ग्रहण कर अवयवोकी रचना होना। स्त्रीके उदरमे शुक्र और शोणितके परस्पर गरण अर्थात् मिश्रणको गर्भ कहते है। अथवा माताके द्वारा उपभुक्त आहारके गरण होनेको गर्भ कहते है। प्राप्त होकर जिसमे जीव हलन-चलन करता है उसे उपपाद कहते है। उपपाद यह देव और नारकियोंके उत्पत्तिस्थान विशेषकी सज्ञा है। ससारी जीवोंके ये तीनों जन्मके भेद है, जो शुभ और अशुभ परिणामोके निमित्तसे अनेक प्रकारके कर्म बॅधते है, उनके २० फल है।

यहॉतक संसारी विषयोके उपभोगकी प्राप्तिमे आधारभूत जन्मोका अधिकार था। अब इनकी योनियोके भेद कहने चाहिये, इसलिये आगेका सूत्र कहते हैं—

सचित्त, शीत और संवृत तथा इनकी प्रतिपक्षभूत अचित्त उष्ण और विवृत तथा मिश्र अर्थात् सचित्ताचित्त, शीतोष्ण और संवृतविवृत ये उसकी अर्थात् जन्मकी योनियाँ हैं ॥३२॥ २५

आत्माके चैतन्यविशेषरूप परिणामको चित्त कहते है। जो उसके साथ रहता है वह सचित्त कहलाता है। शीत यह स्पर्शका एक भेद है। शुक्ल आदिके समान यह द्रव्य और गुण दोनोंका वाची है अतः शीतगुणवाला द्रव्य भी शीत कहलाता है। जो भले प्रकार ढका हो वह सवृत कहलाता है।

---

(१)–निर्वृत्तिजन्मप्रका-मु०। (२) शुक्लशोणित-ता०, ना०, दि०१, मु०। (३) मात्रोपभुक्त-मु०। मात्रोपयुक्तदि०१, दि०२ (४) उपेत्योत्पद्य-मु०। (५)-लब्ध्याधिष्ठा–आ०, दि०१, दि०२। (६)-कल्पो वक्तव्य. आ०, ता०, ना०। ता०, ना०। (७) सम्यग्वृतः संवृत इति आ० दि०१, दि०२।

संवृत इति दुरुपलक्ष्यप्रदेश उच्यते । सह इतरैर्वर्तन्त इति सेतराः । सप्रतिपक्षा इत्यर्थः । के पुनरितरे ? अचित्तोष्णविवृताः । उभयात्मको मिश्रः । सचित्ताचित्तः शीतोष्णः संवृत-विवृत इति । 'च'शब्दः समुच्चयार्थः मिश्राश्च योनयो भवन्तीति । इतरथा हि पूर्वोक्तानामेव विशेषणं स्यात् । 'एकशः' इति वीप्सार्थः । तस्य ग्रहणं क्रममिश्रप्रतिपत्त्यर्थम् । यथैवं
५ विज्ञायेत—सचित्तश्च अचित्तश्च, शीतश्च उष्णश्च, संवृतश्च विवृतश्चेति । मैवं विज्ञायि—सचित्तश्च शीतश्चेत्यादि । 'तद्ग्रहणं जन्मप्रकारप्रतिनिर्देशार्थम् । तेषां सम्मूर्च्छनादीनां जन्मनां योनय इति । त एते नव योनयो वेदितव्याः । योनिजन्मनोरविशेष इति चेत् ? न; आधाराधेयभेदात्तद्भेदः । त एते सचित्तादयो योनय आधाराः । आधेया जन्मप्रकाराः । यतः सचित्तादियोन्यधिष्ठाने आत्मा सम्मूर्च्छनादिना जन्मना शरीराहारेन्द्रियादियोग्या-
१० न्पुद्गलानुपादत्ते । देवनारका अचित्तयोनयः । तेषां हि योनिरुपपाददेशपुद्गलप्रचयोऽ-चित्तः । गर्भजा मिश्रयोनयः । तेषां हि मातुरुदरे शुक्रशोणितमचित्तम्, तदात्मना चित्तवता मिश्रणान्मिश्र[1]योनिः । सम्मूर्च्छनजास्त्रिविकल्पयोनयः । केचित्सचित्तयोनयः ।

यहाँ संवृत ऐसे स्थानको कहते हैं जो देखनेमें न आवे । इतरका अर्थ अन्य है और इनके साथ रहनेवाले सेतर कहे जाते हैं ।

१५ शंका—वे इतर कौन हैं ?

समाधान—अचित्त, उष्ण और विवृत ।

जो उभयरूप होते हैं वे मिश्र कहलाते हैं । यथा—सचित्ताचित्त, शीतोष्ण और संवृतविवृत । सूत्रमें 'च' शब्द समुच्चयवाची है । जिससे 'योनियाँ मिश्र भी होती हैं' इसका समुच्चय हो जाता है । यदि 'च' पदका यह अर्थ न लिया जाय तो मिश्रपद पूर्वोक्त पदोंका ही विशेषण हो जाता । 'एकशः'
२० यह पद वीप्सावाची है । सूत्रमें इस पदका ग्रहण क्रम और मिश्रका ज्ञान करानेके लिये किया है । जिससे यह ज्ञान हो कि सचित्त, अचित्त, शीत, उष्ण, संवृत, विवृत इस क्रमसे योनियाँ ली हैं । यह ज्ञान न हो कि सचित्त, शीत इत्यादि क्रमसे योनियाँ ली हैं । जन्मके भेदोंके दिखलानेके लिये सूत्रमें 'तत्' पदका ग्रहण किया है । उन संमूर्च्छन आदि जन्मोंकी ये नौ योनियाँ हैं यह इसका भाव है ।

शंका—योनि और जन्ममें कोई भेद नहीं ?

२५ समाधान—नहीं, क्योंकि आधार और आधेयके भेदसे उनमें भेद है । ये सचित्त आदिक योनियाँ आधार हैं और जन्मके भेद आधेय हैं, क्योंकि सचित्त आदि योनिरूप आधारमें संमूर्च्छन आदि जन्मके द्वारा आत्मा शरीर, आहार और इन्द्रियोंके योग्य पुद्गलोंको ग्रहण करता है ।

देव और नारकियोंकी अचित्त योनि होती है, क्योंकि उनके उपपाददेशके पुद्गलप्रचयरूप योनि अचित्त है । गर्भजोंकी मिश्र योनि होती है; क्योंकि उनकी माताके उदरमें शुक्र और शोणित अचित्त
३० होते हैं जिनका सचित्त माताकी आत्मासे मिश्रण है इसलिये वह मिश्रयोनि है । संमूर्च्छनोंकी तीन

---

(१)–मिश्रं मिश्रयोनिः आ०, दि०१, दि०२ ।

अन्ये अचित्तयोनय । अपरे मिश्रयोनयः । सचित्तयोनय. साधारणशरीराः । कुतः ? परस्पराश्रयत्वात् । इतरे अचित्तयोनयो मिश्रयोनयश्च । शीतोष्णयोनयो देवनारका. । तेषां हि उपपादस्थानानि कानिचिच्छीतानि कानिचिदुष्णानीति । उष्णयोनयस्तैजस्कायिका. । इतरे त्रिविकल्पयोनयः । केचिच्छीतयोनय । केचिदुष्णयोनयः । अपरे मिश्रयोनय इति । देवनारकैकेन्द्रिया. सवृतयोनय. । विकलेन्द्रिया विवृतयोनय । गर्भजा ५ मिश्रयोनय । तद्भेदाश्चतुरशीतिशतसहस्रसख्या आगमतो वेदितव्या. । उक्तं च[1]––

'णिच्चिदरधादु सत्त य तरु दस विर्यालंदिएसु छच्चेव ।
सुरणिरयतिरिय चउरो चोद्दस मणुए सदसहस्सा[1] ॥'

एवमेतस्मिन्नवयोनिभेदसङ्कटे त्रिविधजन्मनि सर्वप्राणभृतामनियमेन प्रसक्ते तदवधारणार्थमाह–– १०

जरायुजाण्डजपोतानां गर्भः ॥३३॥

यज्जालवत्प्राणिपरिवरणं विततमांसशोणितं तज्जरायु । यन्नखत्वक्सदृशमु-

---

प्रकारकी योनियाँ होती है। किन्हीकी सचित्त योनि होती है, किन्हीकी अचित्तयोनि होती है और किन्हीकी मिश्रयोनि होती है। साधारण शरीरवाले जीवोंकी सचित्त योनि होती है क्योकि ये एक दूसरेके आश्रयसे रहते है। इनसे अतिरिक्त शेष समूर्च्छन जीवोके अचित्त और मिश्र दोनो प्रकारकी १५ योनियाँ होती है। देव और नारकियोकी शीत और उष्ण दोनो प्रकारकी योनियाँ होती है, क्योकि इनके कुछ उपपादस्थान शीत है और कुछ उष्ण। तजस्कायिक जीवोकी उष्णयोनि होती है। इनसे अतिरिक्त जीवोकी योनियाँ तीन प्रकारकी होती है। किन्हीकी शीत योनियाँ होती है, किन्हीकी उष्णयोनियाँ होती है और किन्हीकी मिश्रयोनियाँ होती है। देव, नारकी और एकेन्द्रियोकी संवृत योनियाँ होती है। विकलेन्द्रियोकी विवृत योनियाँ होती है। तथा गर्भजोकी मिश्र योनियाँ होती हैं। २० इन सब योनियोके चौरासी लाख भेद है यह बात आगमसे जाननी चाहिये। कहा भी है––

'नित्यनिगोद, इतरनिगोद, पृथिवीकायिक, जलकायिक, अग्निकायिक और वायुकायिक जीवोकी सात सात लाख योनियाँ है। वृक्षोंकी दस लाख योनियाँ है। विकलेन्द्रियोंकी मिलाकर छह लाख योनियाँ है। देव, नारकी और तिर्यञ्चोकी चार चार लाख योनियाँ है तथा मनुष्योकी चौदह लाख योनियाँ है।' २५

इस प्रकार नौ योनियोंसे युक्त तीन जन्म सब जीवोके अनियमसे प्राप्त हुए अतः निश्चय करनेके लिये आगेका सूत्र कहते है––

जरायुज, अण्डज और पोत जीवोंका गर्भजन्म होता है ॥ ३३ ॥

जो जालके समान प्राणियोका आवरण है और जो मांस और शोणितसे बना है उसे जरायु कहते

---

(१) मूलाचा० गा० । गो० जी० गा० ।

पात्तकाठिन्यं शुक्रशोणितपरिवरणं परिमण्डलं तदण्डम्। किञ्चित्परिवरणमन्तरेण परिपूर्णावयवो योनिनिर्गतमात्र एव परिस्पन्दादिसामर्थ्योपेतः पोतः। जरायौ जाता जरायुजाः। अण्डे जाता अण्डजाः। जरायुजाश्च अण्डजाश्च पोताश्च जरायु-जाण्डजपोता गर्भयोनयः।

५ यद्यमीषां जरायुजाण्डजपोतानां गर्भोऽवध्रियते, अथोपपादः केषां भवतीत्यत आह—

देवनारकाणामुपपादः ॥३४॥

देवानां नारकाणां चोपपादो जन्म वेदितव्यम्।

अथान्येषां कि जन्मेत्यत आह—

१० **शेषाणां सम्मूर्च्छनम् ॥३५॥**

गर्भजेभ्य औपपादिकेभ्यश्चान्ये शेषाः। सम्मूर्छनं जन्मेति। एते त्रयोऽपि योगा नियमार्थाः। उभयतो नियमश्च द्रष्टव्यः। जरायुजाण्डजपोतानामेव गर्भः। गर्भ एव च जरायुजाण्डजपोतानाम्। देवनारकाणामेवोपपादः। उपपाद एव च देवनारकाणाम्। शेषाणामेव सम्मूर्च्छनम्। संमूर्च्छनमेव शेषाणामिति।

---

१५ है। जो नखकी त्वचाके समान कठिन है, गोल है और जिसका आवरण शुक्र और शोणितसे बना है उसे अण्ड कहते है। जिसके सब अवयव बिना आवरणके पूरे हुए है और जो योनिसे निकलते ही हलन-चलन आदि सामर्थ्यसे युक्त है उसे पोत कहते है। इनमें जो जरसे पैदा होते हैं वे जरायुज कहलाते हैं। जो अण्डोंसे पैदा होते है वे अण्डज कहलाते है। सूत्रमें जरायुज, अण्डज और पोत इनका द्वन्द्व समास है। ये सब गर्भकी योनियाँ हैं।

२० यदि इन जरायुज, अण्डज और पोत जीवोंका गर्भ जन्म निर्णीत होता है तो अब यह बतलाइये कि उपपाद जन्म किन जीवोंके होता है, अतः इस बातका ज्ञान करानेके लिये आगेका सूत्र कहते हैं—

देव और नारकियोंका उपपाद जन्म होता है ॥ ३४ ॥

इनसे अतिरिक्त अन्य जीवोंके कौनसा जन्म होता है। अब इस बातका ज्ञान करानेके लिये आगेका सूत्र कहते है—

२५ **शेष सब जीवोंका सम्मूर्छन जन्म होता है ॥ ३५ ॥**

इस सूत्रमें 'शेष' पदसे वे जीव लिये गये हैं जो गर्भ और उपपाद जन्मसे नहीं पैदा होते। इनके संमूर्च्छन जन्म होता है। ये तीनों ही सूत्र नियम करते हैं। और यह नियम दोनों ओरसे जानना चाहिये। यथा—गर्भ जन्म जरायुज, अण्डज और पोत जीवोंका ही होता है। या जरायुज, अण्डज और पोतजीवोंके गर्भजन्म ही होता है। उपपाद जन्म देव और नारकियोंके ही होता है या देव और ३० नारकियोंके उपपाद जन्म ही होता है। संमूर्च्छन जन्म शेष जीवोंके ही होता है या शेष जीवोंके संमूर्च्छन जन्म ही होता है।

तेषां पुनः संसारिणां त्रिविधजन्मनामाहितबहुविकल्पनवयोनिभेदानां शुभाशुभ-नामकर्मविपाकनिर्वर्तितानि बन्धफलानुभवनाधिष्ठानानि शरीराणि कानीत्यत आह—

औदारिकवैक्रियिकाहारकतैजसकार्मणानि शरीराणि ॥३६॥

विशिष्टनामकर्मोदयापादितवृत्तीनि शीर्यन्त इति शरीराणि[1]। औदारिकादि-प्रकृतिविशेषोदयप्राप्तवृत्तीनि औदारिकादीनि। उदार स्थूलम्। उदारे[2] भवं उदारं ५ प्रयोजनमस्येति वा औदारिकम्। अष्टगुणैश्वर्ययोगादेकानेकाणुमहच्छरीरविविधकरणं विक्रिया, सा प्रयोजनमस्येति वैक्रियिकम्। सूक्ष्मपदार्थनिर्ज्ञानार्थमसयमपरिजिहीर्षया वा प्रमत्तसंयतेनाह्रियते निर्वर्त्यते तदित्याहारकम्। यत्तेजोनिमित्त तेजसि वा भवं तत्तैज-सम्। कर्मणां कार्यं कार्मणम्। सर्वेषां कर्मनिमित्तत्त्वेऽपि रूढिवशाद्विशिष्टविषये वृत्ति-रवसेया। १०

यथौदारिकस्येन्द्रियैरुपलब्धिस्तथेतरेषा कस्मान्न भवतीत्यत आह—

परम्परं सूक्ष्मम् ॥३७॥

'पर'शब्दस्यानेकार्थवृत्तित्वेऽपि विवक्षातो व्यवस्थार्थगतिः। पृथग्भूतानां शरी-

---

जो तीन जन्मोसे पैदा होते है और जिनके अपने अवान्तर भेदोसे युक्त नौ योनियाँ है उन ससारी जीवोके शुभ और अशुभ नामकर्मके उदयसे निष्पन्न हुए और बन्धफलके अनुभव करानमे आधारभूत १५ शरीर कितने है। अब इसी बातको दिखलानेके लिये आगेका सूत्र कहत है—

औदारिक, वैक्रियिक, आहारक, तैजस और कार्मण ये पांच शरीर हैं ॥ ३६ ॥

जो विशेष नाम कर्मके उदयसे प्राप्त होकर शीर्यन्ते अर्थात् गलते है वे शरीर है। इसके औदा-रिक आदि पॉच भेद है। ये औदारिक आदि प्रकृति विशेषके उदयसे होते है। उदार और थूल ये एकार्थवाची शब्द है। उदार शब्दसे होनेरूप अर्थमे या प्रयोजनरूप अर्थमे ठक् प्रत्यय होकर औदा- २० रिक शब्द बनता है। अणिमा आदि आठ गुणोके ऐश्वर्यके सम्बन्धसे एक 'अनेक, छोटा, बड़ा आदि नाना प्रकारका शरीर करना विक्रिया है। यह विक्रिया जिस शरीरका प्रयोजन है वह वैक्रियिक शरीर है। सूक्ष्म पदार्थका ज्ञान करनेके लिये या असयमको दूर करनेकी इच्छासे प्रमत्तसंयत जिस शरीरकी रचना करता है वह आहारक शरीर है। जो दीप्तिका कारण है या तेजमे उत्पन्न होता है उसे तैजस शरीर कहते है। कर्मोका कार्य कार्मण शरीर है। यद्यपि सब शरीर २५ कर्मके निमित्तसे होते है तो भी रूढिसे विशिष्ट शरीरको कार्मण शरीर कहा है।

जिस प्रकार इन्द्रियाँ औदारिक शरीरको जानती है उस प्रकार इतर शरीरोको क्यो नही जानती? अब इस बातको दिखलानेके लिये आगेका सूत्र कहते है—

आगे आगेका शरीर सूक्ष्म है ॥ ३७ ॥ ३०

पर शब्दके अनेक अर्थ है तो भी यहाँ विवक्षासे व्यवस्थारूप अर्थका ज्ञान होता है। यद्यपि शरीर

---

(१)–'चेष्टेन्द्रियार्थाश्रयः शरीरम्।' न्या० सू० १, १, ११। (२) उदारे भवमौदारिकम्। उदार मु०।

राणां सूक्ष्मगुणेन वीप्सानिर्देशः क्रियते परम्परमिति । औदारिकं स्थूलम्, ततः सूक्ष्मं वैक्रियिकम्, ततः सूक्ष्मं आहारकम्, ततः सूक्ष्मं तैजसम्, तैजसात्कार्मणं सूक्ष्ममिति ।

यदि परम्परं सूक्ष्मम्, प्रदेशतोऽपि न्यूनं परम्परं हीनमिति विपरीतप्रतिपत्तिनिवृत्त्यर्थमाह—

५ **प्रदेशतोऽसंख्येयगुणं प्राक्तैजसात् ॥३८॥**

प्रदिश्यन्त इति प्रदेशाः परमाणवः । संख्यामतीतोऽसंख्येयः । असंख्येयो गुणोऽस्य तदिदमसंख्येयगुणम् । कुतः ? प्रदेशतः[1] । नावगाहतः । परम्परमित्यनुवृत्तेरा कार्मणात्प्रसङ्गे तन्निवृत्त्यर्थमाह प्राक्तैजसादिति । औदारिकादसंख्येयगुणप्रदेशं वैक्रियिकम् । वैक्रियिकादसंख्येयगुणप्रदेशमाहारकमिति । को गुणकारः ? पल्योपमासंख्येयभागः ।

१० यद्येवं, परम्परं महापरिमाणं प्राप्नोति[2] ? नैवम्; बन्धविशेषात्परिमाणभेदाभावस्तूलनिचयायःपिण्डवत् ।

अलग अलग है तो भी उनमें सूक्ष्म गुणका अन्वय है यह दिखलानेके लिये 'परम्परम्' इस प्रकार वीप्सा निर्देश किया है । औदारिक शरीर स्थूल है । इससे वैक्रियिक शरीर सूक्ष्म है । इससे आहारक शरीर सूक्ष्म है । इससे तैजस शरीर सूक्ष्म है और इससे कार्मण शरीर सूक्ष्म है ।

१५ यदि ये शरीर उत्तरोत्तर सूक्ष्म है तो प्रदेशोंकी अपेक्षा भी उत्तरोत्तर हीन होंगे । इस प्रकार विपरीत ज्ञानका निराकरण करनेके लिये आगेका सूत्र कहते है—

तैजससे पूर्व तीन शरीरोंमें आगे आगेका शरीर प्रदेशों की अपेक्षा असंख्यातगुणा है ॥ ३८॥

प्रदेश शब्दकी व्युत्पत्ति 'प्रदिश्यन्ते' होती है । इसका अर्थ परमाणु है । संख्यातीतको असंख्येय कहते हैं । जिसका गुणकार असंख्यात है वह असंख्येयगुणा कहलाता है ।

२० शंका—किसकी अपेक्षा ?

समाधान—प्रदेशोंकी अपेक्षा, अवगाहनकी अपेक्षा नही ।

पूर्व सूत्रमें 'परम्परम्' इस पदकी अनुवृत्ति होकर असंख्येयगुणत्वका प्रसंग कार्मण शरीरतक प्राप्त होता है अतः उसकी निवृत्तिके लिये सूत्रमें 'प्राक् तैजसात्' पद रखा है । अर्थात् तैजस शरीरसे पूर्ववर्ती शरीरतक ये शरीर उत्तरोत्तर असंख्यातगुणे हैं । औदारिक शरीरसे वैक्रियिक शरीर असंख्यात गुणे

२५ प्रदेशवाला है ।

शंका—गुणकारका प्रमाण क्या है ?

समाधान—पल्यका असंख्यातवाँ भाग ।

शंका—यदि ऐसा है तो उत्तरोत्तर एक शरीरसे दूसरा शरीर महापरिमाणवाला प्राप्त होता है ?

समाधान—यह कोई दोष नहीं है, क्योंकि, बन्धविशेषके कारण परिमाणमें भेद नहीं होता ।

३० जैसे रूईका ढेर और लोहेका गोला ।

---

(१) प्रदेशतः । परस्पर-ता०, ना० । (२) प्राप्नोति । बन्ध- ता० ।

अथोत्तरयो: कि समप्रदेशत्वमुतास्ति कश्चिद्विशेष इत्यत आह---

अनन्तगुणे परे ।।३९।।

प्रदेशत इत्यनुवर्तते, तेनैवमभिसम्बन्ध क्रियते---आहारकात्तैजस प्रदेशतोऽनन्तगुणम, तैजसात्कार्मण प्रदेशतोऽनन्तगुणमिति। को गुणकार ? अभव्यानामनन्तगुण सिद्धानामनन्तभाग[1] । ५

तत्रैतत्स्याच्छल्यकवन्मूर्तिमद्द्रव्योपचितत्वात्ससारिणो जीवस्याभिप्रेतगतिनिरोधप्रसङ्ग इति ? तन्न; कि कारणम् ? यस्मादुभे अप्येते---

अप्रतीघाते ।।४०।।

मूर्तिमतो मूर्त्यन्तरेण व्याघात प्रतीघात । स नास्त्यनयोरित्यप्रतीघाते, सूक्ष्मपरिणामात्[2]। अय पिण्डे तेजोऽनुप्रवेशवत्तैजसकार्मणयोर्नास्ति वज्रपटलादिषु व्याघात. । १० ननु च वैक्रियिकाहारकयोरपि नास्ति प्रतीघात. ? सर्वत्राप्रतीघातोऽत्र विवक्षित । यथा

आगेके दो शरीरोके प्रदेश क्या समान है या उनमे भी कुछ भेद है। इस बातको बतलानेके लिये आगेका सूत्र कहते है---

परवर्ती दो शरीर प्रदेशोंकी अपेक्षा उत्तरोत्तर अनन्तगुणे हैं ।। ३९ ।।

पूर्व सूत्रसे 'प्रदेशत' इस पदकी अनुवृत्ति होती है। जिससे इस प्रकार सम्बन्ध करना चाहिये कि १५ आहारक शरीरसे तैजस शरीरके प्रदेश अनन्तगुणे है और तैजस शरीरसे कार्मण शरीरके प्रदेश अनन्तगुणे है।

शका---गुणकार क्या है ?

समाधान---अभव्योसे अनन्तगुणा और सिद्धोका अनन्तवाँ भाग गुणकार है।

शका---जिस प्रकार कील आदिके लग जानेसे कोई भी प्राणी इच्छित स्थानको नही जा सकता २० उसी प्रकार मूर्तीक द्रव्यसे उपचित होनेके कारण ससारी जीवकी इच्छित गतिके निरोधका प्रसग प्राप्त होता है ?

समाधान---यह कोई दोष नही है क्योकि ये दोनो शरीर---

प्रतीघातरहित हैं ।। ४० ।।

एक मूर्तीक पदार्थका दूसरे मूर्तीक पदार्थके द्वारा जो व्याघात होता है उसे प्रतीघात कहते है। २५ इन दोनो शरीरोका इस प्रकारका प्रतीघात नही होता इसलिये ये प्रतीघात रहित है। जिस प्रकार सूक्ष्म होनेसे अग्नि लोहेके गोलेमे प्रवेश कर जाती है उसी प्रकार तैजस और कार्मण शरीरका वज्रपटलादिकमे भी व्याघात नही होता।

शका---वैक्रियिक और आहारक शरीरका भी प्रतीघात नही होता फिर यहाँ तैजस और कार्मण शरीरको ही अप्रतीघात क्यो कहा ? ३०

---

(१)-मनन्तो भागः ता०, ना०। (२)-परिमाणात् मु०।

तेजसकार्मणयोरा लोकान्तात् सर्वत्र नास्ति प्रतीघात, न तथा वैक्रियिकाहारकयोः ।

आह किमेतावानेव विशेष उत कश्चिदन्योऽप्यस्तीत्याह––

अनादिसम्बन्धे च ।।४१।।

'च'शब्दो विकल्पार्थः । अनादिसम्बन्धे सादिसम्बन्धे चेति । कार्यकारणभाव-
५ सन्तत्या अनादिसम्बन्धे, विशेषापेक्षया सादिसम्बन्धे[1] च बीजवृक्षवत् । यथौदारिक-वैक्रियिकाहारकाणि जीवस्य कादाचित्कानि, न तथा तैजसकार्मणे । नित्यसम्बन्धिनी हि ते आ संसारक्षयात् ।

त एते तैजसकार्मणे किं कस्यचिदेव भवत उताविशेषेणेत्यत आह––

सर्वस्य ।।४२।।

१० 'सर्व'शब्दो निरवशेषवाची । निरवशेषस्य संसारिणो जीवस्य ते द्वे अपि शरीरे भवत इत्यर्थः ।

अविशेषाभिधानात्तैरौदारिकादिभिः सर्वस्य संसारिणो यौगपद्येन सम्बन्धप्रसङ्गे सम्भविशरीरप्रदर्शनार्थमिदमुच्यते––

समाधान––इस सूत्रमें सर्वत्र प्रतीघातका अभाव विवक्षित है। जिस प्रकार तैजस और कार्मण
१५ शरीरका लोक पर्यन्त सर्वत्र प्रतीघात नही होता वह बात वैक्रियिक और आहारक शरीरकी नही है।

इन दोनों शरीरोंमें क्या इतनी ही विशेषता है या और भी कोई विशेषता है। इसी बातको बतलानेके लिये अब आगेका सूत्र कहते हैं––

आत्माके साथ अनादि सम्बन्धवाले हैं ।। ४१ ।।

सूत्रमे 'च' शब्द विकल्पको सूचित करनेके लिये दिया है। जिससे यह अर्थ हुआ कि तैजस और
२० कार्मण शरीरका अनादि सम्बन्ध है और सादि सम्बन्ध भी है। कार्यकारणभावकी परंपराकी अपेक्षा अनादि सम्बन्ध है और विशेषकी अपेक्षा सादि सम्बन्ध है। यथा बीज और वृक्ष। जिस प्रकार औदारिक, वैक्रियिक और आहारक शरीर जीवके कदाचित् होते हैं उस प्रकार तैजस और कार्मण शरीर नही हैं। संसारका क्षय होनेतक उनका जीवके साथ सदा सम्बन्ध है।

ये तैजस और कार्मण शरीर क्या किसी जीवके ही होते है या सामान्यरूपसे सबके होते है। इसी
२५ बातका ज्ञान करानेके लिये आगेका सूत्र कहते हैं––

तथा सब संसारी जीवोंके होते हैं ।। ४२ ।।

यहाँ 'सर्व' शब्द निरवशेषवाची है। वे दोनों सब संसारी जीवोंके शरीर होते है यह इस सूत्रका तात्पर्य है।

सामान्य कथन करनेसे उन औदारिकादि शरीरोंके साथ सब संसारी जीवोंका एक साथ सम्बन्ध
३० प्राप्त होता है अतः एक साथ कितने शरीर सम्भव हैं इसबातको दिखलानेके लिये आगेका सूत्र कहते है––

---

(१)-सम्बन्धेऽपि च मु० ।

तदादीनि भाज्यानि युगपदेकस्या चतुर्भ्यः ॥४३॥

'तत्' शब्दः प्रकृततैजसकार्मणप्रतिनिर्देशार्थ.। ते तैजसकार्मणे आदिर्येषां तानि तदादीनि। भाज्यानि विकल्प्यानि। आ कुतः ? आ चतुर्भ्यः। युगपदेकस्यात्मन.। कस्यचिद् द्वे तैजसकार्मणे। अपरस्य त्रीणि औदारिकतैजसकार्मणानि वैक्रियिकतैजसकार्मणानि वा। अन्यस्य चत्वारि औदारिकाहारकतैजसकार्मणानीति विभाग क्रियते। ५

पुनरपि तेषां विशेषप्रतिपत्त्यर्थमाह---

निरुपभोगमन्त्यम् ॥ ४४ ॥

अन्ते भवमन्त्यम्। कि तत् ? कार्मणम्। इन्द्रियप्रणालिकया शब्दादीनामुप-

एक साथ एक जीवके तैजस और कार्मणसे लेकर चार शरीर तक विकल्प से होते हैं ॥४३॥

सूत्रमे प्रकरणप्राप्त तैजस और कार्मण शरीरका निर्देश करनेके लिये 'तत्' शब्द दिया है। १० तदादि शब्दका समासलभ्य अर्थ है---तैजस और कार्मण शरीर जिनके आदिमे हैं वे। भाज्य और विकल्प्य ये पर्यायवाची नाम है। तात्पर्य यह है कि एक साथ एक आत्माके पूर्वोक्त दो शरीरसे लेकर चार शरीर तक विकल्पसे होते है। किसीके तैजस और कार्मण ये दो शरीर होते है। अन्यके औदारिक तैजस और कार्मण या वैक्रियिक, तैजस और कार्मण ये तीन शरीर होते है। किसी दूसरेके औदारिक आहारक, तैजस और कार्मण ये चार शरीर होते हैं। इस प्रकार यह विभाग यहाँ किया गया है। १५

विशेषार्थ---आगे ४७वे सूत्रमे तपोविशेषके बलसे वैक्रियिक शरीरकी उत्पत्तिका निर्देश किया है इसलिये प्रश्न होता है कि किसी ऋद्धिधारी साधुके एक साथ पाँच शरीरका सद्भाव माननेमे क्या हानि है ? समाधान यह है कि एक साथ वैक्रियिक और आहारक ऋद्धिकी प्रवृत्ति नही होती इसलिये एक तो एक साथ आहारक शरीरके साथ वैक्रियिक शरीरका अवस्थान नही बन सकता। दूसरे तपोविशेषसे जो विक्रिया प्राप्त होती है वह औदारिक शरीर सम्बन्धी ही विक्रिया है। उसे २० स्वतन्त्र वैक्रियिक शरीर मानना उचित नही है। कर्मसाहित्यमे वैक्रियिक शरीर नामकर्मके उदयसे जो शरीर प्राप्त होता है उसकी परिगणना ही वैक्रियिक शरीरमे की गई है। इसलिये अधिकारी भेद होनेसे औदारिक और आहारक शरीरके साथ वैक्रियिक शरीर नही बन सकता। यही कारण है कि एक साथ अधिकसे अधिक चार शरीर बतलाये है।

फिर भी उन शरीरोका विशेष ज्ञान करानेके लिये आगेका सूत्र कहते है--- २५

अन्तिम शरीर उपभोगरहित है ॥ ४४ ॥

जो अन्तमे होता है वह अन्त्य कहलाता है।

शका---अन्तका शरीर कौन है ?

समाधान---कार्मण।

---

(१)-देकस्मिन्ना च-म०।

लब्धिरुपभोगः । तदभावान्निरुपभोगम् । विग्रहगतौ सत्यामपि इन्द्रियलब्धौ द्रव्येन्द्रियनिर्वृत्त्यभावाच्छब्दाद्युपभोगाभाव इति । ननु तैजसमपि निरुपभोगम् । तत्र किमुच्यते निरुपभोगमन्त्यमिति ? तैजसं शरीरं योगनिमित्तमपि न भवति, ततोऽस्योपभोगविचारेऽनधिकारः ।[1]

५ एवं तत्रोक्तलक्षणेषु जन्मसु अमूनि शरीराणि प्रादुर्भावमापद्यमानानि किमविशेषेण भवन्ति, उत कश्चिदस्ति प्रतिविशेष इत्यत आह—

गर्भसम्मूर्च्छनजमाद्यम् ॥ ४५ ॥

इन्द्रियरूपी नलियोके द्वारा शब्दादिके ग्रहण करनेको उपभोग कहते हैं। यह बात अन्तके शरीरमें नहीं पाई जाती, अतः वह निरुपभोग है। विग्रहगतिमें लब्धिरूप भावेन्द्रियके रहते हुए भी वहाँ १० द्रव्येन्द्रियकी रचना न होनेसे शब्दादिकका उपभोग नही होता।

शंका—तैजस शरीर भी निरुपभोग है इसलिये वहाँ यह क्यो कहते हो कि अन्तका शरीर निरुपभोग है ?

समाधान—तैजस शरीर योगमें निमित्त भी नही होता, इसलिये इसका उपभोगके विचारमें अधिकार नहीं है।

१५ विशेषार्थ—औदारिक, वैक्रियिक और आहारक इन तीन शरीरोमें इन्द्रियोंकी रचना होकर उन द्वारा अपने अपने विषयोंका ग्रहण होता है इसलिए ये तीनों शरीर सोपभोग माने गये हैं। यद्यपि कार्मण काययोग केवली जिनके प्रतर और लोकपूरण समुद्घातके समय तथा विग्रहगतिमें होता है। पर इनमेंसे प्रतर और लोकपूरण समुद्घातके समय केवलज्ञान होनेसे वहाँ उपभोगका प्रश्न ही नही उठता। मात्र विग्रहगतिमें कार्मण काययोगके रहते हुए उपभोग होता है या नही यह प्रश्न होता है और इसी प्रश्नका २० उत्तर देनेके लिये 'निरुपभोगमन्त्यम्' यह सूत्र रचा गया है। अन्तका शरीर उपभोगरहित क्यों है इस बातका खुलासा करते हुए बतलाया है कि विग्रहगतिमे भावेन्द्रियाँ तो होती हैं पर द्रव्येन्द्रियाँ नहीं होती इसलिये यहाँ शब्दादि विषयोंका ग्रहण नहीं होता। यही कारण है कि अन्तके शरीरको निरुपभोग कहा है। रहा तैजस शरीर सो अन्य चार शरीरोके समान इसका स्वतन्त्र अधिकार नही है। अनि:सृत तैजस शरीर सब संसारी जीवोंके सदा होता है और निःसृत तैजस शरीर कादाचित्क होता है। इस २५ प्रकार तैजस शरीर पाया तो जाता है सब संसारी जीवोंके, पर आत्मप्रदेश परिस्पंदमें यह शरीर कारण नहीं है इसलिये इन्द्रियों द्वारा विषयोंके ग्रहण करनेमें इस शरीरको उपयोगी नही माना गया है। यही कारण है कि तैजस शरीर निरुपभोग है कि सोपभोग यह प्रश्न ही नहीं उठता।

इस प्रकार पूर्वोक्त लक्षणवाले इन जन्मोंमें क्या सामान्यसे सब शरीर उत्पन्न होते हैं या इसमें कुछ विशेषता है। इस बातको बतलानेके लिये अब आगेका सूत्र कहते है—

३० **पहला शरीर गर्भ और सम्मूर्छन जन्मसे पैदा होता है ॥ ४५ ॥**

---

(१)-नधिकारः । तत्रोक्त-ता०, ना०।

सूत्रक्रमापेक्षया आदौ भवमाद्यम् । औदारिकमित्यर्थः । यद् गर्भजं यच्च सम्मूर्च्छनजं तत्सर्वमौदारिकं द्रष्टव्यम् ।

तदनन्तरं यन्निर्दिष्टं तत्कस्मिन् जन्मनीत्यत आह—

औपपादिकं वैक्रियिकम् ॥ ४६ ॥

उपपादे भवमौपपादिकम् । तत्सर्वं वैक्रियिकं वेदितव्यम् । ५

यद्यौपपादिकं वैक्रियिकम्, अनौपपादिकस्य वैक्रियिकत्वाभाव इत्यत आह—

लब्धिप्रत्ययं च ॥ ४७ ॥

'च'शब्देन वैक्रियिकमभिसम्बध्यते । तपोविशेषादृद्धिप्राप्तिर्लब्धिः । लब्धिः प्रत्ययः कारणमस्य लब्धिप्रत्ययम् । वैक्रियिकं लब्धिप्रत्ययं च भवतीत्यभिसम्बध्यते ।

किमेतदेव लब्ध्यपेक्षमुतान्यदप्यस्तीत्यत आह— १०

तैजसमपि ॥ ४८ ॥

'अपि'शब्देन लब्धिप्रत्ययमभिसम्बध्यते । तैजसमपि लब्धिप्रत्ययं भवतीति ।

सूत्रमें जिस क्रमसे निर्देश किया है तदनुसार यहाँ आद्यपदसे औदारिक शरीरका ग्रहण करना चाहिये। जो शरीर गर्भजन्मसे और सम्मूर्च्छन जन्मसे उत्पन्न होता है वह सब औदारिक शरीर है यह इस सूत्रका तात्पर्य है। १५

इसके अनन्तर जिस शरीरका निर्देश किया है उसकी उत्पत्ति किस जन्मसे होती है अब इस बातका ज्ञान करानेके लिये आगेका सूत्र कहते हैं—

वैक्रियिक शरीर उपपाद जन्मसे पैदा होता है ॥ ४६ ॥

जो उपपादमें होता है उसे औपपादिक कहते हैं। इस प्रकार उपपाद जन्मसे पैदा होनेवाले शरीरको वैक्रियिक जानना चाहिये। २०

यदि जो शरीर उपपाद जन्मसे पैदा होता है वह वैक्रियिक है तो जो शरीर उपपाद जन्मसे नहीं पैदा होता उसमें वैक्रियिकपना नहीं बन सकता। अब इसी बातका स्पष्टीकरण करनेके लिये आगेका सूत्र कहते हैं—

तथा लब्धिसे भी पैदा होता है ॥ ४७ ॥

सूत्रमें 'च' शब्द आया है। उससे वैक्रियिक शरीरका सम्बन्ध करना चाहिये। तपविशेषसे २५ प्राप्त होनेवाली ऋद्धिको लब्धि कहते हैं। इस प्रकारकी लब्धिसे जो शरीर उत्पन्न होता है वह लब्धिप्रत्यय कहलाता है। वैक्रियिक शरीर लब्धिप्रत्यय भी होता है ऐसा यहाँ सम्बन्ध करना चाहिये।

क्या यही शरीर लब्धिकी अपेक्षासे होता है या दूसरा शरीर भी होता है। अब इसी बातका ज्ञान करानेके लिये आगेका सूत्र कहते हैं—

तैजस शरीर भी लब्धिसे पैदा होता है ॥ ४८ ॥ ३०

सूत्रमें 'अपि' शब्द आया है। उससे 'लब्धिप्रत्ययम्' पदका ग्रहण होता है। तैजस शरीर भी

वैक्रियिकानन्तरं यदुपदिष्टं तस्य स्वरूपनिर्धारणार्थं स्वामिनिर्देशार्थं चाह—

शुभं विशुद्धमव्याघाति चाहारकं प्रमत्तसंयतस्यैव ॥ ४९ ॥

शुभकारणत्वाच्छुभव्यपदेशः । शुभकर्मण आहारककाययोगस्य कारणत्वाच्छुभमित्युच्यते अन्नस्य प्राणव्यपदेशवत् । विशुद्धकार्यत्वाद्विशुद्धव्यपदेशः । विशुद्धस्य पुण्य[1]-
५ कर्मणः अशबलस्य निरवद्यस्य कार्यत्वाद्विशुद्धमित्युच्यते तन्तूनां कार्पासव्यपदेशवत् । उभयतो व्याघाताभावादव्याघाति । न ह्याहारकशरीरेणान्यस्य व्याघातः । नाप्यन्येनाहारकस्येति। तस्य प्रयोजनसमुच्चयार्थः 'च'शब्दः क्रियते। तद्यथा—कदाचिल्लब्धिविशेषसद्भावज्ञापनार्थं कदाचित्सूक्ष्मपदार्थनिर्द्धारणार्थं संयमपरिपालनार्थं च । आहारकमिति प्रागुक्तस्य प्रत्याम्नायः । यदाऽऽहारकशरीरं निर्वर्तयितुमारभते तदा
१० प्रमत्तो भवतीति'प्रमत्तसंयतस्य'इत्युच्यते । इष्टतोऽवधारणार्थं 'एव'कारोपादानम् । यथैवं विज्ञायेत प्रमत्तसंयतस्यैवाहारकं नान्यस्येति । मैवं विज्ञायि प्रमत्तसंयतस्याहारकमेवेति ।

लब्धिप्रत्यय होता है यह इस सूत्रका भाव है।

वैक्रियिक शरीरके पश्चात् जिस शरीरका उपदेश दिया है उसके स्वरूपका निश्चय करनेके लिये और उसके स्वामीका निर्देश करनेके लिये आगेका सूत्र कहते हैं—

१५ **आहारक शरीर शुभ, विशुद्ध और व्याघात रहित है और वह प्रमत्तसंयतके ही होता है ॥४९॥**

शुभकर्मका कारण होनेसे इसे शुभ कहा है। यह शरीर आहारक काययोग रूप शुभकर्मका कारण है, इसलिये आहारक शरीर शुभ कहलाता है। यहाँ कारणमें कार्यका उपचार है। जैसे अन्नमें प्राणका उपचार करके अन्नको प्राण कहते हैं। विशुद्ध कर्मका कार्य होनेसे आहारक शरीरको विशुद्ध कहा है। तात्पर्य यह है कि जो चित्र विचित्र न होकर निर्दोष है ऐसे विशुद्ध अर्थात् पुण्यकर्मका
२० कार्यहोनसे आहारक शरीरको भी विशुद्ध कहते हैं। यहाँ कार्यमे कारणका उपचार है। जैसे तन्तुओंमे कपासका उपचार करके तन्तुओंको कपास कहते हैं। दोनों ओरसे व्याघात नही होता इसलिये यह अव्याघाती है। तात्पर्य यह है कि आहारक शरीरसे अन्य पदार्थका व्याघात नही होता और अन्य पदार्थसे आहारक शरीरका व्याघात नहीं होता। आहारक शरीरके प्रयोजनका समुच्चय करनेके लिये सूत्रमे 'च' शब्द दिया है। यथा—आहारक शरीर कदाचित् लब्धि विशेषके सद्भावको जतानेके लिये,
२५ कदाचित् सूक्ष्म पदार्थका निश्चय करनेके लिये और संयमकी रक्षा करनेके लिये उत्पन्न होता है।

सूत्रमें 'आहारक' पद आया है उससे पूर्वमें कहे गये आहारक शरीरको दुहराया है। जिस समय जीव आहारक शरीरकी रचनाका आरम्भ करता है उस समय वह प्रमत्त हो जाता है इसलिये सूत्रमें प्रमत्तसंयतके ही आहारक शरीर होता है यह कहा है। इष्ट अर्थके निश्चय करनेके लिये सूत्रमें 'एवकार' पदको ग्रहण किया है। जिससे यह जाना जाय कि आहारक शरीर प्रमत्तसंयतके ही होता है अन्यके
३० नहीं। किन्तु यह न जाना जाय कि प्रमत्तसंयतके आहारक ही होता है। तात्पर्य यह है कि प्रमत्तसं-

(१)–पुण्यस्य कर्मणः मु०।

मा भूदौदारिकादिनिवृत्तिरिति।

एव विभक्तानि शरीराणि बिभ्रतां ससारिणा प्रतिगति कि त्रिलिङ्गसन्निधानं उत लिङ्गनियम. कश्चिदस्तीत्यत आह—

नारकसम्मूर्च्छिनो नपुंसकानि ॥ ५० ॥

नरकाणि वक्ष्यन्ते। नरकेषु भवा नारका:। सम्मूर्छन सम्मूर्च्छ. स येषामस्ति[1] ते सम्मूर्च्छिन। नारकाश्च सम्मूर्छिनश्च नारकसम्मूर्छिन। चारित्रमोहविकल्पनोकषाय-भेदस्य नपुंसकवेदस्याशुभनाम्नश्चोदयान्न स्त्रियो न पुमांस इति नपुंसकानि भवन्ति। नारकसम्मूर्च्छिनो नपुंसकान्येवेति नियम। तत्र हि स्त्रीपुंसविषयमनोज्ञशब्दगन्धरूप-रसस्पर्शसम्बन्धनिमित्ता स्वल्पापि सुखमात्रा नास्ति।

यद्येवमवध्रियते, अर्थादापन्नमेतदुक्तेभ्योऽन्ये संसारिणस्त्रिलिङ्गा इति यत्रा-त्यन्त[2] नपुंसकलिङ्गस्याभावस्तत्प्रतिपादनार्थमाह—

न देवाः ॥ ५१ ॥

स्त्रैण पौंस्न च यन्निरतिशय[3]सुख शुभगतिनामोदयापेक्ष तद्देवा अनुभवन्तीति न तेषु नपुंसकानि[4] सन्ति।

यतके औदारिक आदि शरीरोका निराकरण न हो इसलिये प्रमत्तसयत पदके साथ ही एवकार पद लगाया है।

इस प्रकार इन शरीरोंको धारण करनेवाले ससारी जीवोके प्रत्येक गतिमे क्या तीनो लिग होते है या लिगका कोई स्वतन्त्र नियम है! अब इस बातका ज्ञान करानेके लिये आगेका सूत्र कहते है—

नारक और सम्मूर्छिन नपुंसक होते हैं ॥ ५० ॥

नरकोका कथन आगे करेगे। जो नरकोंमे उत्पन्न होते है वे नारकी कहलाते है। जो सम्मूर्च्छन जन्मसे पैदा होते है वे सम्मूर्छिन कहलाते है। सूत्रमे नारक और सम्मूर्च्छिन इन दोनो पदोंका द्वन्द्व-समास है। चारित्रमोहके दो भेद है—कषाय और नोकषाय। इनमेसे नोकषायके भेद नपुसकवेदके उदयसे और अशुभ नामकर्म के उदयसे उक्त जीव स्त्री और पुरुष न होकर नपुसक होते है। यहाँ ऐसा नियम जानना कि नारक और सम्मूर्च्छिन नपुसक ही होते है। इन जोवोंके मनोज्ञ शब्द, गन्ध, रूप, रस और स्पर्शके सम्बन्धसे उत्पन्न हुआ स्त्री-पुरुषविषयक थोडा भी सुख नही पाया जाता है।

यदि उक्त जीवोके नपुसकवेद निश्चित होता है तो यह अर्थात् सिद्ध है कि इनसे अतिरिक्त अन्य संसारी जीव तीन वेदवाले होते है। इसमे भी जिनके नपुसकवेदका अत्यन्त अभाव है उनका कथन करनेके लिये आगेका सूत्र कहते है—

देव नपुंसक नहीं होते ॥ ५१ ॥

शुभगति नामकर्मके उदयसे स्त्री और पुरुषसम्बन्धी जो निरतिशय सुख है उसका देव

---

(१)—मस्तीति सम्मू-मु०। (२)-त्यन्तनपु-आ०, दि०१ ।-त्यन्तिकनपुं-दि०२। (३)-शय सुख गति-मु०। (४) नपुसकलिङ्गानि सन्ति मु०।

अथेतरे कियल्लिङ्गा इत्यत आह—

शेषास्त्रिवेदाः ॥ ५२ ॥

त्रयो वेदा येषां ते त्रिवेदाः। के पुनस्ते वेदाः? स्त्रीत्वं पुंस्त्वं नपुंसकत्वमिति। कथं तेषां सिद्धिः? वेद्यत इति वेदः। लिङ्गमित्यर्थः। तद् द्विविधं द्रव्यलिङ्गं भाव-
५ लिङ्गं चेति। द्रव्यलिङ्गं योनिमेहनादि नामकर्मोदयनिर्वर्तितम्। नोकषायोदयापादितवृत्ति भावलिङ्गम्। स्त्रीवेदोदयात् स्यायस्त्यस्यां गर्भ इति स्त्री। पुंवेदोदयात् सूते जनयत्य-पत्यमिति पुमान्[1]। नपुँसकवेदोदयात्तदुभयशक्तिविकलं नपुँसकम्। रूढिशब्दाश्चैते। रूढि-षु च क्रिया व्युत्पत्त्यर्थैव। यथा गच्छतीति गौरिति। इतरथा हि गर्भधारणादिक्रिया-प्राधान्ये बालवृद्धानां तिर्यङ्मनुष्याणां देवानां कार्मणकाययोगस्थानां च तदभावात्स्त्री-
१० त्वादिव्यपदेशो न स्यात्। त एते त्रयो वेदाः शेषाणां गर्भजानां भवन्ति।

अनुभव करते हैं इसलिये उनमें नपुसक नही होते।

इनसे अतिरिक्त शेष जीव कितने लिगवाले होते है, इस बातके बतलानेके लिये आगेका सूत्र कहते हैं—

शेषके सब जीव तीन वेदवाले होते हैं॥ ५२॥

१५ जिनके तीन वेद होते है वे तीन वेदवाले कहे जाते है।

शंका—वे तीन वेद कौन है?

समाधान—स्त्रीवेद, पुरुषवेद और नपुसकवेद।

शंका—इसकी सिद्धि कैसे होती है?

समाधान—जो वेदा जाता है उसे वेद कहते है। इसीका दूसरा नाम लिंग है। इसके दो भेद हैं—
२० द्रव्यलिंग और भावलिंग। जो योनि मेहन आदि नामकर्मके उदयसे रचा जाता है वह द्रव्यलिंग है और जिसकी स्थिति नोकषायके उदयसे प्राप्त होती है वह भावलिंग है। स्त्रीवेदके उदयसे जिसमे गर्भ रहता है वह स्त्री है। पुवेदके उदयसे जो अपत्यको जनता है वह पुरुष है और नपुसकवेदके उदयसे जो उक्त दोनों प्रकारकी शक्तिसे रहित है वह नपुंसक है। वास्तवमें ये तीनों रौढ़िक शब्द हैं और रूढ़िमें क्रिया व्युत्पत्तिके लिये ही होती है। यथा जो गमन करती है वह गाय है। यदि ऐसा न माना
२५ जाय और इसका अर्थ गर्भधारण आदि क्रियाप्रधान लिया जाय तो बालक और वृद्धोंके, तिर्यञ्च और मनुष्योंके, देवोंके तथा कार्मणकाययोगमें स्थित जीवोंके गर्भधारण आदि क्रियाका अभाव होनेसे स्त्री आदि संज्ञा नही बन सकती है। ये तीनों वेद शेष जीवोंके अर्थात् गर्भजोंके होते है।

विशेषार्थ—इसी अध्यायमें औदयिक भावोंका निर्देश करते समय उनमें तीन लिंग भी गिनाये है। ये तीनों लिंग वेदके पर्यायवाची हैं जो वेदनोकषायके उदयसे होते है। यहाँ किन जीवोंके कौन
३० लिंग होता है इसका विचार हो रहा है। इसी प्रसंगसे आचार्य पूज्यपादने लिंगके दो भेद बतलाये हैं—

---

(१) पुमान्। तदुभय-आ०, दि०१, दि०२।

य इमे जन्मयोनिशरीरलिङ्गसम्बन्धाहितविशेषा: प्राणिनो निर्दिश्यन्ते देवा-दयो विचित्रधर्माधर्मवशीकृताश्चतसृषु गतिषु शरीराणि धारयन्तस्ते किं यथाकालमुप-भुक्तायुषो मूर्त्यन्तराण्यास्कन्दन्ति उतायथाकालमपीत्यत आह—

औपपादिकचरमोत्तमदेहासंख्येयवर्षायुषोऽनपवर्त्यायुषः ॥ ५३ ॥

औपपादिका व्याख्याता देवनारका इति । चरमशब्दोऽन्त्यवाची । उत्तम ५ उत्कृष्टः । चरम उत्तमो देहो येषां ते चरमोत्तमदेहा. । परीतसंसारास्तज्जन्मनिर्वा-णार्हा इत्यर्थ । असंख्येयमतीतसंख्यानमुपमाप्रमाणेन पल्यादिना गम्यमायुर्येषां त इमे असंख्येयवर्षायुषस्तिर्यङ् मनुष्या उत्तरकुर्वादिषु प्रसूताः । औपपादिकाश्च चरमोत्तम-देहाश्च असंख्येयवर्षायुषश्च औपपादिकचरमोत्तमदेहासंख्येयवर्षायुष । बाह्यस्योपघात-निमित्तस्य विषशस्त्रादे. सति सन्निधाने ह्रस्व भवतीत्यपवर्त्यम् । अपवर्त्यमायुर्येषां त १० इमे अपवर्त्यायुष' । न अपवर्त्यायुष. अनपवर्त्यायुष. । नह्येषामौपपादिकादीनां बाह्य-

द्रव्यलिंग और भावलिंग । प्रश्न यह है कि लिंगके ये दो भेद सूत्रोसे फलित होते हैं या विशेष जानकारीके लिये मात्र टीकाकारने इनका निर्देश किया है । उत्तर-स्पष्ट है कि मूल सूत्रोमे मात्र वेद नोकषायके उदयसे होनेवाले वेदोका ही निर्देश किया है जैसा कि इसी अध्याय के ६वे सूत्रसे ज्ञात होता है ।

जो ये देवादिक प्राणी जन्म, योनि, शरीर और लिंगके सम्बन्धसे अनेक प्रकारके बतलाये है वे १५ विचित्र पुण्य और पापके वशीभूत होकर चारो गतियोमे शरीरको धारण करते हुए यथाकाल आयुको भोगकर अन्य शरीरको धारण करते हैं या आयुको पूरा न करके भी अन्य शरीरको धारण करते हैं? अब इस बातका ज्ञान करानेके लिये आगेका सूत्र कहते है—

उपपादजन्मवाले, चरमोत्तमदेहवाले और असंख्यात वर्षकी आयुवाले जीव अनपवर्त्य २० आयुवाले होते हैं ॥ ५३ ॥

उपपादजन्मवाले देव और नारकी है यह व्याख्यान कर आये । चरम शब्द अन्त्यवाची है । उत्तम शब्दका अर्थ उत्कृष्ट है । जिनका शरीर चरम और उत्तम है वे चरमोत्तम देहवाले कहे जाते है । जिनका ससार निकट है अर्थात् उसी भवसे मोक्षको प्राप्त होनेवाले जीव चरमोत्तम देहवाले कहलाते है । असख्येय परिमाण विशेष है जो संख्यातसे परे है । तात्पर्य यह है कि पल्य आदि उपमा प्रमाणके द्वारा जिनकी आयु जानी जाती है वे उत्तरकुरु आदिमे उत्पन्न हुए तिर्यञ्च और २५ मनुष्य असख्यात वर्षकी आयुवाले कहलाते है । उपघातके निमित्त विष शस्त्रादिक बाह्य निमित्तों के मिलने पर जो आय घट जाती है वह अपवर्त्य आयु कहलाती है । इस प्रकार जिनकी आयु घट जाती ह वे अपवर्त्य आयुवाले कहलाते है और जिनकी आयु नही घटती वे अनपवर्त्य आयुवाले

(१) -देहा । विपरीत-मु० । (२) इत्यर्थ । अतीतसख्यान-ता० ना० ।

निमित्तवशादायुरपवर्त्यते इत्ययं नियमः। इतरेषामनियमः। चरमस्य देहस्योत्कृष्टत्वप्रदर्शनार्थमुत्तमग्रहणं नार्थान्तरविशेषोऽस्ति। चरमदेहा इति वा पाठः[1]।

इति तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसञ्ज्ञिकायां द्वितीयोऽध्यायः।

कहलाते हैं। इन औपपादिक आदि जीवोंकी आयु बाह्य निमित्तसे नहीं घटती यह नियम ५ है तथा इनसे अतिरिक्त शेष जीवोंका ऐसा कोई नियम नहीं है। सूत्रमें जो उत्तम विशेषण दिया है वह चरम शरीरके उत्कृष्टपनेको दिखलानेके लिये दिया है। यहां इसका और कोई विशेष अर्थ नहीं है। अथवा 'चरमोत्तमदेहा' पाठके स्थानमें 'चरमदेहा' यह पाठ भी मिलता है।

हैमवत क्षेत्रमें उत्पन्न हुए हैमवतक कहलाते हैं । यहां हैमवत शब्दसे 'वुञ्' प्रत्यय करके हैमवतक शब्द बना है जिससे मनुष्योंका ज्ञान होता है । इसी प्रकार आगेके ३० हारिवर्षक और दैवकुरुवक इन दो शब्दोंमें जान लेना चाहिये । हैमवतक आदि तीन हैं और एक आदि तीन हैं । यहां इनका क्रमसे सम्बन्ध करते हैं जिससे यह अर्थ हुआ कि हैमवत क्षेत्रके मनुष्योंकी स्थिति एक पल्यकी है । हरिवर्ष क्षेत्रके मनुष्योंकी स्थिति दो पल्यकी है और देवकुरुक्षेत्रके मनुष्योंकी स्थिति तीन पल्यकी है । ढाई द्वीपमें जो पांच हैमवत क्षेत्र हैं उनमें सदा सुषमदुष्षमा काल है । वहां

एकपल्योपमायुषो द्विधनु.सहस्रोच्छ्रिताश्चतुर्थभक्ताहारा नीलोत्पलवर्णाः। पञ्चसु हरिवर्षेषु सुषमा सदाऽवस्थिता। तत्र मनुष्या द्विपल्योपमायुषश्चतुश्चापसहस्रोत्सेधा षष्ठभक्ताहाराः शङ्खवर्णा। पञ्चसु देवकुरुषु सुषमसुषमा सदाऽवस्थिता। तत्र मनुष्यास्त्रिपल्योपमायुष षड्धनु.सहस्रोच्छ्राया अष्टमभक्ताहारा. कनकवर्णा।

अथोत्तरेषु काऽवस्थेत्यत आह— ५

तथोत्तराः.॥ ३० ॥

यथा दक्षिणा व्याख्यातास्तथैवोत्तरा वेदितव्या। हैरण्यवतका हैमवतकैस्तुल्याः। राम्यका हारिवर्षकैस्तुल्या.। देवकुरवकैरौत्तरकुरवकाः समाख्याता।

अथ विदेहेष्ववस्थितेषु का स्थितिरित्यत्रोच्यते—

विदेहेषु संख्येयकाला ॥३१॥ १०

सर्वेषु[1] विदेहेषु सख्येयकाला मनुष्याः। तत्र कालः [2]सुषमदुष्षमान्तोपम. सदाऽवस्थित। मनुष्याश्च पञ्चधनु शतोत्सेधाः। नित्याहाराः। उत्कर्षेणैकपूर्वकोटीस्थिति-

---

मनुष्योंकी आयु एक पल्यकी है, शरीरकी ऊंचाई दो हजार धनुष है, उनका आहार एक दिनके अन्तरालसे होता है और शरीरका रंग नील कमलके समान है। पांच हरिवर्ष नामके क्षेत्रोमे सदा सुषमा काल रहता है। वहां मनुष्योकी आयु दो पल्यकी है, शरीरकी ऊचाई चार हजार धनुष है, १५ उनका आहार दो दिनके अन्तरालसे होता है और शरीरका रग शंख के समान सफेद है। पांच देवकुरु नामके क्षेत्रमे सदा सुषमसुषमा काल है। वहां मनुष्योंकी आयु तीन पल्यकी है, शरीरकी ऊँचाई छह हजार धनुष है। उनका भोजन तीन दिनके अन्तरालसे होता है और शरीरका रंग सोनेके समान पीला है।

उत्तर दिशावर्ती क्षेत्रोंमे क्या अवस्था है इसके बतलानेके लिये अब आगेका सूत्र कहते है— २०

दक्षिणके समान उत्तरमें है ॥ ३० ॥

जिस प्रकार दक्षिणके क्षेत्रोका व्याख्यान किया उसी प्रकार उत्तरके क्षेत्रोका जानना चाहिये। हैरण्यवत क्षेत्रके मनुष्योकी सब बाते हैमवतके मनुष्योके समान है, रम्यक क्षेत्रके मनुष्योकी सब बाते हरिवर्ष क्षेत्रके मनुष्योके समान है और देवकुरु क्षेत्रके मनुष्योंकी सब बाते उत्तरकुरु क्षेत्रके मनुष्योके समान है। २५

पाच विदेहोमें क्या स्थिति है इसके बतलानेके लिये आगेका सूत्र कहते है—

विदेहोंमें संख्यात वर्षकी आयुवाले प्राणी हैं ॥ ३१ ॥

सब विदेहोंमें सख्यात वर्षकी आयुवाले मनुष्य होते है। वहा सुषमदुषमा कालके अन्तके समान काल सदा अवस्थित है। मनुष्योंके शरीरकी ऊंचाई पाचसौ धनुष होती है, वे प्रति दिन आहार करते है। उनकी उत्कृष्ट आयु एक पूर्वकोटि वर्षप्रमाण और जघन्य आयु अन्तर्मुहूर्तप्रमाण ३०

---

(१)–सर्वेषु पञ्चसु महाविदे-मु०। (२) कालः दुषमसुषमादि सदा ता०, ना०।

क्ाः । जघन्येनान्तर्मुहूर्तायुषः । तस्याश्च[1] सम्बन्धे गाथां पठन्ति--

"पुव्वस्स दु परिमाणं सदरिं खलु कोडिसदसहस्साइं ।
छप्पण्णं च सहस्सा बोद्धव्वा वासकोडीणं[2] ॥"

उक्तो भरतस्य विष्कम्भः । पुनः प्रकारान्तरेण तत्प्रतिपत्त्यर्थमाह--

५ **भरतस्य विष्कम्भो जम्बूद्वीपस्य नवतिशतभागः ॥ ३२ ॥**

जम्बूद्वीपविष्कम्भस्य योजनशतसहस्रस्य नवतिशतभागीकृतस्यैको भागो भरतस्य विष्कम्भः । स पूर्वोक्त एव । उक्तं जम्बूद्वीपं परिवृत्य वेदिका स्थिता, ततः परो लवणोदः समुद्रो द्वियोजनशतसहस्रवलयविष्कम्भः । ततः परो धातकीखण्डो द्वीपश्चतुर्योजनशतसहस्रवलयविष्कम्भः ।

१० तत्र वर्षादीनां संख्यादि[3]विधिप्रतिपत्त्यर्थमाह--

द्विर्धातकीखण्डे ॥ ३३ ॥

भरतादीनां द्रव्याणामिहाभ्यावृत्तिर्विवक्षिता । तत्र कथं सुच् ? अध्याह्रियमाणक्रियाभ्यावृत्तिद्योतनार्थः सुच् । यथा द्विस्तावानयं प्रासादो मीयत इति । एवं

है । इसके सम्बन्धमें एक गाथा कही जाती है--

१५ "एक पूर्वकोटिका प्रमाण सत्तर लाख करोड़ और छप्पन हजार करोड़ वर्ष जानना चाहिये ।"

भरत क्षेत्रका विस्तार पहले कह आये । अब प्रकारान्तरसे उसका ज्ञान करानेके लिये आगेका सूत्र कहते हैं--

भरत क्षेत्रका विस्तार जम्बूद्वीपका एकसौ नब्बेवां भाग है ॥३२॥

एक लाख योजन प्रमाण जम्बूद्वीपके विस्तारके एकसौ नब्बे भाग करनेपर जो एक भाग २० प्राप्त हो उतना भरत क्षेत्रका विस्तार है जो कि पूर्वोक्त पांचसौ छब्बीस सही छह बटे उन्नीस योजन होता है ।

जो पहले जम्बूद्वीप कह आये उसके चारों ओर एक वेदिका है । इसके बाद लवणसमुद्र है जिसका विस्तार दो लाख योजन है । इसके बाद धातकीखण्ड द्वीप है जिसका विस्तार चार लाख योजन है । अब इसमें क्षेत्र आदिकी संख्याका ज्ञान करानेके लिये आगेका सूत्र कहते हैं--

२५ **धातकीखण्डमें क्षेत्र तथा पर्वत आदि जम्बूद्वीपसे दूने हैं ॥३३॥**

भरत आदि क्षेत्रोंकी यहां आवृत्ति विवक्षित है ।

शंका--सूत्रमें 'सुच्' प्रत्यय किसलिये किया है ?

समाधान--वाक्य पूरा करनेके लिये जो क्रिया जोड़ी जाती है उसकी आवृत्ति बतलानेके लिये 'सुच्' प्रत्यय किया है । जैसे 'द्विस्तावान् अयं प्रासादः' यहाँ 'सुच्' प्रत्ययके रहनेसे वह दूना

---

(१) तस्यास्ति सम्बन्धे आ०, दि०१, दि०२ । (२)-डीणं ॥ ७०५६०००००००००० उक्तो मु०, ता०, ना० । (३) संख्याविधि-मु० ।

[1]द्विर्धातकीखण्डे भरतादयो मीयन्ते इति। तद्यथा—द्वाभ्यामिष्वाकारपर्वताभ्यां दक्षिणोत्तरायताभ्यां लवणोदकालोदवेदिकास्पृष्टकोटिभ्यां विभवतो धातकीखण्डः पूर्वापर इति। तत्र पूर्वस्य[2] अपरस्य च मध्ये द्वौ मन्दरौ। तयोरुभयतो भरतादीनि क्षेत्राणि हिमवदादयश्च वर्षधरपर्वता.। एवं द्वौ भरतौ द्वौ हिमवन्तौ इत्येवमादि सख्यानं द्विगुणं वेदितव्यम्। जम्बूद्वीपहिमवदादीनां वर्षधराणां यो विष्कम्भस्तद्द्विगुणो धातकीखण्डे हिमवदादीनां वर्षधराणाम्। वर्षधराश्चक्रारवदवस्थिताः। अरविवरसंस्थानानि क्षेत्राणि। जम्बूद्वीपे यत्र जम्बूवृक्ष. स्थित, तत्र धातकीखण्डे धातकीवृक्षः सपरिवारः। तद्योगाद्धातकीखण्ड इति द्वीपस्य नाम प्रतीतम्। तत्परिक्षेपी कालोदः समुद्र. टङ्कच्छिन्नतीर्थः अष्टयोजनशतसहस्रवलयविष्कम्भः। कालोदपरिक्षेपी पुष्करद्वीपः षोडशयोजनशतसहस्रवलयविष्कम्भः।

तत्र द्वीपाम्भोनिधिविष्कम्भद्विगुणपरिक्लृप्तिवद्धातकीखण्डवर्षादिद्विगुणवृद्धिप्रसङ्गे विशेषावधारणार्थमाह—

पुष्करार्द्धे च ॥ ३४ ॥

है यह अनुमान किया जाता है। इसी प्रकार धातकीखण्डमें 'सुच्'से भरतादिक दूने ज्ञात हो जाते है। यथा—अपने सिरेसे लवणोद और कालोदको स्पर्श करनेवाले और दक्षिणसे उत्तर तक लम्बे इष्वाकार नामक दो पर्वतोंसे विभक्त होकर धातकीखण्ड द्वीपके दो भाग हो जाते है—पूर्व धातकीखण्ड और पश्चिम धातकीखण्ड। इन पूर्व और पश्चिम दोनों खण्डोके मध्यमे दो मन्दर अर्थात् मेरु पर्वत है। इन दोनोंके दोनो ओर भरत आदि क्षेत्र और हिमवान् आदि पर्वत है। इस प्रकार दो भरत दो हिमवान् इत्यादि रूपसे जम्बूद्वीपसे धातकीखण्ड द्वीपमे दूनी संख्या जानना चाहिये। जम्बूद्वीपमे हिमवान आदि पर्वतोंका जो विस्तार है धातकीखण्ड द्वीपमे हिमवान आदि पर्वतोका उससे दूना विस्तार है। चकेमे जिस प्रकार आरे होते है उसी प्रकार ये पर्वत क्षेत्रोके मध्यमे अवस्थित है। और चकेमे छिद्रोका जो आकार होता है यहां क्षेत्रोका वही आकार है। जम्बूद्वीपमे जहा जम्बू वृक्ष स्थित है धातकीखण्ड द्वीपमे परिवार वृक्षोके साथ वहा धातकी वृक्ष स्थित है। और इसके सम्बन्धसे द्वीपका नाम धातकीखण्ड प्रसिद्ध है।

इसको घेरे हुए कालोद समुद्र है। जिसका घाट ऐसा मालूम देता है कि उसे टाकीसे काट दिया हो और जिसका विस्तार आठ लाख योजन है। कालोदको घेरे हुए पुष्करद्वीप है जिसका विस्तार सोलह लाख योजन है।

द्वीप और समुद्रोका उत्तरोत्तर जिस प्रकार दूना दूना विस्तार बतलाया है उसी प्रकार यहां धातकीखण्ड द्वीपके क्षेत्र आदि की सख्या दूनी प्राप्त होती है अत. विशेष निश्चय करनेके लिये आगेका सूत्र कहते है—

पुष्करार्धमें उतने ही हैं ॥ ३४ ॥

(१)–तकीषडे ता०, ना०, दि०१, दि०२, आ०। (२)–र्वस्य चापरस्य मध्ये मु०।

किम् ? द्विरित्यनुवर्तते। किमपेक्षा द्विरावृत्तिः ? जम्बूद्वीपभरतहिमवदाद्यपेक्षयैव[1]। कुतः ? व्याख्यानतः। यथा धातकीखण्डे हिमवदादीनां विष्कम्भस्तथा पुष्करार्धे हिमवदादीनां विष्कम्भो द्विगुण इति व्याख्यायते। नामानि तान्येव, इष्वाकारौ मन्दरौ च पूर्ववत्। यत्र[2] जम्बूवृक्षस्तत्र पुष्करं सपरिवारम्। तत एव तस्य[3] द्वीपस्य नाम रूढं ५ पुष्करद्वीप इति। अथ कथं पुष्करार्द्धसञ्ज्ञा ? मानुषोत्तरशैलेन विभक्तार्धत्वात्पुष्करार्धसञ्ज्ञा।

अत्राह किमर्थं जम्बूद्वीपहिमवदादिसंख्या द्विरावृत्ता पुष्करार्धे कथ्यते, न पुनः कृत्स्न एव पुष्करद्वीपे ? इत्यत्रोच्यते—

प्राङ् मानुषोत्तरान्मनुष्याः ॥ ३५ ॥

१० पुष्करद्वीपबहुमध्यदेशभागी वलयवृत्तो मानुषोत्तरो नाम शैलः। तस्मात्प्रागेव

यहां 'द्वि' इस पदकी अनुवृत्ति होती है।

शंका—'द्वि' इस पदकी किसकी अपेक्षा अनुवृत्ति होती है ?

समाधान—जम्बूद्वीपके भरत आदि क्षेत्र और हिमवान आदि पर्वतोंकी अपेक्षा 'द्विः' इस पदकी अनुवृत्ति होती है।

१५ शंका—यह कैसे समझा जाता है ?

समाधान—व्याख्यानसे।

जिस प्रकार धातकीखण्ड द्वीपमें हिमवान आदिका विस्तार कहा है उसी प्रकार पुष्करार्धमें हिमवान आदिका विस्तार दूना बतलाया है। नाम वे ही है। दो इष्वाकार और दो मन्दर पर्वत पहलेके समान जानना चाहिये। जहां पर जम्बूद्वीपमें जम्बू वृक्ष है पुष्कर द्वीपमें वहां २० अपने परिवार वृक्षोंके साथ पुष्करवृक्ष है। और इसीलिये इस द्वीपका पुष्करद्वीप यह नाम रूढ हुआ है।

शंका—इस द्वीपको पुष्करार्ध यह संज्ञा कैसे प्राप्त हुई ?

समाधान—इस द्वीपके मानुषोत्तर पर्वतके कारण दो विभाग हो गये हैं अतः आधे द्वीपको पुष्करार्ध यह संज्ञा प्राप्त हुई।

२५ यहां शंकाकारका कहना है कि जम्बूद्वीपमें हिमवान आदिकी जो संख्या है उससे हिमवान आदिकी दूनी संख्या आधे पुष्कर द्वीपमें क्यों कही जाती है पूरे पुष्करद्वीपमें क्यों नहीं कही जाती ? अब इस शंकाका समाधान करनेके लिये आगेका सूत्र कहते हैं—

मानुषोत्तर पर्वतके पहले तक ही मनुष्य हैं ॥३५॥

पुष्करद्वीपके ठीक मध्यमें चूड़ीके समान गोल मानुषोत्तर नामका पर्वत है। उसके पहले

---

(१)-पेक्षयैव। जम्बूद्वीपात्पुष्करार्धे द्वौ भरतौ द्वौ हिमवन्तौ इत्यादि। कुतः मु०, दि०१, दि०२, आ०। (२) यत्र जम्बूद्वीपे जम्बू-मु०, दि०, दि०२, आ०। (३) तस्य द्वीपस्यानुरूढं पुष्करद्वीप इति नाम। अथ मु०।

मनुष्या न बहिरिति । ततो न बहिः पूर्वोक्तक्षेत्रविभागोऽस्ति । नास्मादुत्तरं कदाचिदपि विद्याधरा ऋद्धिप्राप्ता अपि मनुष्या गच्छन्ति अन्यत्रोपपादसमुद्घाताभ्याम् । ततोऽस्यान्वर्थसञ्ज्ञा । एव जम्बूद्वीपादिष्वर्धतृतीयेषु[1] द्वीपेषु द्वयोश्च समुदयोर्मनुष्या वेदितव्याः । ते द्विविधाः—

आर्या म्लेच्छाश्च ॥ ३६ ॥　　５

गुणैर्गुणवद्भिर्वा अर्यन्त इत्यार्याः । ते द्विविधा ऋद्धिप्राप्तार्या अनृद्धिप्राप्तार्या-

---

पहले ही मनुष्य है, उसके बाहर नही । इसलिये मानुषोत्तर पर्वतके बाहर पूर्वोक्त क्षेत्रोका विभाग नही है । इस पर्वतके उस ओर उपपाद जन्मवाले और समुद्घातको प्राप्त हुए मनुष्योको छोड़ कर और दूसरे विद्याधर या ऋद्धिप्राप्त मुनि भी कदाचित् नही जाते है इसलिये इस पर्वतका मानुषोत्तर यह सार्थक नाम है। इस प्रकार जम्बूद्वीप आदि ढाई द्वीपोंमे और दो १० समुद्रोमे मनुष्य जानना चाहिये ।

विशेषार्थ—ढाई द्वीप और इनके मध्यमे आनेवाले दो समुद्र यह मनुष्यलोक है । मनुष्य इसी क्षेत्रमे पाये जाते है। मानुषोत्तर पर्वत मनुष्यलोककी सीमा पर स्थित होनेसे इसका मानुषोत्तर यह नाम सार्थक है। मनुष्य इसी क्षेत्रमे रहते है उनका बाहर जाना सम्भव नही, इसका यह अभिप्राय है कि गर्भमे आनेके बाद मरण पर्यन्त औदारिक शरीर या आहारक शरीरके साथ १५ वे इस क्षेत्रसे बाहर नही जा सकते । सम्मूर्च्छन मनुष्य तो इसके औदारिक शरीरके आश्रयसे होते है इसलिये उनका मनुष्यलोकके बाहर जाना कथमपि सम्भव नही है। पर इसका यह अर्थ नही है कि किसी भी अवस्थामे मनुष्य इस क्षेत्रके बाहर नही पाये जाते है । ऐसी तीन अवस्थाएँ है जिनके होने पर मनुष्य इस क्षेत्रके भी बाहर पाये जाते है, यथा—

(१) जो मनुष्य मर कर ढाई द्वीपके बाहर उत्पन्न होनेवाले है वे यदि मरणके पहले २० मारणान्तिक समुद्घात करते है तो इसके द्वारा उनका ढाई द्वीपके बाहर गमन देखा जाता है ।

(२) ढाई द्वीपके बाहर निवास करनेवाले जो जीव मर कर मनुष्योमे उत्पन्न होते है उनका मनुष्य गतिनाम कर्मका उदय होने पर भी ढाई द्वीपमे प्रवेश करनेके पूर्व तक इस क्षेत्रके बाहर अस्तित्व देखा जाता है ।

(३) केवलिसमुद्घातके समय उनका मनुष्य लोकके बाहर अस्तित्व देखा जाता है ।　　२५

इन तीन अपवादोंको छोड़कर और किसी अवस्थामे मनुष्योका मनुष्यलोकके बाहर अस्तित्व नही देखा जाता ।

वे मनुष्य दो प्रकारके है अब यह बतलानेके लिये आगेका सूत्र कहते है—

मनुष्य दो प्रकारके हैं—आर्य और म्लेच्छ ॥३६॥

जो गुणो या गुणवालोके द्वारा माने जाते है—वे आर्य कहलाते है। उनके दो भेद है—ऋद्धि ३०

---

(१)-तीयेषु द्वयोश्च मु० ।

श्चेति । अनृद्धिप्राप्तार्याः पञ्चविधाः-क्षेत्रार्या जात्यार्याः कर्मार्याश्चारित्रार्या दर्शनार्याश्चेति । ऋद्धिप्राप्तार्याः सप्तविधाः; बुद्धिविक्रियातपोबलौषधरसाक्षीणभेदात् ।

म्लेच्छा द्विविधाः-अन्तर्द्वीपजाः कर्मभूमिजाश्चेति । तत्रान्तर्द्वीपा लवणोदधेरभ्यन्तरे[1] पार्श्वेऽष्टासु दिक्ष्वष्टौ । तदन्तरेषु चाष्टौ । हिमवच्छिखरिणोरुभयोश्च विजयार्द्धयोरन्तेष्वष्टौ । तत्र दिक्षु द्वीपा वेदिकायास्तिर्यक् पञ्चयोजनशतानि प्रविश्य भवन्ति । विदिक्ष्वन्तरेषु च द्वीपाः पञ्चाशत्पञ्चयोजनशतेषु गतेषु भवन्ति । शैलान्तेषु द्वीपाः षट् योजनशतेषु गतेषु भवन्ति । दिक्षु द्वीपाः शतयोजनविस्ताराः । विदिक्ष्वन्तरेषु च द्वीपास्तदर्धविष्कम्भाः । शैलान्तेषु पञ्चविंशतियोजनविस्ताराः ।

तत्र पूर्वस्यां दिश्येकोरुकाः । अपरस्यां दिशि लाङ्गूलिनः । उत्तरस्यां[2] दिश्यभाषकाः । दक्षिणस्यां[3] दिशि विषाणिनः । शशकर्णशष्कुलीकर्णप्रावरण[4]कर्णलम्बकर्णाः विदिक्षु । अश्वसिंहश्वमहिषवराहव्याघ्रकाक[5]कपिमुखा अन्तरेषु । मेघ[6]मुखविद्युन्मुखाः

प्राप्त आर्य और ऋद्धिरहित आर्य । ऋद्धिरहित आर्य पांच प्रकारके है—क्षेत्रार्य, जात्यार्य, कर्मार्य, चारित्रार्य और दर्शनार्य । बुद्धि, विक्रिया, तप, बल, औषध, रस और अक्षीण ऋद्धिके भेदसे ऋद्धि प्राप्त आर्य सात प्रकारके है। म्लेच्छ दो प्रकारके हैं—अन्तर्द्वीपज म्लेच्छ और कर्मभूमिज म्लेच्छ ।

लवण समुद्रके भीतर आठों दिशाओंमें आठ अन्तर्द्वीप हैं और उनके अन्तरालमें आठ अन्तर्द्वीप और हैं । तथा हिमवान और शिखरी इन दोनों पर्वतोंके अन्तमें और दोनों विजयार्ध पर्वतोंके अन्तमें आठ अन्तर्द्वीप है। इसमेंसे जो दिशाओंमें द्वीप हैं वे वेदिकासे तिरछे पांचसौ योजन भीतर जाकर है। विदिशाओं और अन्तरालोंमें जो द्वीप हैं वे पांचसौ पचास योजन भीतर जाकर है । तथा पर्वतोंके अन्तमें जो द्वीप हैं वे छहसौ योजन भीतर जाकर हैं । दिशाओंमें स्थित द्वीपोंका विस्तार सौ योजन है। विदिशाओं और अन्तरालोंमें स्थित द्वीपोंका विस्तार उससे आधा अर्थात् पचास योजन है । तथा पर्वतोंके अन्तमें स्थित द्वीपोंका विस्तार पच्चीस योजन है ।

पूर्व दिशामें एक टांगवाले मनुष्य है । पश्चिम दिशामें पूंछवाले मनुष्य हैं । उत्तर दिशामें गूंगे मनुष्य है और दक्षिण दिशामे सींगवाले मनुष्य हैं। चारों विदिशाओंमें क्रमसे खरगोशके समान कानवाले, शष्कुली अर्थात् मछली अथवा पूड़ीके समान कानवाले, प्रावरणके समान कानवाले और लम्बे कानवाले मनुष्य हैं । आठों अन्तरालके द्वीपोंमें क्रमसे घोड़ेके समान मुखवाले, सिंहके समान मुखवाले, कुत्ताके समान मुखवाले, भैंसाके समान मुखवाले, सुअरके समान मुखवाले, व्याघ्रके समान मुखवाले, कौआके समान मुखवाले और बन्दरके समान मुखवाले मनुष्य हैं ।

---

(१) लवणोदे अष्टासु दिक्ष्वष्टौ आ०, दि० १, दि० २। लवणोदधेरभ्यन्तरेऽष्टासु दिक्ष्वष्टौ मु०। (२) उत्तरस्यामभाषकाः आ०, दि०१, दि०२। (३)-णस्यां विषा-आ०, दि०१, दि०२। (४)-वरणलम्ब मु०। (५) काकघूककपि-मु०। (६)-मेघविद्यु-मु०।

शिखरिण उभयोरन्तयोः । मत्स्यमुखकालमुखा हिमवत उभयोरन्तयोः । हस्तिमुखादर्शमुखाः उत्तरविजयार्धस्योभयोरन्तयो. । गोमुखमेषमुखा दक्षिणवि[1]जयार्धस्योभयोरन्तयोः । एकोरुका मृदाहारा गुहावासिनः । शेषाः पुष्पफलाहारा वृक्षवासिनः । सर्वे ते पल्योपमायुषः ।

ते चतुर्विंशति[2]रपि द्वीपा जलतलादेकयोजनोत्सेधा[3]ः । लवणोदधेर्बाह्यपार्श्वेऽप्येवं चतुर्विंशतिर्द्वीपा विज्ञातव्याः । तथा कालोदेऽपि वेदितव्या. । त एतेऽन्तर्द्वीपजा म्लेच्छाः । कर्मभूमिजाश्च शकयवनशवरपुलिन्दादयः । ५

काः पुनः कर्मभूमय इत्यत आह—

शिखरी पर्वतके दोनो कोणोंकी सीधमे जो अन्तर्द्वीप है उनमे मेघके समान मुखवाले और बिजलीके समान मुखवाले मनुष्य है । हिमवान पर्वतके दोनो कोणोंकी सीधमे जो अन्तर्द्वीप है उनमे मछलीके समान मुखवाले और कालके समान मुखवाले मनुष्य है । उत्तर विजयार्धके दोनो कोणोकी सीधमे जो अन्तर्द्वीप है उनमे हाथीके समान मुखवाले और दर्पणके समान मुखवाले मनुष्य है । तथा दक्षिण विजयार्धके दोनों कोणोकी सीधमें जो अन्तर्द्वीप है उनमे गायके समान मुखवाले और मेढाके समान मुखवाले मनुष्य है। इनमेसे एक टागवाले मनुष्य गुफाओंमे निवास करते है और मिट्टीका आहार करते है । तथा शेष मनुष्य फूलो और फलोका आहार करते है और पेड़ों पर रहते है । इन सबकी आयु एक पल्यप्रमाण है । ये चौबीसो अन्तर्द्वीप जलकी सतहसे एक योजन ऊचे है । इसी प्रकार कालोद समुद्रमे भी जानना चाहिये । ये सब अन्तर्द्वीपज म्लेच्छ है । इनसे अतिरिक्त जो शक, यवन, शवर और पुलिन्दादिक है वे सब कर्मभूमिज म्लेच्छ है । १० १५

विशेषार्थ—षट्खण्डागममे मनुष्योके दो भेद किये गये है—कर्मभूमिज और अकर्मभूमिज। अकर्मभूमि भोगभूमिका दूसरा नाम है । भोगभूमिका एक भेद कुभोगभूमि है । उसमे जन्म लेनेवाले मनुष्य ही यहा अन्तर्द्वीपज म्लेच्छ कहे गये है। शेष रहे शक, यवन, शवर और पुलिन्द आदि म्लेच्छ कर्मभूमिज म्लेच्छ है । इसी प्रकार आर्य भी क्षेत्रकी अपेक्षा दो भागोमे विभक्त है—कर्मभूमिज आर्य और अकर्मभूमिज आर्य । तीनो भोगभूमियोंके मनुष्य अकर्मभूमिज आर्य है और कर्मभूमिके आर्य कर्मभूमिज आर्य है। इनमेसे अकर्मभूमिज आर्य और म्लेच्छोके अविरत सम्यग्दृष्टि तक चार गुणस्थान हो सकते है किन्तु कर्मभूमिज आर्य और म्लेच्छ अणुव्रत और महाव्रतके भी अधिकारी है । इनके संयमासंयम और संयमस्थानोंका विशेष व्याख्यान लब्धिसार क्षपणासारमे किया है। २० २५

कर्मभूमियां कौन कौन है, अब इस बातके बतलानेके लिये आगेका सूत्र कहते है—

(१) दक्षिणदिग्विज-**मु०** । (२)-शतिद्वितीयपक्षेऽपि उभयोस्तत्प्रेष्टचत्वारिंशद्द्वीपा. जलतला-**दि० २** । (३)-त्सेधा. । तथा कालोदेऽपि **आ०, दि०१** ।

भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः ॥ ३७ ॥

भरता[1] ऐरावता विदेहाश्च पञ्च पञ्च, एताः कर्मभूमय इति व्यपदिश्यन्ते। तत्र 'विदेह'ग्रहणाद्देवकुरूत्तरकुरुग्रहणे प्रसक्ते तत्प्रतिषेधार्थमाह—'अन्यत्र देवकुरूत्तरकुरुभ्यः' इति। 'अन्यत्र' शब्दो वर्जनार्थः। देवकुरव उत्तरकुरवो हैमवतो हरिवर्षो[2] रम्यको हैरण्यवतोऽन्तर्द्वीपाश्च भोगभूमय इति व्यपदिश्यन्ते। अथ कथं कर्मभूमित्वम्? शुभाशुभलक्षणस्य कर्मणोऽधिष्ठानत्वात्। ननु सर्वं [3]लोकत्रितयं कर्मणोऽधिष्ठानमेव? तत एवं[4] प्रकर्षगतिर्विज्ञास्यते, प्रकर्षेण यत्कर्मणोऽधिष्ठानमिति। तत्राशुभकर्मणस्तावत्सप्तमनरकप्रापणस्य भरतादिष्वेवार्जनम्, शुभस्य[5] च सर्वार्थसिद्ध्यादि[6] स्थानविशेषप्रापणस्य[7] कर्मण उपार्जनं तत्रैव, कृष्यादिलक्षणस्य षड्विधस्य कर्मणः पात्रदानादिसहितस्य तत्रैवारम्भात्कर्मभूमिव्यपदेशो वेदितव्यः। इतरास्तु दशविधकल्पवृक्षकल्पितभोगानुभवनविषयत्वाद्भोगभूमय इति व्यपदिश्यन्ते।

देवकुरु औद उत्तरकुरुके सिवा भरत ऐरावत और विदेह ये सब कर्मभूमि हैं ॥३७॥

भरत, ऐरावत और विदेह ये प्रत्येक पांच पांच हैं। ये सब कर्मभूयिां क ी जाती हैं। इनमें विदेहका ग्रहण किया है इसलिये देवकुरु और उत्तरकुरुका भी ग्रहण प्राप्त होता है अतः उनका निषेध करनेके लिये 'अन्यत्र देवकुरूत्तरकुरुभ्यः' यह पद रखा है। अन्यत्र शब्दका अर्थ निषेध है। देवकुरु, उत्तरकुरु, हैमवत, हरिवर्ष, रम्यक, हैरण्यवत और अन्तर्द्वीप ये भोगभूमियां कही जाती हैं।

शंका—कर्मभूमि यह संज्ञा कैसे प्राप्त होती है ?

समाधान—जो शुभ और अशुभ कर्मोंका आश्रय हो उसे कर्मभूमि कहते हैं। यद्यपि तीनों लोक कर्मका आश्रय है फिर भी इससे उत्कृष्टताका ज्ञान होता है कि ये प्रकर्ष रूपसे कर्मका आश्रय हैं। सातवें नरकको प्राप्त करने वाले अशुभ कर्मका भरतादि क्षेत्रोंमें ही अर्जन किया जाता है इसी प्रकार सर्वार्थसिद्धि आदि स्थान विशेषको प्राप्त करानेवाले पुण्य कर्मका उपार्जन भी यहीं पर होता है। तथा पात्रदान आदिके साथ कृषि आदि छह प्रकारके कर्मका आरम्भ यहीं पर होता है इसलिये भरतादिक्को कर्मभूमि जानना चाहिये।

इतर क्षेत्रोंमें दस प्रकारके कल्पवृक्षोंसे प्राप्त हुए भोगोंके उपभोगकी मुख्यता है इसलिये वे भोगभूमियां कहलाती हैं।

विशेषार्थ—यह पहले ही बतला आये हैं कि भरतादि क्षेत्रोंका विभाग ढाई द्वीपमें ही है। जम्बूद्वीपमें भरतादि क्षेत्र एक-एक है और धातकीखण्ड व पुष्करार्धमे ये दो-दो हैं। इस प्रकार कुल क्षेत्र ३५ होते है। उसमें भी उत्तरकुरु और देवकुरु विदेह क्षेत्रमें होकर भी अलग गिने जाते है, क्योंकि

---

(१) भरतैरावतविदेहाश्च मु०, ता०, ना०। (२) हरिवंश रम्य-आ०, दि०१, दि०२। (३) सर्वो लोकत्रितयः कर्म-आ०, दि०१, दि०२। (४) एव प्रक-मु०। (५) शुभस्य सर्वा- मु०। (६) -द्ध्यादिषु स्थान- आ०, दि०१, दि०२। (७)-पणस्य पुण्यकर्म- मु०।

उक्तासु भूमिषु[1] मनुष्याणां स्थितिपरिच्छेदार्थमाह—

नृस्थिती परापरे त्रिपल्योपमान्तर्मुहूर्ते ॥ ३८ ॥

त्रीणि पल्योपमानि यस्याः सा त्रिपल्योपमा। अन्तर्गतो मुहूर्तो यस्याः सा अन्तर्मुहूर्ता। यथासंख्येनाभिसम्बन्धः। मनुष्याणां परा उत्कृष्टा स्थितिस्त्रिपल्योपमा। अपरा जघन्या अन्तर्मुहूर्ता। मध्ये अनेकविकल्पा। तत्र पल्यं त्रिविधम्—व्यवहारपल्यमुद्धारपल्यमद्धापल्यमिति। अन्वर्थसंज्ञा एताः। आद्यं व्यवहारपल्यमित्युच्यते; उत्तरपल्य[2]द्वयव्यवहारबीजत्वात्। नानेन किञ्चित्परिच्छेद्यमस्तीति। द्वितीयमुद्धारपल्यम्। तत उद्धृतैर्लोमकच्छेदैर्द्वीपसमुद्राः संख्यायन्त इति। तृतीयमद्धापल्यम्। अद्धा कालस्थितिरित्यर्थः। तत्राद्यस्य प्रमाणं कथ्यते[3], तत्परिच्छेदनार्थत्वात्। तद्यथा—प्रमाणाङ्गुलपरिमितयोजनविष्कम्भायामावगाहानि त्रीणि पल्यानि कुशूला इत्यर्थः। एकादिसप्तान्ताहोरात्रजाताविवालाग्राणि तावच्छिन्नानि यावद्द्वितीयं कर्तरिच्छेदं नावाप्नुवन्ति[4], तादृशैर्लोमच्छेदैः परिपूर्णं घनीकृतं[5] व्यवहारपल्यमित्युच्यते। ततो वर्षशते वर्षशते[6] गते

यहाँ उत्तम भोगभूमिकी व्यवस्था है, इसलिये पाँच विदेहोके पाँच देवकुरु और पाँच उत्तरकुरु इनको उक्त ३५ क्षेत्रोमे मिलानेपर कुल ४५ क्षेत्र होते है। इनमेंसे ५ भरत, ५ विदेह और ५ ऐरावत ये १५ कर्मभूमियाँ है और शेष ३० भोगभूमियाँ है। ये सब कर्मभूमि और भोगभूमि क्यो कहलाती है इस बातका निर्देश मूल टीकामे किया ही है।

उक्त भूमियोमे स्थितिका ज्ञान करानेके लिये आगेका सूत्र कहते है—

मनुष्योंकी उत्कृष्ट स्थिति तीन पल्य और जघन्य अन्तर्मुहूर्त है ॥३८॥

'त्रिपल्योपमा' इस वाक्यमे 'त्रि' और 'पल्योपमका' बहुव्रीहि समास है। मुहूर्तके भीतरके कालको अन्तर्मुहूर्त कहते है। पर और अपर के साथ इन दोनोंका क्रमसे सम्बन्ध है। मनुष्योकी उत्कृष्ट स्थिति तीन पल्य है और जघन्य स्थिति अन्तर्मुहूर्त्त है। तथा मध्यकी स्थिति अनेक प्रकारकी है।

पल्य तीन प्रकारका है—व्यवहार पल्य, उद्धारपल्य और अद्धापल्य। ये तीनों सार्थक नाम है। आदिके पल्यको व्यवहारपल्य कहते है, क्योंकि वह आगेके दो पल्योके व्यवहारका मूल है। इसके द्वारा और किसी वस्तुका परिमाण नही किया जाता। दूसरा उद्धारपल्य है। उद्धारपल्यमेंसे निकाले गये लोमके छेदोके द्वारा द्वीप और समुद्रोकी गिनती की जाती है। तीसरा अद्धापल्य है। अद्धा और कालस्थिति ये एकार्थवाची शब्द है। इनमेसे अब प्रथम पल्यका प्रमाण कहते है—जो इस प्रकार है—प्रमाणागुलकी गणनासे एक एक योजन लम्बे, चौड़े और गहरे तीन गढा करो और इनमेसे एकमे एक दिनसे लेकर सात दिन तक के पैदा हुए मेढ़ेके रोमोके अग्र भागोको ऐसे टुकड़े करके भरो जिससे कैंचीसे उसके दूसरे टुकड़े न किये जा सके। अनन्तर सौ सौ वर्षमे एक-एक रोमका टुकड़ा निकालो। इस विधिसे जितने कालमे वह गढा खाली हो वह सब काल व्यवहार पल्योपम नामसे कहा जाता है।

---

(१)-मिषु स्थिति- मु०। (२)-द्वयस्य व्यव- मु०। (३) कथ्यते। तद्यथा मु०। (४) नाप्नु-मु० (५) घनीभूत मु० (६) ततो वर्षशते एकैक-मु०।

एकैकलोमापकर्षणविधिना यावता कालेन तद्रिक्तं भवेत्तावान्कालो व्यवहारपल्योपमाख्यः। तैरेव लोमच्छेदैः प्रत्येकमसंख्येयवर्षकोटीसमयमात्रच्छिन्नैस्ततपूर्णमुद्धारपल्यम्। ततः समये समये एकैकस्मिन् रोमच्छेदेऽपकृष्यमाणे यावता कालेन तद्रिक्तं भवति तावान्काल उद्धारपल्योपमाख्यः। एषामुद्धारपल्याणां दशकोटीकोटच एकमुद्धारसागरोपमम्। अर्धतृतीयोद्धारसागरोपमानां यावन्तो रोमच्छेदास्तावन्तो द्वीपसमुद्राः। पुनरुद्धारपल्यरोमच्छेदैर्वर्षशतसमयमात्रच्छिन्नैः पूर्णमद्धापल्यम्। ततः समये समये एकैकस्मिन् रोमच्छेदेऽपकृष्यमाणे यावता कालेन तद्रिक्तं भवति तावान्कालोऽद्धापल्योपमाख्य.। एषामद्धापल्यानां दशकोटीकोटच एकमद्धासागरोपमम्। दशाद्धासागरोपमकोटीकोटच एकावसर्पिणी। तावत्येवोत्सर्पिणी। अनेनाद्धापल्येन नारकतैर्यग्योनानां देवमनुष्याणां च कर्मस्थितिर्भवस्थितिरायुःस्थितिः कायस्थितिश्च परिच्छेत्तव्या। उक्ता च संग्रहगाथा—

"ववहारुद्धारद्धा पल्ला तिण्णेव होंति बोद्धव्वा[1]।
संखा दीव-समुद्दा कम्मट्ठिदि वण्णिदा तदिए॥"

यथैवैते[2] उत्कृष्टजघन्ये स्थिती नृणां तथैव—

तिर्यग्योनिजानां च॥ ३९॥

अनन्तर असंख्यात करोड़ वर्षोके जितने समय हों उतने उन लोमच्छेदोंमेंसे प्रत्येक खण्ड करके उनसे दूसरे गढ़ेके भरने पर उद्धारपल्य होता है। और इसमेंसे प्रत्येक समयमें एक-एक रोमको निकालते हुए जितने कालमें वह गढ़ा खाली हो जाय उतने कालका नाम उद्धार पल्योपम है। इन दस कोड़ाकोड़ी उद्धारपल्योंका एक उद्धार सागरोपम काल होता है। तथा ढाई उद्धार सागरके जितने रोमखण्ड हों उतने सब द्वीप और समुद्र है। अनन्तर सौ वर्षके जितने समय हों उतने उद्धारपल्यके रोमखण्डोंमेंसे प्रत्येकके खण्ड करके और उनसे तीसरे गढेके भरनेपर एक अद्धापल्य होता है। और इनमेंसे प्रत्येक समयमें एक-एक रोमके निकालनेपर जितने समयमें वह गढ़ा खाली हो जाय उतने कालका नाम अद्धापल्योपम है। तथा ऐसे दस कोड़ाकोड़ी अद्धापल्योंका एक अद्धासागर होता है। दस कोड़ाकोड़ी अद्धासागरोंका एक अवसर्पिणी काल होता है और उत्सर्पिणी भी इतना ही बड़ा होता है।

इस अद्धापल्यके द्वारा नारकी, तिर्यञ्च, देव और मनुष्योंकी कर्मस्थिति, भवस्थिति, आयुस्थिति और कायस्थिति की गणना करनी चाहिये। संग्रह गाथा भी कही है—

,व्यवहार, उद्धार और अद्धा ये तीन पल्य जानने चाहिये। संख्याका प्रयोजक व्यवहार पल्य है, दूसरेसे द्वीप-समुद्रों की गणना की जाती है और तीसरे अद्धापल्यमें कर्मोकी स्थितिका लेखा है।

जिस प्रकार मनुष्योंकी यह उत्कृष्ट और जघन्य स्थिति है उसी प्रकार—

तिर्यंचों की स्थिति भी उतनी ही है॥३९॥

(१) ववहारुद्धारद्धा तियपल्ला पढयंम्मि संखाओ। विदिए दीवसमुद्दा तदिए मिज्जेदि कम्मठिदी-ति० प० गा० ९४। (२)-वैते द्वे उत्कृ-आ०, दि०१, दि०२।

तिरश्चां योनिस्तिर्यग्योनिः। तिर्यग्गतिनामकर्मोदयापादितं जन्मेत्यर्थः। तिर्यग्योनौ जातास्तिर्यग्योनिजाः। तेषां तिर्यग्योनिजानामुत्कृष्टा भवस्थितिस्त्रिपल्योपमा। जघन्या अन्तर्मुहूर्ता। मध्येऽनेकविकल्पाः।

इति तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसञ्ज्ञिकायां तृतीयोऽध्यायः ॥३॥

तिर्यञ्चोंकी योनिको तिर्यग्योनि कहते है। इसका अर्थ तिर्यञ्चगति नामकर्मके उदयसे प्राप्त हुआ जन्म है। जो तिर्यञ्चयोनिमें पैदा होते है वे तिर्यग्योनिज कहलाते है। इन तिर्यञ्चयोनिसे उत्पन्न जीवोकी उत्कृष्ट भवस्थिति तीन पल्य और जघन्य भवस्थिति अन्तर्मुहूर्त है। तथा बीचकी स्थितिके अनेक विकल्प है।

विशेषार्थ—स्थिति दो प्रकारकी होती है—भवस्थिति और कायस्थिति। एक पर्यायमे रहनेमें जितना काल लगे वह भवस्थिति है। तथा विवक्षित पर्यायके सिवा अन्य पर्यायमें उत्पन्न न होकर पुनः पुन उसी पर्यायमे निरन्तर उत्पन्न होनेसे जो स्थिति प्राप्त होती है वह कायस्थिति है। यहाँ मनुष्यों और तिर्यञ्चोकी भवस्थिति कही गई है। इनकी जघन्य कायस्थिति जघन्य भवस्थिति प्रमाण है, क्योकि एक बार जघन्य आयुके साथ भव पाकर उसका अन्य पर्यायमे जाना सम्भव है। मनुष्योकी उत्कृष्ट कायस्थिति पूर्वकोटिपृथक्त्व अधिक तीन पल्य है। पृथक्त्व यह रौढिक संज्ञा है। मुख्यतः इसका अर्थ तीनसे ऊपर और नौसे नीचे होता है। यहाँ बहुत अर्थमे पृथक्त्व शब्द आया है। तिर्यञ्चोंकी उत्कृष्ट कायस्थिति अनन्तकाल है जो असख्यात पुद्गल परिवर्तनोके बराबर है। यह तिर्यञ्चगति सामान्यकी अपेक्षा उनकी कायस्थिति कही है। यदि अन्य गतिसे आकर कोई जीव निरन्तर तिर्यञ्चगतिमे परिभ्रमण करता रहता है तो अधिकसे अधिक इतने कालतक वह तिर्यञ्चगति मे रह सकता है। इसके बाद वह नियमसे अन्य गतिमें जन्म लेता है। वैसे तिर्यञ्चोके अनेक भेद है इसलिये उन भेदोकी अपेक्षा उनकी कायस्थिति जुदी जुदी है।

इस प्रकार सर्वार्थसिद्धि नामवाली तत्त्वार्थवृत्तिमें दूसरा अध्याय समाप्त हुआ।

अथ चतुर्थोऽध्यायः

'भवप्रत्ययोऽवधिर्देवनारकाणाम्' इत्येवमादिष्वसकृद्देवशब्द उक्तस्तत्र न ज्ञायते के देवाः कतिविधा इति[1] तन्निर्णयार्थमाह—

देवाश्चतुर्णिकायाः ॥ १ ॥

५ देवगतिनामकर्मोदये सत्यभ्यन्तरे हेतौ बाह्यविभूतिविशेषैः[2] द्वीपाद्रिसमुद्रादिप्रदेशेषु[3] यथेष्टं दीव्यन्ति क्रीडन्तीति[4] देवाः। इहैकवचननिर्देशो युक्तः 'देवश्चतुर्णिकायः' इति[5]। स जात्यभिधानाद् बहूनां प्रतिपादको भवति?[6] बहुत्वनिर्देशस्तदन्तर्गतभेदप्रतिपत्त्यर्थः। इन्द्रसामानिकादयो बहवो भेदाः सन्ति स्थित्यादिकृताश्च तत्सूचनार्थः। देवगतिनामकर्मोदयस्य स्वकर्मविशेषापादितभेदस्य[7] सामर्थ्यान्निचीयन्त इति निकायाः संघाता इत्यर्थः।

१०

चौथा अध्याय

'देव और नारकियोंके भवप्रत्यय अवधिज्ञान होता है' इत्यादि सूत्रोंमें अनेकबार देव शब्द आया है। किन्तु वहाँ यह न जान सके कि देव कौन है और वे कितने प्रकारके है अतः इसका निर्णय करनेके लिये आगेका सूत्र कहते है—

देव चार निकायवाले हैं ॥१॥

१५ अभ्यन्तर कारण देवगति नामकर्मके उदय होने पर जो नाना प्रकारकी बाह्य विभूतिसे द्वीप समुद्रादि अनेक स्थानोंमें इच्छानुसार क्रीड़ा करते हैं, वे देव कहलाते है।

शंका—'देवश्चतुर्णिकायः' इस प्रकार एकवचनरूप निर्देश करना उचित था, क्योंकि जातिका कथन कर देनेसे बहुतका कथन हो ही जाता है।

समाधान—देवोंके अन्तर्गत अनेक भेद हैं इस बातका ज्ञान करानेके लिये सूत्रमें बहुवचनका २० निर्देश किया है। तात्पर्य यह है कि देवोंके इन्द्र, सामानिक आदि की अपेक्षा अनेक भेद हैं और स्थिति आदिकी अपेक्षा भी अनेक भेद हैं अतः उनको सूचित करनेके लिये बहुवचनका निर्देश किया है।

अपने अवान्तर कर्मोंसे भेदको प्राप्त होनेवाले देवगति नामकर्मके उदयकी सामर्थ्यसे जो संग्रह किये

---

(१) इति वा तन्नि-मु०। (२)-विशेषाद् द्वीपा- मु०। (३)-मुद्रादिषु प्रदे-मु०। (४)-डन्ति ते देवाः मु०। (५) इति। जात्य-मु०। (६) 'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्। - पा० १, २, २, ५८ (७) स्वधर्मविशे मु०, ता०, ना०।

चत्वारो निकाया येषां ते चतुर्णिकायाः । के पुनस्ते ? भवनवासिनो व्यन्तरा ज्योतिष्का वैमानिकाश्चेति ।

तेषां लेश्यावधारणार्थमुच्यते—

आदितस्त्रिषु पीतान्तलेश्याः ॥ २ ॥

'आदित' इत्युच्यते[1], अन्ते मध्ये अन्यथा वा ग्रहणं मा विज्ञायीति । आदौ आदितः । ५ द्वयोरेकस्य च निवृत्त्यर्थं 'त्रि'ग्रहण क्रियते । अथ चतुर्णां निवृत्त्यर्थं कस्मान्न भवति ? 'आदित' इति वचनात् । षड् लेश्या उक्ताः । तत्र चतसृणां लेश्यानां ग्रहणार्थं 'पीतान्त' ग्रहण क्रियते । पीतं तेज इत्यर्थः । पीता अन्ते यासां ताः पीतान्ताः[2] । पीतान्ता लेश्या येषां ते पीतान्तलेश्याः । एतदुक्तं भवति—आदितस्त्रिषु निकायेषु भवनवासिव्यन्तर-ज्योतिष्कनामसु[3] देवानां कृष्णा नीला कापोता पीतेति चतस्रो लेश्या भवन्ति । १०

जाते हैं वे निकाय कहलाते हैं। निकाय शब्दका अर्थ संघात है। 'चतुर्णिकाय' मे बहुव्रीहि समास है, जिससे देवोके मुख्य निकाय चार ज्ञात होते हैं।

शंका—इन चार निकायोके क्या नाम है ?

समाधान—भवनवासी, व्यन्तर, ज्योतिष्क और वैमानिक।

अब इनकी लेश्याओंका निश्चय करनेके लिये आगेका सूत्र कहते है— १५

आदिके तीन निकायोंमें पीत पर्यन्त चार लेश्याएं हैं ॥२॥

अन्तके तीन निकायोका, मध्यके निकायोंका या विपरीत क्रमसे निकायोका ग्रहण न समझ लिया जाय इसलिये सूत्रमे 'आदित.' पद दिया है। दो और एक निकायके निराकरण करनेके लिये 'त्रि' पदका ग्रहण किया है।

शंका—'त्रि' पदसे चार की निवृत्ति क्यो नही होती है ? २०

समाधान—सूत्रमे जो 'आदित.' पद दिया है इससे ज्ञात होता है कि 'त्रि' पद चारकी निवृत्तिके लिये नही है।

लेश्याएँ छह कही है उनमेंसे चार लेश्याओके ग्रहण करनेके लिये सूत्रमे, 'पीतान्त' पदका ग्रहण किया है। यहाँ पीतसे तेज लेश्या लेनी चाहिये। यहाँ पहले पीत और अन्त इन शब्दोमे और अनन्तर पीतान्त और लेश्या शब्दोमें बहुव्रीहि समास है। इसका यह अभिप्राय है कि आदिके भवनवासी, २५ व्यन्तर और ज्योतिषी इन तीन निकायोमे देवोके कृष्ण, नील, कापोत और पीत ये चार लेश्याएँ होती है।

विशेषार्थ—यो तो भवनवासी, व्यन्तर और ज्योतिषी-देवोंके एक पीत लेश्या ही होती है किन्तु ऐसा नियम है कि कृष्ण, नील और कापोत लेश्याके मध्यम अंशसे मरे हुए कर्मभूमियाँ मिथ्यादृष्टि मनुष्य और तिर्यञ्च और पीत लेश्याके मध्यम अशसे मरे हुए भोगभूमियाँ मिथ्यादृष्टि मनुष्य और तिर्यञ्च

(१)-च्यते अन्यथा वा ग्रह-दि०२ ।-च्यते अन्ते मध्ये वा ग्रह-मु०, ता०, ना० । -च्यते अन्ते अन्यथा वा ग्रह-आ० । (२) ता पीतान्ता लेश्या मु०, दि०२ ।(३) ज्योतिष्काण देवा-आ०, दि०१, दि०२ ।

तेषां निकायानामन्तर्विकल्पप्रतिपादनार्थमाह—

दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः ।। ३ ।।

चतुर्णां देवनिकायानां दशादिभिः संख्याशब्दैर्यथासंख्यमभिसम्बन्धो वेदितव्यः । दशविकल्पा भवनवासिनः । अष्टविकल्पा व्यन्तराः । पञ्चविकल्पा ज्योतिष्काः । द्वादश-
५ विकल्पा वैमानिका इति । सर्ववैमानिकानां द्वादशविकल्पान्तःपातित्वे प्रसक्ते ग्रैवेयकादि-निवृत्त्यर्थं विशेषणमुपादीयते 'कल्पोपपन्नपर्यन्ता' इति । अथ कथं कल्पसञ्ज्ञा ? इन्द्रादयः प्रकारा दश एतेषु कल्प्यन्त इति कल्पाः । भवनवासिषु तत्कल्पनासम्भवेऽपि रूढिवशा-द्वैमानिकेष्वेव वर्तते कल्पशब्दः । कल्पेषूपपन्नाः कल्पोपपन्नाः । कल्पोपपन्नाः पर्यन्ता येषां ते कल्पोपपन्नपर्यन्ताः ।

१० पुनरपि तद्विशेषप्रतिपत्त्यर्थमाह—

इन्द्रसामानिकत्रायस्त्रिंशपारिषदात्मरक्षलोकपालानीकप्रकीर्णका-भियोग्यकिल्विषिकाश्चैकशः ।। ४ ।।

भवनत्रिकमें उत्पन्न होते हैं। यतः ऐसे कर्मभूमियाँ मनुष्य और तिर्यञ्चोंके मरते समय प्रारम्भकी तीन अशुभ लेश्याएँ होती हैं अतः इनके मरकर भवनत्रिकोंमें उत्पन्न होनेपर वहाँ भी अपर्याप्त अवस्थामें
१५ ये अशुभ लेश्याएँ पाई जाती हैं। इसीसे इनके पीत तक चार लेश्याएँ कही हैं। अभिप्राय यह है कि भवनत्रिकोंके अपर्याप्त अवस्थामें पीततक चार लेश्याएँ और पर्याप्त अवस्थामें एक पीत लेश्या होती है।

अब इन निकायोंके भीतरी भेद दिखलानेके लिए आगेका सूत्र कहते हैं—

वे कल्पोपपन्न देव तकके चार निकायके देव क्रमसे दस, आठ, पांच और बारह भेदवाले हैं ।।३।।

२० देव निकाय चार हैं और दश आदि संख्या शब्द चार हैं अतः इनका क्रमसे सम्बन्ध जानना चाहिये। यथा—भवनवासी दस प्रकारके हैं, व्यन्तर आठ प्रकारके हैं, ज्योतिषी पाँच प्रकारके हैं और वैमा-निक बारह प्रकारके हैं। उपर्युक्त कथनसे सब वैमानिक बारह भेदोंमें आ जाते हैं, अतः ग्रैवेयक आदि के निराकरण करनेके लिये सूत्रमें 'कल्पोपपन्नपर्यन्ताः' यह पद दिया है।

शंका—कल्प इस संज्ञाका क्या कारण है ?

२५ समाधान—जिनमें इन्द्र आदि दस प्रकार कल्पे जाते हैं वे कल्प कहलाते हैं। इस प्रकार इन्द्रा-दिककी कल्पना ही कल्प संज्ञाका कारण है।

यद्यपि इन्द्रादिककी कल्पना भवनवासियोंमें भी सम्भव है फिर भी रूढ़ि से कल्प शब्दका व्यवहार वैमानिकोंमें ही किया जाता है। जो कल्पोंमें उत्पन्न होते हैं वे कल्पोपपन्न कहलाते हैं। तथा जिनके अन्तमें कल्पोपपन्न देव हैं उन सबको कल्पोपपन्नपर्यन्त कहा है।

३० प्रकारान्तरसे इनके भेदोंका ज्ञान करानेके लिये आगेका सूत्र कहते हैं—

उक्त दस आदि भेदोंमेंसे प्रत्येक इन्द्र, सामानिक, त्रायस्त्रिंश, पारिषद, आत्मरक्ष, लोकपाल, अनीक, प्रकीर्णक, आभियोग्य और किल्विषिकरूप हैं ।।४।।

अन्यदेवासाधारणाणिमादिगुणयोगादिन्दन्तीति इन्द्राः। आज्ञैश्वर्यवर्जितं यत्स्थानायुर्वीर्यपरिवारभोगोपभोगादि तत्समानं, तस्मिन्समाने भवाः सामानिका महत्तराः पितृगुरूपाध्यायतुल्याः। मन्त्रिपुरोहितस्थानीयास्त्रायस्त्रिंशाः। त्रयस्त्रिंशदेव त्रायस्त्रिंशाः। वयस्यपीठमर्दसदृशाः परिषदि भवाः पारिषदाः। आत्मरक्षाः शिरोरक्षोपमानाः। अर्थचरारक्षकसमाना लोकपालाः। लोकं पालयन्तीति लोकपालाः। पदात्यादीनि सप्त अनीकानि दण्डस्थानीयानि। प्रकीर्णकाः पौरजानपदकल्पाः। आभियोग्या दाससमाना वाहनादिकर्मणि प्रवृत्ताः[2]। अन्तेवासिस्थानीयाः[3] किल्विषिकाः। किल्बिष पापं येषा[4]मस्तीति किल्विषिकाः। ५

एकैकस्य निकायस्य एकश एते इन्द्रादयो दश विकल्पाश्चतुर्षु निकायेषूत्सर्गेण प्रसक्तास्ततोऽपवादार्थमाह— १०

त्रायस्त्रिंशलोकपालवर्ज्या[5] व्यन्तरज्योतिष्काः ॥ ५ ॥

व्यन्तरेषु ज्योतिष्केषु च त्रायस्त्रिंशांल्लोकपालांश्च वर्जयित्वा इतरेऽष्टौ विकल्पा द्रष्टव्याः।

जो अन्य देवोमे असाधारण अणिमादि गुणोंके सम्बन्धसे शोभते है वे इन्द्र कहलाते है। आज्ञा और ऐश्वर्यके सिवा जो आयु, वीर्य, परिवार, भोग और उपभोग है वे समान कहलाते है। उस समानमे जो होते है वे सामानिक कहलाते है। ये पिता, गुरु और उपाध्यायके समान सबसे बडे है। जो मत्री और पुरोहितके समान है वे त्रायस्त्रिंश कहलाते है। ये तेतीस ही होते है इसलिये त्रायस्त्रिंश कहलाते है। जो सभामे मित्र और प्रेमी जनोके समान होते है वे पारिषद कहलाते है। जो अंगरक्षकके समान है वे आत्मरक्ष कहलाते है। जो रक्षकके समान अर्थचर है वे लोकपाल कहलाते है। तात्पर्य यह है कि जो लोकका पालन करते हैं वे लोकपाल कहलाते है। जैसे यहाँ सेना है उसी प्रकार सात प्रकारके पदाति आदि अनीक कहलाते है। जो गाँव और शहरोमे रहनेवालोके समान है उन्हे प्रकीर्णक कहते है। जो दासके समान वाहन आदि कर्ममे प्रवृत्त होते है वे आभियोग्य कहलाते है। जो सीमाके पास रहनेवालो के समान है वे किल्विषिक कहलाते है। किल्विष पापको कहते है इसकी जिनके बहुलता होती है वे किल्विषिक कहलाते है। १५ २०

चारो निकायो मेसे प्रत्येक निकायमे ये इन्द्रादिक दस भेद उत्सर्गसे प्रात हुए अत. जहाँ अपवाद है उसका कथन करनेके लिये आगेका सूत्र कहते है— २५

किन्तु व्यन्तर और ज्योतिष्क देव त्रायस्त्रिंश और लोकपाल इन दो भेदोंसे रहित हैं ॥५॥

व्यन्तर और ज्योतिषियोमे त्रायस्त्रिंश और लोकपाल इन दो भेदोके सिवा शेष आठ भेद जानना चाहिये।

---

(१) यत्समानायु-मु०। (२)-वृत्ता। अन्यवासि- आ०, दि०१, दि० २। (३)–स्थानीया। किल्विषं मु०। (४) येषामस्ति ते किल्वि- मु०। (५)-वर्जा व्य-ता०, ना०,।

अथ तेषु निकायेषु किमेकैक इन्द्र उतान्यः प्रतिनियमः कश्चिदस्तीत्यत आह—

पूर्वयोर्द्वीन्द्राः ॥ ६ ॥

पूर्वयोर्निकाययोर्भवनवासिव्यन्तरनिकाययोः। कथं द्वितीयस्य पूर्वत्वम्? सामीप्यात्पूर्वत्वमुपचर्योक्तम्। 'द्वीन्द्राः' इति अन्तर्नीतवीप्सार्थः। द्वौ द्वौ इन्द्रौ येषां ते द्वीन्द्रा इति। ५ यथा सप्तपर्णोऽष्टापद इति। तद्यथा—भवनवासिषु तावदसुरकुमाराणां द्वाविन्द्रौ चमरो वैरोचनश्च। नागकुमाराणां धरणो भूतानन्दश्च। विद्युत्कुमाराणां हरिसिंहो हरिकान्तश्च। सुपर्णकुमाराणां वेणुदेवो वेणुधारी च। अग्निकुमाराणामग्निशिखोऽग्निमाणवश्च। वातकुमाराणां वैलम्बः प्रभञ्जनश्च। स्तनितकुमाराणां सुघोषो महाघोषश्च। उदधिकुमाराणां जलकान्तो जलप्रभश्च। द्वीपकुमाराणां पूर्णो वसिष्ठश्च। दिक्कुमाराणा- १० ममितगतिरमितवाहनश्चेति। व्यन्तरेष्वपि किन्नराणां द्वाविन्द्रौ किन्नरः किम्पुरुषश्च। किम्पुरुषाणां सत्पुरुषो महापुरुषश्च[1]। महोरगाणामतिकायो महाकायश्च। गन्धर्वाणां गीतरतिर्गीतयशाश्च। यक्षाणां पूर्णभद्रो माणिभद्रश्च। राक्षसानां भीमो महाभीमश्च। भूतानां प्रतिरूपोऽप्रतिरूपश्च। पिशाचानां कालो महाकालश्च।

उन निकायोंमें क्या एक एक इन्द्र है या और दूसरा कोई नियम है, इस बात के बतलानेके लिये १५ अब आगेका सूत्र कहते हैं—

प्रथम दो निकायोंमें दो दो इन्द्र हैं ॥६॥

पूर्व दो निकायोंसे भवनवासी और व्यन्तर ये दो निकाय लेना चाहिये।

शंका—दूसरे निकायको पूर्व कैसे कहा जा सकता है?

समाधान—प्रथमके समीपवर्ती होनेसे दूसरे निकायको उपचारसे पूर्व कहा है। 'द्वीन्द्राः' इस पदमें २० वीप्सा रूप अर्थ गर्भित है अतः इसका विग्रह इस प्रकार हुआ कि 'द्वौ द्वौ इन्द्रौ येषां ते द्वीन्द्राः' जैसे सप्तपर्ण और अष्टापद। तात्पर्य यह है जिस प्रकार सप्तपर्ण और अष्टापद इन पदों मे वीप्सारूप अर्थ गर्भित है उसी प्रकार प्रकृतमें जानना चाहिए। खुलासा इस प्रकार है—भवनवासियोंमें असुरकुमारोंके चमर और वैरोचन ये दो इन्द्र हैं। नागकुमारोंके धरण और भूतानन्द ये दो इन्द्र है। विद्युत्कुमारोंके हरिसिंह और हरिकान्त ये दो इन्द्र हैं। सुपर्णकुमारोंके वेणुदेव और वेणुधारी ये दो इन्द्र है। अग्निकुमारोंके अग्नि- २५ शिख और अग्निमाणव ये दो इन्द्र है। वातकुमारोंके वैलम्ब और प्रभञ्जन ये दो इन्द्र हैं। स्तनितकुमारोंके सुघोष और महाघोष ये दो इन्द्र हैं। उदधिकुमारोंके जलकान्त और जलप्रभ ये दो इन्द्र है। द्वीपकुमारोंके पूर्ण और विशिष्ट ये दो इन्द्र हैं। तथा दिक्कुमारोंके अमितगति और अमितवाहन ये दो इन्द्र हैं। व्यन्तरोंमें भी किन्नरोंके किन्नर और किम्पुरुष ये दो इन्द्र है। किम्पुरुषोंके सत्पुरुष और महापुरुष ये दो इन्द्र हैं। महोरगोंके अतिकाय और महाकाय ये दो इन्द्र है। गन्धर्वोके गीतरति और गीतयश ३० ये दो इन्द्र हैं। यक्षोंके पूर्णभद्र और मणिभद्र ये दो इन्द्र है। राक्षसोंके भीम और महाभीम ये दो इन्द्र हैं। भूतों के प्रतिरूप और अप्रतिरूप ये दो इन्द्र है। तथा पिशाचोंके काल और महाकाल ये दो इन्द्र है।

(१)-रुषश्चेति महो- मु०।

अथैषां देवानां सुखं कीदृशमित्युक्ते सुखावबोधनार्थमाह—

कायप्रवीचारा आ ऐशानात् ॥ ७ ॥

प्रवीचारो मैथुनोपसेवनम् । कायेन प्रवीचारो येषां ते कायप्रवीचाराः । आङ्[1] अभिविध्यर्थः । असहितया निर्देशः असन्देहार्थः । एते भवनवास्यादय ऐशानान्ताः संक्लिष्टकर्मत्वान्मनुष्यवत्स्त्रीविषयसुखमनुभवन्तीत्यर्थः ।　५

अवधिग्रहणादितरेषां सुखविभागेऽनिर्ज्ञाते तत्प्रतिपादनार्थमाह—

शेषाः स्पर्शरूपशब्दमनःप्रवीचाराः ॥ ८ ॥

उक्तावशिष्टग्रहणार्थं 'शेष'ग्रहणम् । के पुनरुक्तावशिष्टाः ? कल्पवासिनः । स्पर्शश्च रूपं च शब्दश्च मनश्च स्पर्शरूपशब्दमनांसि, तेषु प्रवीचारो येषां ते स्पर्शरूपशब्दमन.प्रवीचारा. । कथमभिसम्बन्धः ?आर्षाविरोधेन । कुत. पुन. 'प्रवीचार' ग्रहणम् ?　१०

इन देवोका सुख किस प्रकारका होता है ऐसा पूछने पर सुखका ज्ञान करानेके लिये आगेका सूत्र कहते है—

ऐशान तकके देव कायप्रवीचार अर्थात् शरीरसे विषय-सुख भोगनेवाले होते हैं ॥७॥

मैथुनके उपसेवनको प्रवीचार कहते है। जिनका कायसे प्रवीचार है वे कायप्रवीचारवाले कहे जाते है। कहाँतक कायसे प्रवीचारकी व्याप्ति है इस बातके बतलानेके लिये सूत्रमे 'आङ्' का निर्देश किया है। सन्देह न हो इसलिये 'आ ऐशानात्' इस प्रकार सन्धिके बिना निर्देश किया है। तात्पर्य यह है कि ऐशान स्वर्ग पर्यन्त ये भवनवासी आदि देव सक्लिष्ट कर्मवाले होनेके कारण मनुष्योके समान स्त्रीविषयक सुखका अनुभवन करते है।　१५

ऊपरके सूत्रमे कायसे प्रवीचारकी मर्यादा कर दी है इसलिये इतर देवोके सुखका विभाग नही ज्ञात होता है, अत इसके प्रतिपादन करनेके लिये आगेका सूत्र कहते है—　२०

शेष देव स्पर्श, रूप, शब्द और मनसे विषय-सुख भोगनेवाले होते हैं ॥८॥

पहले जिन देवोका प्रवीचार कहा है उनसे अतिरिक्त देवोके ग्रहण करनेके लिये 'शेष' पदका ग्रहण किया है।

शका—उक्त देवोसे अवशिष्ट और कौन देव है ?

समाधान—कल्पवासी ।　२५

यहाँ स्पर्श, रूप, शब्द और मन इनका परस्पर द्वन्द्व समास करके अनन्तर प्रवीचार शब्दके साथ बहुव्रीहि समास किया है।

शका—इनमेसे किन देवोके कौनसा प्रवीचार है इसका सम्बन्ध कैसे करना चाहिये ?

समाधान—इसका सम्बन्ध जिस प्रकार आर्षमे विरोध न आवे उस प्रकार कर लेना चाहिये ।

शंका—पुन 'प्रवीचार' शब्दका ग्रहण किसलिये किया है ?　३०

---

(१) 'आङ् मर्यादाभिविध्यो.।'-पा० २, १, १३।

इष्टसम्प्रत्ययार्थमिति । कः पुनरिष्टोऽभिसम्बन्धः ? आर्षाविरोधी—सानत्कुमारमाहेन्द्रयोर्देवा देवाङ्गनाङ्गस्पर्शमात्रादेव परां प्रीतिमुपलभन्ते, तथा देव्योऽपि । ब्रह्मब्रह्मोत्तरलान्तवकापिष्ठेषु देवा दिव्याङ्गनानां शृङ्गाराकारविलासचतुरमनोज्ञवेषरूपावलोकनमात्रादेव परमसुखमाप्नुवन्ति । शुक्रमहाशुक्रशतारसहस्रारेषु देवा देववनितानां मधुर-
५ सङ्गीतमृदुहसितललितकथितभूषणरवश्रवणमात्रादेव परां प्रीतिमास्कन्दन्ति । आनतप्राणतारणाच्युतकल्पेषु देवा स्वाङ्गनामनःसङ्कल्पमात्रादेव परं सुखमाप्नुवन्ति ।

अथोत्तरेषां किंप्रकारं सुखमित्युक्ते तन्निश्चयार्थमाह—

परेऽप्रवीचाराः ॥ ९ ॥

'पर' ग्रहणमितराशेषसंग्रहार्थम् । 'अप्रवीचार'ग्रहणं परमसुखप्रतिपत्त्यर्थम् ।
१० प्रवीचारो हि वेदनाप्रतिकारः । तदभावे तेषां परमसुखमनवरतं भवति ।

उक्ता ये आदिनिकायदेवा दशविकल्पा इति तेषां सामान्यविशेषसञ्ज्ञाविज्ञापनार्थमिदमुच्यते—

समाधान—इष्ट अर्थका ज्ञान करानेके लिये।

शंका—जिसमें आर्षसे विरोध न आवे ऐसा वह इष्ट अर्थ क्या है ?

१५ समाधान—सानत्कुमार और माहेन्द्र स्वर्गके देव देवांगनाओंके स्पर्श मात्रसे परम प्रीतिको प्राप्त होते हैं और इसी प्रकार वहाँकी देवियाँ भी। ब्रह्म, ब्रह्मोत्तर, लान्तव और कापिष्ठ स्वर्गके देव देवांगनाओंके शृङ्गार, आकृति, विलास, चतुर और मनोज्ञ वेष तथा मनोज्ञ रूपके देखने मात्रसे ही परम सुखको प्राप्त होते हैं। शुक्र, महाशुक्र, शतार और शहस्रार स्वर्गके देव देवांगनाओके मधुर संगीत, कोमल हास्य, ललित कथा और भूषणोंके कोमल शब्दोंके सुननेमात्रसे ही परम प्रीतिको प्राप्त होते हैं।
२० तथा आनत, प्राणत, आरण और अच्युत कल्पके देव अपनी अंगनाका मनमें संकल्प करनेमात्रसे ही परम सुखको प्राप्त होते हैं।

अब आगेके देवोंका किस प्रकारका सुख है ऐसा प्रश्न करनेपर उसका निश्चय करनेके लिये आगेका सूत्र कहते हैं—

बाकीके सब देव विषय-सुख से रहित होते हैं ॥९॥

२५ शेष सब देवोंका संग्रह करनेके लिये सूत्रमें 'पर' शब्दका ग्रहण किया है। परम सुखका ज्ञान करानेके लिये अप्रवीचार पदका ग्रहण किया है। प्रवीचार वेदनाका प्रतिकारमात्र है। इसके अभावमें उनके सदा परम सुख पाया जाता है।

आदिके निकायके देवोंके दस भेद कहे हैं। अब उनकी सामान्य और विशेष संज्ञाका ज्ञान करानेके लिये आगेका सूत्र कहते हैं—

---

(१)–ङ्गनास्पर्श- मु०।

भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ॥ १० ॥

भवनेषु वसन्तीत्येवंशीला भवनवासिनः । आदिनिकायस्येयं सामान्यसञ्ज्ञा। असुरादयो विशेषसञ्ज्ञा विशिष्टनामकर्मोदयापादितवृत्तयः । सर्वेषां देवानामवस्थितवयः-स्वभावत्वेऽपि वेषभूषायुधयानवाहनक्रीडनादि कुमारवदेषामाभासत इति भवनवासिषु कुमारव्यपदेशो रूढ. । स प्रत्येकं परिसमाप्यते असुरकुमारा इत्येवमादि। क्व तेषां भवनानीति चेत् ? उच्यते---रत्नप्रभायाः पङ्कबहुलभागेऽसुरकुमाराणां भवनानि। खरपृथिवीभागे उपर्यधश्च एकैकयोजनसहस्रं वर्जयित्वा शेषनवानां कुमाराणामावासाः ।

द्वितीयनिकायस्य सामान्यविशेषसञ्ज्ञावधारणार्थमाह--

व्यन्तराः किन्नरकिम्पुरुषमहोरगगन्धर्वयक्षराक्षसभूतपिशाचाः ॥ ११ ॥

विविधदेशान्तराणि येषां निवासास्ते 'व्यन्तरा' इत्यन्वर्था सामान्यसञ्ज्ञेयमष्टानामपि विकल्पानाम् । तेषां व्यन्तराणामष्टौ विकल्पाः किन्नरादयो वेदितव्या नामकर्मोदयविशेषापादिताः । क्व पुनस्तेषामावासा इति चेत् ? उच्यते---अस्माज्जम्बूद्वीपाद-

---

भवनवासी देव दस प्रकार हैं--असुरकुमार, नागकुमार, विद्युत्कुमार, सुपर्णकुमार, अग्निकुमार, वातकुमार, स्तनितकुमार, उदधिकुमार, द्वीपकुमार और दिक्कुमार ॥१०॥

जिनका स्वभाव भवनोमे निवास करना है वे भवनवासी कहे जाते है। प्रथम निकाय की यह सामान्य संज्ञा है। तथा असुरादिक विशेष संज्ञाएँ है जो विशिष्ट नामकर्मके उदयसे प्राप्त होती है। यद्यपि इन सब देवोका वय और स्वभाव अवस्थित है तो भी इनका वेष, भूषा, शस्त्र, यान, वाहन और क्रीड़ा आदि कुमारोके समान होती है इसलिये सब भवनवासियोंमे कुमार शब्द रूढ़ है। यह कुमार शब्द प्रत्येकके साथ जोड़ लेना चाहिये। यथा असुरकुमार आदि।

शंका---इनके भवन कहाँ है ?

समाधान---रत्नप्रभाके पंकबहुल भागमे असुरकुमारोके भवन है। और खर पृथिवीभागमे ऊपर और नीचे एक एक हजार योजन छोड़कर शेष नौ प्रकारके कुमारोंके भवन है।

अब दूसरे निकायकी सामान्य और विशेष संज्ञाके निश्चय करनेके लिये आगेका सूत्र कहते है--

व्यन्तर देव आठ प्रकारके हैं---किन्नर, किम्पुरुष, महोरग, गन्धर्व, यक्ष, राक्षस, भूत और पिशाच ॥११॥

जिनका नानाप्रकारके देशोमे निवास है वे व्यन्तर देव कहलाते है। यह सामान्य संज्ञा सार्थक है जो अपने आठों ही भेदोंमे लागू है। इन व्यन्तरोंके किन्नरादिक आठों भेद विशेष नामकर्मके उदयसे प्राप्त होते है ऐसा जानना चाहिये।

शंका---इन व्यन्तरोंके आवास कहाँ है ?

---

(१) पङ्कबहल-आ०, दि०१, दि०२ ।

संख्येयान्द्वीपसमुद्रानतीत्य उपरिष्टे[1] खरपृथिवीभागे सप्तानां व्यन्तराणामावासाः । राक्षसानां पङ्कबहुलभागे ।

तृतीयस्य निकायस्य सामान्यविशेषसंज्ञासङ्कीर्तनार्थमाह––

ज्योतिष्काः सूर्याचन्द्रमसौ ग्रहनक्षत्रप्रकीर्णकतारकाश्च ॥१२॥

५ ज्योतिस्स्वभावत्वादेषां पञ्चानामपि 'ज्योतिष्का' इति सामान्यसंज्ञा अन्वर्था। सूर्यादयस्तद्विशेषसंज्ञा नामकर्मोदयप्रत्ययाः । 'सूर्याचन्द्रमसौ' इति पृथग्ग्रहणं प्राधान्यख्यापनार्थम् । किंकृतं पुनः प्राधान्यम् ? प्रभावादिकृतम् । क्व पुनस्तेषामावासाः ? इत्यत्रोच्यते, अस्मात्समाद् भूमिभागादूर्ध्वं सप्तयोजनशतानि नवत्युत्तराणि[2] उत्पत्त्य सर्वज्योतिषामधोभागविन्यस्तास्तारकाश्चरन्ति । ततो दशयोजनान्युत्पत्य सूर्याश्चरन्ति । ततोऽशीतियोजनान्युत्पत्य चन्द्रमसो भ्रमन्ति । ततश्[3]चत्वारि योजनान्युत्पत्य नक्षत्राणि । ततश्[4]चत्वारि योजनान्युत्पत्य बुधाः । ततस्त्रीणि योजनान्युत्पत्य शुक्राः । ततस्[5]त्रीणि योजनान्युत्पत्य बृहस्पतयः । ततस्त्री[6]णि योजनान्युत्पत्याङ्गारकाः । ततस्त्रीणि योजनान्युत्पत्य शनैश्चराश्चरन्ति । स एष ज्योतिर्गणगोचरो नभोऽवकाशो दशाधिकयोजनशत-

समाधान––इस जम्बूद्वीपसे असंख्यात द्वीप और समुद्र लांघ कर ऊपरके खर पृथिवी भागमें सात १५ प्रकारके व्यन्तरोंके आवास हैं। तथा पंकबहुल भागमें राक्षसोंके आवास है।

अब तीसरे निकायकी सामान्य और विशेष संज्ञाका कथन करनेके लिये आगेका सूत्र कहते हैं––

ज्योतिषी देव पांच प्रकारके हैं––सूर्य, चन्द्रमा, ग्रह, नक्षत्र और प्रकीर्णक तारे ॥१२॥

ये सब पाँचों प्रकारके देव ज्योतिर्मय हैं इसलिये इनकी ज्योतिषी यह सामान्य संज्ञा सार्थक है। तथा सूर्य आदि विशेष संज्ञाएँ विशेष नामकर्मके उदयसे प्राप्त होती है। सूर्य और चन्द्रमाकी प्रधानताको २० दिखलानेके लिये 'सूर्याचन्द्रमसौ' इस प्रकार इन दोनों का अलगसे ग्रहण किया है।

शंका––इनमें प्रधानता किस निमित्तसे प्राप्त होती है ?

समाधान––इनमें प्रभाव आदिककी अपेक्षा प्रधानता प्राप्त होती है।

शंका––इनका आवास कहाँपर है ?

समाधान––इस समान भूमिभागसे सातसौ नब्बे योजन ऊपर जाकर तारकाएँ विचरण करती हैं २५ जो सब ज्योतिषियोंके अधोभागमें स्थित हैं। इससे दस योजन ऊपर जाकर सूर्य विचरण करते हैं। इससे अस्सी योजन ऊपर जाकर चन्द्रमा परिभ्रमण करते हैं। इससे चार योजन ऊपर जाकर नक्षत्र है। इससे चार योजन ऊपर जाकर बुध हैं। इससे तीन योजन ऊपर जाकर शुक्र है। इससे तीन योजन ऊपर जाकर वृहस्पति है। इससे तीन योजन ऊपर जाकर मंगल है। इससे तीन योजन ऊपर जाकर सनीचर हैं। यह ज्योतिषियोंसे व्याप्त नभःप्रदेश एकसौ दस योजन मोटा और घनोदधिपर्यन्त असंख्यात

(१)-तीत्य परिष्टे आ०, ता०, ना०, दि०१, दि०२। (२)-त्तराणि ७९० उत्प-मु०। (३) ततस्त्रीणि योज-ता०, ना०,। तत्त्वा०। (४) ततस्त्रीणि योज-ता०, ना०, तत्त्वा०। (५) ततश्चत्वारि योज-ता०, ना०, तत्त्वा०, (६) ततश्चत्वारि योज-ता०, ना०, तत्त्वा०।

बहलस्तिर्यगसख्यातद्वीपसमुद्रप्रमाणो घनोदधिपर्यन्तः । उक्तं च––

"णउदुत्तरसत्तसया दससीदी[1] चदुगं तियचउक्कं ।
ताराविससिरिक्खा बुहभग्गवगुरुअंगिरारसणी[2] ॥"

ज्योतिष्काणां गतिविशेषप्रतिपत्त्यर्थमाह––

मेरुप्रदक्षिणा नित्यगतयो नृलोके ॥१३॥　　५

मेरो प्रदक्षिणा मेरुप्रदक्षिणा । 'मेरुप्रदक्षिणा' इति वचनं गतिविशेषप्रतिपत्त्यर्थं विपरीता गतिर्मा विज्ञायीति । 'नित्यगतय' इति विशेषणमनुपरतक्रियाप्रतिपादनार्थम् । 'नृलोक' ग्रहणं विषयार्थम् । अर्धतृतीयेषु द्वीपेषु द्वयोश्च समुद्रयोर्ज्योतिष्का नित्यगतयो नान्यत्रेति । ज्योतिष्कविमानानां गतिहेत्वभावात्तद्वृत्त्यभाव इति चेत् ? न; असिद्धत्वात् गतिरताभियोग्यदेवप्रेरितगतिपरिणामात्कर्मविपाकस्य वैचित्र्यात् । तेषां　१० हि गतिमुखेनैव कर्म विपच्यत इति । एकादशभिर्योजनशतैरेकविंशैर्मेरुमप्राप्य ज्योतिष्काः प्रदक्षिणाश्चरन्ति ।

द्वीप समुद्रप्रमाण लम्बा है। कहा भी है––

'इस पृथिवी तलसे सात सौ नब्बे योजन ऊपर जाकर ताराएँ हैं। पुन दस योजन ऊपर जाकर सूर्य है। पुन. अस्सी योजन ऊपर जाकर चन्द्रमा है। पुन चार योजन ऊपर जाकर नक्षत्र और चार　१५ योजन ऊपर जाकर बुध है। पुन चार बार तीन योजन ऊपर जाकर अर्थात् तीन तीन योजन ऊपर जाकर क्रमसे शुक्र, गुरु, मगल और शनि है ॥'

अब ज्योतिषी देवोंकी गतिविशेषका ज्ञान करानेके लिये आगेका सूत्र कहते हैं––

ज्योतिषी देव मनुष्यलोकमें मेरुकी प्रदक्षिणा करनेवाले और निरन्तर गतिशील हैं ॥१३॥

'मेरुप्रदक्षिणा' इस पदमे षष्ठी तत्पुरुष समास है। 'मेरुप्रदक्षिणा' यह वचन गतिविशेषका ज्ञान　२० करानेके लिये और कोई विपरीत गति न समझ बैठे इसके लिये दिया है। वे निरन्तर गतिरूप क्रिया युक्त है इस बातका ज्ञान करानेके लिये 'नित्यगतय' पद दिया है। इस प्रकारके ज्योतिषी देवोंका क्षेत्र बतलानेक लिय 'नृलोक' पदका ग्रहण किया है। तात्पर्य यह है कि ढाई द्वीप और दो समुद्रोंमे ज्योतिषी दव निरन्तर गमन करत रहते है अन्यत्र नही।

शका––ज्योतिषी देवोके विमानोकी गतिका कारण नही पाया जाता, अत उनका गमन नही　२५ बन सकता ?

समाधान––नही, क्योकि यह हेतु असिद्ध है। बात यह है कि गमन करनेमे रत जो आभियोग्य जातिके देव है उनसे प्रेरित होकर ज्योतिषी देवोके विमानोका गमन होता रहता है।

यदि कहा जाय कि आभियोग्य जातिके देव निरन्तर गतिमे ही क्यो रत रहते है तो उसका उत्तर यह है कि यह कर्मके परिपाककी विचित्रता है। उनका कर्म गतिरूपसे ही फलता है। यही कारण है　३०

---

(१) सीदि चदुतिय दुगचउक्क। तारा-ता०, ना०, तत्त्वा० (२) 'णउदुत्तरसत्तसए दस सीदी चदुदुगे तियचउक्के। तारिणससिरिक्खबुहा सुक्कगुरुगारमंदगदी।'- ति०, सा०, गा० ३३२।

गतिमज्ज्योतिस्सम्बन्धेन व्यवहारकालप्रतिपत्त्यर्थमाह—

तत्कृतः कालविभागः ॥ १४ ॥

'तद्'ग्रहणं गतिमज्ज्योतिःप्रतिनिर्देशार्थम् । न केवलया गत्या नापि केवलैर्ज्योतिर्भिः कालः परिच्छिद्यते; अनुपलब्धेरपरिवर्तनाच्च । कालो द्विविधो व्यावहारिको मुख्यश्च । व्यावहारिकः कालविभागस्तत्कृतः समयावलिकादिः क्रियाविशेषपरिच्छिन्नोऽन्यस्यापरिच्छिन्नस्य परिच्छेदहेतुः । मुख्योऽन्यो वक्ष्यमाणलक्षणः ।

कि वे निरन्तर गमन करनेमें ही रत रहते हैं।

यद्यपि ज्योतिषी देव मेरु पर्वतकी प्रदक्षिणा करते हैं तो भी वे मेरु पर्वतसे ग्यारहसौ इक्कीस योजन दूर रह कर ही विचरण करते हैं।

अब गमन करनेवाले ज्योतिषियोंके सम्बन्धसे व्यवहार-कालका ज्ञान करानेके लिये आगेका सूत्र कहते हैं—

उन गमन करनेवाले ज्योतिषियों के द्वारा किया हुआ कालविभाग है ॥१४॥

गमन करनेवाले ज्योतिषी देवोंका निर्देश करनेके लिये 'तत्' पदका ग्रहण किया है। केवल गतिसे कालका निर्णय नहीं हो सकता क्योंकि वह पाई नहीं जाती और गतिके बिना केवल ज्योतिसे भी काल का निर्णय नहीं हो सकता क्योंकि परिवर्तनके बिना वह सदा एकसी रहेगी। यही कारण है कि यहाँ 'तत्' पदके द्वारा गतिवाले ज्योतिषियोंका निर्देश किया है।

काल दो प्रकारका है—व्यवहारकाल और मुख्यकाल। इनमेंसे समय और आवलि आदि रूप व्यावहारिक कालका विभाग गतिवाले ज्योतिषी देवोंके द्वारा किया हुआ है। यह क्रिया विशेषसे जाना जाता है और अन्य नहीं जानी हुई वस्तुओं के जाननेका हेतु है। मुख्य काल इससे भिन्न है जिसका लक्षण आगे कहनेवाले हैं।

विशेषार्थ—मनुष्य मानुषोत्तर पर्वतके भीतर पाये जाते हैं। मानुषोत्तर पर्वतके एक ओरसे लेकर दूसरी ओरतक कुल विस्तार पैंतालीस लाख योजन है। मनुष्य इसी क्षेत्रमें पाये जाते हैं। इसलिये यह मनुष्यलोक कहलाता है। इस लोकमें ज्योतिष्क सदा भ्रमण किया करते हैं। इनका भ्रमण मेरुके चारों ओर होता है। मेरुके चारों ओर ग्यारहसौ इक्कीस योजन तक ज्योतिष्क मंडल नहीं है। इसके आगे आकाशमें सर्वत्र बिखरा हुआ है। जम्बूद्वीप में दो सूर्य और दो चन्द्र हैं। एक सूर्य जम्बूद्वीपकी पूरी प्रदक्षिणा दो दिन रातमें करता है। इसका चार क्षेत्र जम्बूद्वीपमें १८० योजन और लवण समुद्रमें ३३० $\frac{४८}{६१}$ योजन माना गया है। सूर्य के घूमनेकी कुल गलियाँ १८४ हैं। इनमें यह क्षेत्र विभाजित हो जाता है। एक गलीसे दूसरी गलीमें २ योजन का अन्तर माना गया है। इसमें सूर्यबिम्बके प्रमाणको मिला देनेपर वह २$\frac{४८}{६१}$ योजन होता है। इतना उदयान्तर है। मण्डलान्तर दो योजन का ही है। चन्द्रको पूरी प्रदक्षिणा करनेमें दो दिन रातसे कुछ अधिक समय लगता है। चन्द्रोदयमें न्यूनाधिकता इसीसे आती है। लवण समुद्रमें चार सूर्य, चार चन्द्र, धातकीखण्डमें बारह सूर्य, बारह

इतरत्र ज्योतिषामवस्थानप्रतिपादनार्थमाह—

बहिरवस्थिताः ॥ १५ ॥

'बहिः'इत्युच्यते। कुतो बहिः ? नृलोकात्। कथमवगम्यते ? अर्थवशाद्विभक्ति-परिणामो भवति। ननु च नृलोके 'नित्यगति'वचनादन्यत्रावस्थानं ज्योतिष्काणां सिद्धम्। अतो बहिरवस्थिता इति वचनमनर्थकमिति ? तन्न; किं कारणम् ? [1]नृलोकादन्यत्र हि ज्योतिषामस्तित्वमवस्थानं चासिद्धम्। अतस्तदुभयसिद्ध्यर्थं बहिरवस्थिता इत्युच्यते। विपरीतगतिनिवृत्त्यर्थं कादाचित्कगतिनिवृत्त्यर्थं च सूत्रमारब्धम्। ५

तुरीयस्य निकायस्य सामान्यसञ्ज्ञासङ्कीर्तनार्थमाह—

चन्द्र, कालोदधिमे ब्यालीस सूर्य, ब्यालीस चन्द्र और पुष्करार्धमे बहत्तर सूर्य, बहत्तर चन्द्र है। इस प्रकार ढाई द्वीप में एक सौ बत्तीस सूर्य और एक सौ बत्तीस चन्द्र है। इन दोनो मे चन्द्र इन्द्र और सूर्य १० प्रतीन्द्र है। एक एक चन्द्रका परिवार एक सूर्य, अट्ठाईस नक्षत्र, अठासी ग्रह और छ्यासठ हजार नौ सौ कोड़ाकोड़ी तारे है। इन ज्योतिष्कोका गमन स्वभाव है तो भी आभियोग्य देव सूर्य आदिके विमानोको निरन्तर ढोया करते है। ये देव सिंह, गज, बैल और घोड़ेका आकार धारण किये रहते है। सिंहाकार देवोका मुख पूर्व दिशाकी ओर रहता है। तथा गजाकार देवोका मुख दक्षिण दिशाकी ओर, वृषभाकार देवोंका मुख पश्चिम की ओर, और अश्वाकार देवोका मुख उत्तर दिशा की ओर रहता है। १५

अब ढाई द्वीपके बाहर ज्योतिषियोके अवस्थानका कथन करनेके लिये आगेका सूत्र कहते है—

मनुष्य-लोकके बाहर ज्योतिषी देव स्थिर रहते हैं ॥१५॥

सूत्र में 'बहि.' पद दिया है।

शंका—किससे बाहर ?

समाधान—मनुष्य-लोकसे बाहर। २०

शंका—यह कैसे जाना जाता है ?

द्रव्यमें जो परिस्पन्दरूप परिणमन होता है उसे क्रिया कहते हैं। प्रायोगिक और वैस्रसिकके भेदसे वह दो प्रकारकी है। उनमेंसे गाड़ी आदिकी प्रायोगिकी क्रिया है और मेघादिककी वैस्रसिकी।

२५ परत्व और अपरत्व दो प्रकारका है—क्षेत्रकृत और कालकृत। प्रकृतमें कालकृत उपकारका प्रकरण है इसलिये कालकृत परत्व और अपरत्व लिये गये हैं। ये सब वर्तनादिक उपकार कालके अस्तित्वका ज्ञान कराते हैं।

---

(१) कारीषाऽग्नि–आ.। (२) 'हेतुर्निर्देशश्च निमित्तमात्रे भिक्षादिषु दर्शनात्। हेतुर्निर्देशश्च निमित्तमात्रे दृष्टव्य.। यावद् ब्रूयान्निमित्तं कारणमिति तावद्धेतुरिति। कि प्रयोजनम्? भिक्षादिषु दर्शनात्। भिक्षादिष्वपि णिज्दृश्यते भिक्षा वासयन्ति कारीषोऽग्निरध्यापयति इति।'–पा. म. भा. ३, १, २, २६। (३) दिष्वसंज्ञा–मु.। (४) पाककालः मु.। (५)–त्मिका। परत्वापरत्वे ता.। (६) कालोपकरणा–मु.।

तद्भेदाः परिणामादयस्तेषां पृथग्ग्रहणमनर्थकम् ? नानर्थकम्; कालद्वयसूचनार्थत्वात्प्रपञ्चस्य। कालो हि द्विविध. परमार्थकालो व्यवहारकालश्च। परमार्थकालो वर्तनालक्षणः। परिणामादिलक्षणो व्यवहारकालः। अन्येन परिच्छिन्नः अन्यस्य परिच्छेदहेतुः क्रियाविशेष. काल इति व्यवह्रियते। स त्रिधा व्यवतिष्ठते भूतो वर्तमानो भविष्यन्निति। तत्र परमार्थकाले कालव्यपदेशो मुख्यः। भूतादिव्यपदेशो गौण.। व्यवहारकाले भूतादिव्यपदेशो मुख्यः। कालव्यपदेशो गौणः; क्रियावद्द्रव्यापेक्षत्वात्कालकृतत्वाच्च। ५

अत्राह, धर्माधर्माकाशपुद्गलजीवकालानामुपकारा उक्ताः। लक्षणं चोक्तम् 'उपयोगो लक्षणम्'इत्येवमादि। पुद्गलानां तु सामान्यलक्षणमुक्तम्[1] 'अजीवकायाः' इति। विशेषलक्षणं नोक्तम्। तत्किमित्यत्रोच्यते—

स्पर्शरसगन्धवर्णवन्तः पुद्गलाः ॥ २३ ॥ १०

स्पृश्यते स्पर्शनमात्रं वा स्पर्शः। सोऽष्टविधः, मृदुकठिनगुरुलघुशीतोष्णस्निग्धरूक्षभेदात्। रस्यते रसनमात्रं वा रसः। स पञ्चविधः; तिक्ताम्लकटुकमधुरकषायभेदात्।

शंका—सूत्रमे केवल वर्तना पदका ग्रहण करना पर्याप्त है। परिणाम आदिक उसके भेद है अतः उनका अलगसे ग्रहण करना निष्फल है।

समाधान—परिणाम आदिकका अलगसे ग्रहण करना निष्फल नही है, क्योकि दो प्रकारके कालके सूचन करनेके लिये इतना विस्तारसे कथन किया है। काल दो प्रकारका है—परमार्थ काल और व्यवहारकाल। इनमेसे परमार्थ काल वर्तना लक्षणवाला है और परिणाम आदि लक्षणवाला व्यवहार काल है। तात्पर्य यह है कि जो क्रिया विशेष अन्यसे परिच्छिन्न होकर अन्यके परिच्छेदका हेतु है उसमें काल इस प्रकारका व्यवहार किया गया है। वह काल तीन प्रकारका है—भूत, वर्तमान और भविष्यत्। उनमेसे परमार्थ काल मे काल यह संज्ञा मुख्य है और भूतादिक व्यपदेश गौण है। तथा व्यवहार कालमे भूतादिक रूप संज्ञा मुख्य है और काल संज्ञा गौण है, क्यो कि इस प्रकारका व्यवहार क्रियावाले द्रव्यकी अपेक्षासे होता है तथा कालका कार्य है। १५ २०

यहापर शंकाकार कहता है कि धर्म, अधर्म, आकाश, पुद्गल, जीव और काल द्रव्यका उपकार कहा तथा 'उपयोगो लक्षणम्' इत्यादि सूत्र द्वारा इनका लक्षण भी कहा। इसी प्रकार 'अजीवकाया' इत्यादि सूत्र द्वारा पुद्गलोंका सामान्य लक्षण भी कहा किन्तु पुद्गलोका विशेष लक्षण नही कहा, इसलिये आगेका सूत्र कहते है— २५

स्पर्श, रस, गन्ध और वर्णवाले पुद्गल होते हैं ॥ २३ ॥

जो स्पर्श किया जाता है उसे या स्पर्शनमात्रको स्पर्श कहते है। कोमल, कठोर, भारी, हलका, ठंडा, गरम, स्निग्ध और रूक्षके भेदसे वह आठ प्रकारका है। जो स्वाद रूप होता है या स्वादमात्रको रस कहते है। तीता, खट्टा, कडुआ, मीठा और कसैलाके भेदसे वह पांच प्रकारका है। जो सूँघा ३०

---

(१)–मुक्त विशेष–आ., दि. १, दि. २।

गन्ध्यते गन्धनमात्रं वा गन्धः। स द्वेधा; सुरभिरसुरभिश्[1]रिति। वर्ण्यते वर्णनमात्रं वा वर्णः। स पञ्चविधः; कृष्णनीलपीतशुक्ललोहितभेदात्। त एते मूलभेदाः प्रत्येकं संख्येयासंख्येयानन्तभेदाश्च भवन्ति। स्पर्शश्च रसश्च गन्धश्च वर्णश्च स्पर्शरसगन्धवर्णास्त एतेषां सन्तीति स्पर्शरसगन्धवर्णवन्त इति। नित्ययोगे मतु[2]र्निर्देशः। यथा क्षीरिणो न्यग्रोधा इति। ननु च रूपिणः पुद्गला इत्यत्र पुद्गलानां रूपवत्त्वमुक्तं तदविनाभाविनश्च रसादयस्तत्रैव परिगृहीता इति व्याख्यातं तस्मात्तेनैव पुद्गलानां रूपादिमत्त्वसिद्धेः सूत्रमिदमनर्थकमिति? नैष दोषः; 'नित्यावस्थितान्यरूपाणि' इत्यत्र धर्मादीनां नित्यत्वादिनिरूपणेन पुद्गलानामरूपित्वप्रसङ्गे तदपाकरणार्थं तदुक्तम्। इदं तु तेषां स्वरूपविशेषप्रतिपत्त्यर्थमुच्यते।

अवशिष्टपुद्गलविकारप्रतिपत्त्यर्थमिदमुच्यते—

शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायाऽऽतपोद्योतवन्तश्च ॥ २४ ॥

शब्दो द्विविधो भाषालक्षणो विपरीतश्चेति। भाषालक्षणो द्विविधः साक्षरोऽनक्षर-

---

जाता है या सूंघनेमात्रको गन्ध कहते हैं। सुगन्ध और दुर्गन्धके भेदसे वह दो प्रकारका है। जिसका कोई वर्ण है या वर्णमात्रको वर्ण कहते हैं। काला, नीला, पीला, सफेद और लालके भेदसे वह पांच प्रकारका है। ये स्पर्श आदिके मूल भेद हैं। वैसे प्रत्येकके संख्यात, असंख्यात और अनन्त भेद होते हैं। इस प्रकार ये स्पर्श, रस, गन्ध और वर्ण जिनमें पाये जाते हैं वे स्पर्श, रस, गन्ध और वर्णवाले कहे जाते हैं। इनका पुद्गल द्रव्यसे सदा सम्बन्ध है यह बतलानेके लिये 'मतुप्' प्रत्यय किया है। जैसे 'क्षीरिणो न्यग्रोधाः'। यहां न्यग्रोध वृक्षमें दूधका सदा सम्बन्ध बतलानेके लिये 'णिनी' प्रत्यय किया है। उसी प्रकार प्रकृतमें जानना चाहिए।

शंका—'रूपिणः पुद्गलाः' इस सूत्रमें पुद्गलोंको रूपवाला बतला आये हैं। और रसादिक वहीं रहते हैं जहां रूप पाया जाता है; क्योंकि इनका परस्परमें सहचर नामका अविनाभाव सम्बन्ध है इसलिये रूपके ग्रहण करनेसे रसादिकका ग्रहण हो ही जाता है यह भी पहले बतला आये हैं; इसलिये उसी सूत्रके बलसे पुद्गल रूपादिवाला सिद्ध हो जाता है अतः यह सूत्र निष्फल है?

समाधान—यह कोई दोष नहीं है; क्योंकि 'नित्यावस्थितान्यरूपाणि' इस सूत्रमें धर्मादिक द्रव्योंको नित्य आदि रूपसे निरूपण किया है इससे पुद्गलोंको अरूपत्व प्राप्त हुआ अतः इस दोषके दूर करनेके लिये 'रूपिणः पुद्गलाः' यह सूत्र कहा है। परन्तु यह सूत्र पुद्गलोंके स्वरूप विशेषका ज्ञान करानेके लिये कहा है।

अब पुद्गलोंकी शेष रहीं पर्यायोंका ज्ञान करानेके लिये आगेका सूत्र कहते हैं—

तथा वे शब्द, बन्ध, सूक्ष्मत्व, स्थूलत्व, संस्थान, भेद, अन्धकार, छाया, आतप और उद्योतवाले होते हैं ॥ २४ ॥

भाषारूप शब्द और अभाषारूप शब्द इस प्रकार शब्दोंके दो भेद हैं। भाषात्मक शब्द दो प्रकारके

---

(१) सुरभिदुरभि–आ., दि. १, दि. २। (२) वन्निर्देशः मु.। मन्निर्देशः ना.।

श्चेति । अक्षरीकृत शास्त्राभिव्यञ्जक संस्कृतविपरीतभेदादार्यम्लेच्छव्यवहारहेतु. । अनक्षरात्मको द्वीन्द्रियादीनामतिशयज्ञानस्वरूपप्रतिपादनहेतुः । स एष सर्व प्रायोगिकः । अभाषात्मको द्विविध प्रायोगिको वैस्रसिकश्चेति । वैस्रसिको वलाहकादिप्रभव । प्रायोगिकश्चतुर्धा, ततविततघनसौषिरभेदात् । तत्र चर्मतननिमित्त. पुष्करभेरीदर्दुरादिप्रभव स्तत.। तन्त्रीकृतवीणासुघोषादिसमुद्भवो वितत.। तालघण्टालालनाद्यभिघातजो घन । ५ वंशशङ्खादिनिमित्तः सौषिरः ।

बन्धो द्विविधो वैस्रसिक. प्रायोगिकश्च । पुरुषप्रयोगानपेक्षो वैस्रसिक. । तद्यथा—स्निग्धरूक्षत्वगुणनिमित्तो विद्युदुल्काजलधाराग्नीन्द्रधनुरादिविषय । पुरुषप्रयोगनिमित्त प्रायोगिक अजीवविषयो जीवाजीवविषयश्चेति द्विधा भिन्न.। तत्राजीवविषयो जतुकाष्ठादिलक्षण. । जीवाजीवविषय कर्मनोकर्मबन्ध. । १०

सौक्ष्म्य द्विविधं, अन्त्यमापेक्षिक च । तत्रान्त्यं परमाणूनाम् । आपेक्षिकं विल्वामलकबदरादीनाम् ।

स्थौल्यमपि द्विविधमन्त्यमापेक्षिक चेति । तत्रान्त्य जगद्व्यापिनि महास्कन्धे । आपेक्षिकं बदरामलकविल्वतालादिषु ।

है—साक्षर और अनक्षर। जिसमे शास्त्र रचे जाते है और जिससे आर्य और म्लेच्छोका व्यवहार १५ चलता है ऐसे सस्कृत शब्द और इससे विपरीत शब्द ये सब साक्षर शब्द है। जिससे उनके सातिशय ज्ञानके स्वरूपका पता लगता है ऐसे दो इन्द्रिय आदि जीवोके शब्द अनक्षरात्मक शब्द है। ये दोनो प्रकारके शब्द प्रायोगिक है। अभाषात्मक शब्द दो प्रकारके है—प्रायोगिक और वैस्रसिक। मेघ आदि के निमित्तसे जो शब्द उत्पन्न होते है वे वैस्रसिक शब्द है। तथा तत, वितत, घन और सौषिरके भेदसे प्रायोगिक शब्द चार प्रकारके है। चमडेसे मढे हुए पुष्कर, भेरी और दर्दुरसे जो शब्द उत्पन्न होता है २० वह तत शब्द है। तातवाले वीणा और सुघोष आदिसे जो शब्द उत्पन्न होता है वह वितत शब्द है। ताल, घण्टा और लालन आदिके ताडनसे जो शब्द उत्पन्न होता है वह घन शब्द है। तथा बासुरी और शख आदिके फूंकनेसे जो शब्द उत्पन्न होता है वह सौषिर शब्द है। बन्धके दो भेद है—वैस्रसिक और प्रायोगिक। जिसमे पुरुषका, प्रयोग अपेक्षित नही है वह वैस्रसिक बन्ध है। जैसे, स्निग्ध और रूक्ष गुण के निमित्तसे होनेवाला बिजली, उल्का, मेघ, अग्नि और इन्द्रधनुष आदिका विषयभूत बन्ध वैस्रसिक २५ बन्ध है। और जो बन्ध पुरुषके प्रयोगके निमित्तसे होता है वह प्रायोगिक बन्ध है। इसके दो भेद है—अजीवसम्बन्धी और जीवाजीवसम्बन्धी। लाख और लकड़ी आदिका अजीव सम्बन्धी प्रायोगिक बन्ध है। तथा कर्म और नोकर्मका जो जीवसे बन्ध होता है वह जीवाजीवसम्बन्धी प्रायोगिक बन्ध है।

सूक्ष्मताके दो भेद है—अन्त्य और आपेक्षिक। परमाणुओमे अन्त्य सूक्ष्मत्व है। तथा वेल, आवला और बेर आदिमे आपेक्षिक सूक्ष्मत्व है। ३०

स्थौल्य भी दो प्रकारका है—अन्त्य और आपेक्षिक। जगव्यापी महास्कन्धमे अन्त्य स्थौल्य है। तथा बेर, आंवला और वेल आदिमे आपेक्षिक स्थौल्य है।

संस्थानमाकृतिः । तद् द्विविधमित्थंलक्षणमनित्थंलक्षणं चेति । वृत्तत्र्यस्रचतुरस्रायत-परिमण्डलादीनामित्थंलक्षणम् । अतोऽन्यन्मेघादीनां संस्थानमनेकविधमित्थमिदमिति निरूपणाभावादनित्थंलक्षणम् ।

भेदाः षोढा; उत्करचूर्णखण्डचूर्णिकाप्रतराणुचटनविकल्पात् । तत्रोत्करः काष्ठा-
५ दीनां करपत्रादिभिरुत्करणम् । चूर्णो यवगोधूमादीनां सक्तुकणिकादिः । खण्डो घटादीनां कपालशर्करादिः । चूर्णिका माषमुद्गादीनाम् । प्रतरोऽभ्रपटलादीनाम् । अणुचटनं सन्तप्ताय पिण्डादिषु अयोघनादिभिरभिहन्यमानेषु स्फुलिङ्गनिर्गमः ।

तमो दृष्टिप्रतिबन्धकारणं प्रकाशविरोधि । छाया प्रकाशावरणनिमित्ता । सा द्वेधा, वर्णादिविकारपरिणता प्रतिबिम्बमात्रात्मिका चेति । आतप आदित्यादिनिमित्त उष्ण-
१० प्रकाशलक्षणः । उद्योतश्चन्द्रमणिखद्योतादिप्रभवः प्रकाशः ।

त एते शब्दादयः पुद्गलद्रव्यविकाराः । त एषां सन्तीति शब्दबन्धसौक्ष्म्यस्थौल्यसंस्था-नभेदतमश्छायाऽऽतपोद्योतवन्तः पुद्गला इत्यभिसम्बध्यते । 'च' शब्देन नोदनाभिघाता-दयः पुद्गलपरिणामा आगमे प्रसिद्धाः समुच्चीयन्ते ।

संस्थानका अर्थ आकृति है। इसके दो भेद हैं—इत्थंलक्षण और अनित्थंलक्षण। जिसके विषयमें
१५ 'यह संस्थान इस प्रकारका है' यह निर्देश किया जा सके वह इत्थंलक्षण संस्थान है। वृत्त, त्रिकोण, चतुष्कोण, आयत और परिमण्डल आदि ये सब इत्थंलक्षण संस्थान हैं। तथा इससे अतिरिक्त मेघ आदिके आकार जो कि अनेक प्रकारके है और जिनके विषयमें यह इस प्रकारका है यह नहीं कहा जा सकता वह अनित्थंलक्षण संस्थान है।

भेदके छह भेद हैं—उत्कर, चूर्ण, खण्ड, चूर्णिका, प्रतर और अणुचटन। करोंत आदिसे जो लकडी
२० आदिको चीरा जाता है वह उत्कर नामका भेद है। जौ और गेहूँ आदिका जो सत्तू और कनक आदि बनती है वह चूर्ण नामका भेद है। घट आदिके जो कपाल और शर्करा आदि टुकड़े होते हैं वह खण्ड नामका भेद है। उड़द और मूँग आदिका जो खण्ड किया जाता है वह चूर्णिका नामका भेद है। मेघके जो अलग अलग पटल आदि होते हैं वह प्रतर नामका भेद है। तपाये हुए लोहेके गोले आदिको घन आदिसे पीटने पर जो फुलंगे निकलते हैं वह अणुचटन नामका भेद है।

जिससे दृष्टिमें प्रतिबन्ध होता है और जो प्रकाशका विरोधी है वह तम कहलाता है।
२५ प्रकाशको रोकनेवाले पदार्थोंके निमित्तसे जो पैदा होती है वह छाया कहलाती है। उसके दो भेद हैं—एक तो वर्णादिके विकार रूपसे परिणत हुई और दूसरी प्रतिबिम्बरूप।

जो सूर्यके निमित्तसे उष्ण प्रकाश होता है उसे आतप कहते हैं। तथा चन्द्र, मणि और जुगुनू आदि-के निमित्तसे जो प्रकाश पैदा होता है उसे उद्योत कहते हैं।

ये सब शब्दादिक पुद्गल द्रव्यके विकार (पर्याय) है। इसीलिये सूत्रमें पुद्गलको इन शब्द, बन्ध,
३० सौक्ष्म्य, स्थौल्य, संस्थान, भेद, तम, छाया, आतप और उद्योतवाला कहा है। सूत्रमें दिये हुए 'च' शब्द से नोदन, अभिघात आदिक जो पुद्गलकी पर्यायें आगममें प्रसिद्ध हैं उनका संग्रह करना चाहिये।

उक्तानां पुद्गलाना भेदप्रदर्शनार्थमाह—

अणवः स्कन्धाश्च ॥ २५ ॥

प्रदेशमात्रभाविस्पर्शादिपर्यायप्रसवसामर्थ्येनाण्यन्ते शब्द्यन्त इत्यणव.। सौक्ष्म्यादात्मादय आत्ममध्या आत्मान्ताश्च ॥ उक्तं च—

"अत्तादि अत्तमज्झं अत्तंतं णेव इंदिये गेज्झं। ५
जं दव्वं अविभागी तं परमाणुं विआणाहि ॥"

स्थूलभावेन ग्रहणनिक्षेपणादिव्यापारस्कन्धनात्स्कन्धा इति सञ्ज्ञायन्ते। रूढौ क्रिया क्वचित्सती उपलक्षणत्वेनाश्रयते इति ग्रहणादिव्यापारायोग्येष्वपि द्व्यणुकादिषु स्कन्धाख्या प्रवर्तते। अनन्तभेदा अपि पुद्गला अणुजात्या स्कन्धजात्या च द्वैविध्यमापद्यमानाः सर्वे गृह्यन्त इति तज्जात्याधारानन्तभेदससूचनार्थं बहुवचनं क्रियते। अणवः स्कन्धा १० इति भेदाभिधानं पूर्वोक्तसूत्रद्वयभेदसम्बन्धनार्थम्। स्पर्शरसगन्धवर्णवन्तोऽणवः। स्कन्धा. पुनः शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवन्तश्च स्पर्शादिमन्तश्चेति।

आह, किमेषां पुद्गलानामणुस्कन्धलक्षणः परिणामोऽनादिरुत आदिमानित्युच्यते।

अब पूर्वोक्त पुद्गलोंके भेदोंका कथन करनेके लिये आगेका सूत्र कहते है—

पुद्गलके दो भेद हैं–अणु और स्कन्ध ॥ २५ ॥ १५

एक प्रदेशमे होनेवाले स्पर्शादि पर्यायको उत्पन्न करनेकी सामर्थ्य रूपसे जो 'अण्यन्ते' अर्थात् कहे जाते है वे अणु कहलाते है। तात्पर्य यह है कि अणु एकप्रदेशी होनेसे सबसे छोटा होता है इसलिये वह अणु कहलाता है। यह इतना सूक्ष्म होता है जिससे वही आदि है, वही मध्य है और वही अन्त है। कहा भी है—

'जिसका आदि, मध्य और अन्त एक है, और जिसे इन्द्रियाँ नही ग्रहण कर सकती ऐसा जो विभाग २० रहित द्रव्य है उसे परमाणु समझो।'

जिनमे स्थूलरूपसे पकडना, रखना आदि व्यापारका स्कन्धन अर्थात् संघटना होती है वे स्कन्ध कहे जाते है। रूढिमे क्रिया कही पर होती है, सर्वत्र नही। फिर भी उपलक्षणरूपसे वह ली जाती है, इसलिये ग्रहण आदि व्यापारके अयोग्य द्व्यणुक आदिकमे भी स्कन्ध सज्ञा प्रवृत्त होती है। पुद्गलोंके अनन्त भेद है तो भी वे सब अणुजाति और स्कन्धजातिके भेदसे दो प्रकारके है। इस प्रकार पुद्गलोकी २५ इन दोनो जातियोके आधारभूत अनन्त भेदोके सूचन करनेके लिये सूत्रमे बहुवचनका निर्देश किया है।

यद्यपि सूत्रमे अणु और स्कन्ध इन दोनो पदोको समसित रखा जा सकता था तब भी ऐसा न करके 'अणव स्कन्धा.' इस प्रकार भेद रूपसे जो कथन किया है वह इस सूत्रसे पहले कहे गये दो सूत्रोके साथ अलग अलग सम्बन्ध बतलानेके लिये किया है। जिससे यह ज्ञात हो कि अणु स्पर्श, रस, गन्ध और वर्णवाले है परन्तु स्कन्ध शब्द, बन्ध, सौक्ष्म्य, स्थौल्य, सस्थान, भेद, छाया, आतप और उद्योतवाले ३० है तथा स्पर्शादिवाले भी है।

इन पुद्गलोका अणु और स्कन्धरूप परिणाम होना अनादि है या सादि ? वह उत्पन्न होता इसलिये

स खलूत्पत्तिमत्त्वादादिमान्प्रतिज्ञायते । यद्येवं तस्मादभिधीयतां कस्मान्निमित्तादुत्पद्यन्त इति । तत्र स्कन्धानां तावदुत्पत्तिहेतुप्रतिपादनार्थमुच्यते—

भेदसंघातेभ्य उत्पद्यन्ते ॥ २६ ॥

संघातानां द्वितयनिमित्तवशाद्विदारणं भेदः । पृथग्भूतानामेकत्वापत्तिः संघातः ।
५ ननु च द्वित्वाद् द्विवचनेन भवितव्यम्? बहुवचननिर्देशस्त्रितयसंग्रहार्थः। भेदात्संघाताद् भेदसंघाताभ्यां च उत्पद्यन्त इति । तद्यथा—द्वयोः परमाण्वोः संघाताद् द्विप्रदेशः स्कन्ध उत्पद्यते । द्विप्रदेशस्याणोश्च त्रयाणां वा अणूनां संघातात्त्रिप्रदेशः । द्वयोर्द्विप्रदेशयोस्त्रिप्रदेशस्याणोश्च चतुर्णां वा अणूनां संघाताच्चतुःप्रदेशः । एवं संख्येयासंख्येयानन्तानामनन्तानन्तानां च संघातात्तावत्प्रदेशः । एषामेव भेदात्तावद् द्विप्रदेशपर्यन्ताः स्कन्धा उत्पद्यन्ते ।
१० एवं भेदसंघाताभ्यामेकसमयिकाभ्यां द्विप्रदेशादयः स्कन्धा उत्पद्यन्ते । अन्यतो भेदेनान्यस्य संघातेनेति । एवं स्कन्धानामुत्पत्तिहेतुरुक्तः ।

अणोरुत्पत्तिहेतुप्रदर्शनार्थमाह—

सादि है । यदि ऐसा है तो उस निमित्तका कथन करो जिससे अणु और स्कन्ध ये भेद उत्पन्न होते हैं? इसलिए पहले स्कन्धोकी उत्पत्ति के हेतुका कथन करनेके लिये आगेका सूत्र कहते है—

१५ **भेदसे, संघातसे तथा भेद और संघात दोनोंसे स्कन्ध उत्पन्न होते हैं ॥ २६ ॥**

अन्तरग और बहिरग इन दोनो प्रकारके निमित्तोसे सघातोके विदारण करनेको भेद कहते है। तथा पृथग्भूत हुए पदार्थोके एकरूप हो जानेको सघात कहते है।

शका—भेद और सघात दो है इसलिये सूत्रमे द्विवचन होना चाहिये ?

समाधान—तीनका सग्रह करनेके लिये सूत्रमे बहुवचनका निर्देश किया है। जिससे यह अर्थ
२० सम्पन्न होता है कि भेदसे, सघातसे तथा भेद और संघात इन दोनोसे स्कन्ध उत्पन्न होते हैं। खुलासा इस प्रकार है—

दो परमाणुओके संघातसे दो प्रदेशवाला स्कन्ध उत्पन्न होता है। दो प्रदेशवाले स्कन्ध और अणुके संघातसे या तीन अणुओके सघातसे तीन प्रदेशवाला स्कन्ध उत्पन्न होता है। दो प्रदेशवाले दो स्कन्धोके सघातसे, तीन प्रदेशवाले स्कन्ध और अणुके सघातसे या चार अणुओंके संघातसे चार प्रदेशवाला स्कन्ध
२५ उत्पन्न होता है। इस प्रकार संख्यात, असंख्यात, अनन्त और अनन्तानन्त अणुओंके सघातसे उतने उतने प्रदेशोवाले स्कन्ध उत्पन्न होते है। तथा इन्ही सख्यात आदि परमाणुवाले स्कन्धोके भेदसे दो प्रदेशवाले स्कन्ध तक स्कन्ध उत्पन्न होते है। इसी प्रकार एक समयमे होनेवाले भेद और संघात इन दोनोंसे दो प्रदेशवाले आदि स्कन्ध उत्पन्न होते है। तात्पर्य यह है कि जब अन्य स्कन्धसे भेद होता है और अन्यका संघात, तब एक साथ भेद और संघात इन दोनोसे भी स्कन्धकी उत्पत्ति होती है। इस प्रकार
३० स्कन्धोंकी उत्पत्तिका कारण कहा।

अब अणुकी उत्पत्तिके हेतुको दिखलानेके लिये आगेका सूत्र कहते है—

---

(१) तृतीय–मु. (२)–ख्येयानन्तानां च सघा–ता., ना.। (३) भेदाद्द्विप्रदे–ता., आ., दि. १, दि. २।

भेदादणुः ॥ २७ ॥

"सिद्धे[1] विधिरारभ्यमाणो नियमार्थो भवति ।" अणोरुत्पत्तिर्भेदादेव, न संघातान्नापि भेदसंघाताभ्यामिति ।

आह, संघातादेव स्कन्धानामात्मलाभे सिद्धे भेदसंघातग्रहणमनर्थकमिति तद्ग्रहणप्रयोजनप्रतिपादनार्थमिदमुच्यते— ५

भेदसंघाताभ्यां चाक्षुषः ॥२८॥

अनन्तानन्तपरमाणुसमुदयनिष्पाद्योऽपि कश्चिच्चाक्षुषः कश्चिदचाक्षुषः । तत्र योऽचाक्षुषः स कथं चाक्षुषो भवतीति चेदुच्यते—भेदसंघाताभ्यां चाक्षुषः । न भेदादिति । कात्रोपपत्तिरिति चेत् ? ब्रूमः, सूक्ष्मपरिणामस्य स्कन्धस्य भेदे सौक्ष्म्यापरित्यागादचाक्षुषत्वमेव । सौक्ष्म्यपरिणतः पुनरपरः सत्यपि तद्भेदेऽन्यसंघातान्तरसंयोगात्सौक्ष्म्यपरिणामोपरमे स्थौल्योत्पत्तौ चाक्षुषो भवति । १०

आह, धर्मादीनां द्रव्याणां विशेषलक्षणान्युक्तानि, सामान्यलक्षणं नोक्तम्, तद्वक्तव्यम् । उच्यते—

भेदसे अणु उत्पन्न होता है ॥ २७ ॥

कोई विधि सिद्ध हो, फिर भी यदि उसका आरम्भ किया जाता है तो वह नियमके लिये होती है । तात्पर्य यह है कि अणु भेदसे होता है यद्यपि यह सिद्ध है फिर भी 'भेदादणु' इस सूत्रके निर्माण करनेसे यह नियम फलित होता है कि अणुकी उत्पत्ति भेदसे ही होती है । न संघातसे होती है और न भेद और संघात इन दोनोंसे ही होती है । १५

जब संघातसे ही स्कन्धोकी उत्पत्ति होती है तब सूत्रमे भेद और संघात इन दोनों पदोंका ग्रहण करना निष्फल है ? अतः इन दोनों पदोंके ग्रहण करनेका क्या प्रयोजन है इसका कथन करनेके लिये आगेका सूत्र कहते है— २०

भेद और संघातसे चाक्षुष स्कन्ध बनता है ॥ २८ ॥

अनन्तानन्त परमाणुओंके समुदायसे निष्पन्न होकर भी कोई स्कन्ध चाक्षुष होता है और कोई अचाक्षुष । उसमे जो अचाक्षुष स्कन्ध है वह चाक्षुष कैसे होता है इसी बातके बतलानेके लिये यह कहा है कि भेद और सघातसे चाक्षुष स्कन्ध होता है, केवल भेदसे नही, यह इस सूत्रका अभिप्राय है । २५

शका—इसका क्या कारण है ?

समाधान—आगे उसी कारणको बतलाते है—सूक्ष्मपरिणामवाले स्कन्धका भेद होनेपर वह अपनी सूक्ष्मताको नही छोडता इसलिये उसमे अचाक्षुषपना ही रहता है । एक दूसरा सूक्ष्मपरिणामवाला स्कन्ध है जिसका यद्यपि भेद हुआ तथापि उसका दूसरे संघातसे संयोग हो गया अतः सूक्ष्मपना निकलकर उसमे स्थूलपनेकी उत्पत्ति हो जाती है और इसलिये वह चाक्षुष हो जाता है । ३०

धर्मादिक द्रव्यके विशेष लक्षण कहे, सामान्य लक्षण नही कहा, जो कहना चाहिये इसलिये

---

(१) 'सिद्धे सत्यारम्भो नियमार्थः' **न्यायसंग्रहः** ।

सद् द्रव्यलक्षणम् ॥ २९ ॥

यत्सत्तद् द्रव्यमित्यर्थः ।

यद्येवं तदेव तावद्वक्तव्यं किं सत् ? इत्यत आह—

उत्पादव्ययध्रौव्ययुक्तं सत् ॥ ३० ॥

५ चेतनस्याचेतनस्य वा द्रव्यस्य स्वां जातिमजहत्[1] उभयनिमित्तवशाद् भावान्तरावाप्तिरुत्पादनमुत्पादः मृत्पिण्डस्य घटपर्यायवत् । तथा पूर्वभावविगमनं व्ययः । यथा घटोत्पत्तौ पिण्डाकृतेः । अनादिपारिणामिकस्वभावेन व्ययोदयाभावाद् ध्रुवति स्थिरीभवतीति ध्रुवः । ध्रुवस्य भावः कर्म वा ध्रौव्यम् । यथा मृत्पिण्डघटाद्यवस्थासु मृदाद्यन्वयः । तैरुत्पादव्ययध्रौव्यैर्युक्तं[2] उत्पादव्ययध्रौव्ययुक्तं सदिति ।

१० आह, भेदे सति युक्तशब्दो दृष्टः । यथा दण्डेन युक्तो देवदत्त इति । तथा सति तेषां त्रयाणां तैर्युक्तस्य द्रव्यस्य चाभावः प्राप्नोति ? नैष दोषः; अभेदेऽपि कथञ्चिद् भेदनयापेक्षया युक्तशब्दो दृष्टः । यथा सारयुक्तः स्तम्भ इति । तथा सति तेषामविनाभावा-

---

अगले सूत्र द्वारा सामान्य लक्षण कहते हैं—

द्रव्यका लक्षण सत् है ॥ २९ ॥

१५ जो सत् है वह द्रव्य है यह इस सूत्रका भाव है।

यदि ऐसा है तो यही कहिये कि सत् क्या है ? इसलिये आगेका सूत्र कहते हैं—

जो उत्पाद, व्यय और ध्रौव्य इन तीनोंसे युक्त अर्थात् इन तीनोंरूप है वह सत् है ॥ ३० ॥

द्रव्य दो हैं चेतन और अचेतन। वे अपनी जातिको तो कभी नहीं छोड़ते फिर भी उनमें अन्तरंग और बहिरंग निमित्तके वशसे प्रति समय जो नवीन अवस्थाकी प्राप्ति होती है उसे उत्पाद कहते हैं। २० जैसे मिट्टीके पिडकी घट पर्याय। तथा पूर्व अवस्थाके त्यागको व्यय कहते हैं। जैसे घटकी उत्पत्ति होनेपर पिण्डरूप आकारका त्याग तथा जो अनादिकालीन पारिणामिक स्वभाव है उसका व्यय और उदय नहीं होता किन्तु वह 'ध्रुवति' अर्थात् स्थिर रहता है इसलिये उसे ध्रुव कहते हैं। तथा इस ध्रुवका भाव या कर्म ध्रौव्य कहलाता है। जैसे मिट्टीके पिण्ड और घटादि अवस्थाओंमें मिट्टीका अन्वय बना रहता है। इस प्रकार इन उत्पाद, व्यय और ध्रौव्यसे जो युक्त है वह सत् है।

२५ शंका—भेदके रहते हुए युक्त शब्द देखा जाता है। जैसे दण्डसे युक्त देवदत्त। यहां दण्ड और देवदत्तमें भेद है। प्रकृतमें भी यदि ऐसा मान लिया जाय तो उन तीनोंका और उन तीनोंसे युक्त द्रव्यका अभाव प्राप्त होता है।

समाधान—यह कोई दोष नहीं है; क्योंकि अभेदमें भी कथंचित् भेदग्राही नयकी अपेक्षा युक्त शब्दका प्रयोग देखा जाता है। जैसे सार युक्त स्तम्भ। ऐसी हालतमें उन तीनोंका परस्पर अविनाभाव सम्बन्ध होनेसे यहाँ युक्त शब्दका प्रयोग करना युक्त है।

३०

---

(१)–जहत निमित्त–आ., दि. १, दि. २। (२)–ध्रौव्यैर्युक्तं सदिति मु.।

त्सद्वचपदेशो युक्त.। समाधिवचनो वा युक्तशब्दः। युक्तः समाहितस्तदात्मक इत्यर्थः। उत्पादव्ययध्रौव्ययुक्तं सत् उत्पादव्ययध्रौव्यात्मकमिति यावत् । एतदुक्तं भवति—उत्पादादीनि[1] द्रव्यस्य लक्षणानि। द्रव्य लक्ष्यम्[2]। तत्र पर्यायार्थिकनयापेक्षया परस्परतो द्रव्याच्चार्थान्तरभावः ।· द्रव्यार्थिकनयापेक्षया व्यतिरेकेणानुपलब्धेरनर्थान्तरभावः । इति लक्ष्यलक्षणभावसिद्धि.। ५

अथवा यह युक्त शब्द समाधिवाची है। भाव यह है कि युक्त, समाहित और तदात्मक ये तीनो एकार्थवाची शब्द है। जिससे 'सत् उत्पाद, व्यय और ध्रौव्यसे युक्त है' इसका भाव 'सत् उत्पाद, व्यय और ध्रौव्यात्मक है' यह होता है। उक्त कथनका तात्पर्य यह है कि उत्पाद आदि द्रव्यके लक्षण है और द्रव्य लक्ष्य है। यदि इनका पर्यायार्थिक नयकी अपेक्षा विचार करते है तो ये आपसमे और द्रव्यसे पृथक् पृथक् है और यदि द्रव्यार्थिक नयकी अपेक्षा विचार करते है तो ये पृथक् पृथक् उपलब्ध नही होनेसे १० अभिन्न है। इस प्रकार इनमे और द्रव्यमे लक्ष्य-लक्षणभावकी सिद्धि होती है।

विशेषार्थ—यहाँ द्रव्यका लक्षण उत्पाद, व्यय और ध्रौव्य स्वभाव बतलाया है। अपनी जातिका त्याग किये बिना नवीन पर्यायकी प्राप्ति उत्पाद है, पूर्व पर्यायका त्याग व्यय है, और अनादि पारिणामिक स्वभावरूप अन्वयका बना रहना ध्रौव्य है। उदाहरणार्थ-कोयला जलकर राख हो जाता है, इसमे पुद्गलकी कोयला रूप पर्यायका व्यय होता है और क्षार रूप पर्यायका उत्पाद होता है किन्तु १५ दोनों अवस्थाओंमें पुद्गल द्रव्यका अस्तित्व बना रहता है। पुद्गलपनेका कभी भी नाश नही होता यही उसकी ध्रौव्यता है। आशय यह है कि प्रत्येक पदार्थ परिवर्तनशील है और उसमे यह परिवर्तन प्रति समय होता रहता है जैसे दूध कुछ समय बाद दही रूपसे परिणम जाता है और फिर दहीका मट्ठा बनालिया जाता है, यहाँ यद्यपि दूधसे दही और दहीसे मट्ठा ये तीन भिन्न भिन्न अवस्थाएँ हुई है पर है ये तीनो एक गोरस की ही। इसी प्रकार प्रत्येक द्रव्यमे अवस्था भेदके होनेपर भी उसका अन्वय पाया २० जाता है इसलिए वह उत्पाद, व्यय और ध्रौव्ययुक्त सिद्ध होता है। यह प्रत्येक द्रव्यका सामान्य स्वभाव है। अब प्रश्न यह होता है कि प्रत्येक द्रव्य एक साथ तीनरूप कैसे हो सकता है। कदाचित् कालभेदसे उसे उत्पाद और व्ययरूप मान भी लिया जाय क्योकि जिसका उत्पाद होता है उसका कालान्तरमे नाश अवश्य होता है। तथापि वह ऐसी अवस्थामे ध्रौव्यरूप नही हो सकता, क्योकि जिसका उत्पाद और व्यय होता है उसे ध्रौव्य स्वभाव माननेमे विरोध आता है। समाधान यह है कि अवस्थाभेदसे २५ द्रव्यमें ये तीनो धर्म माने गये है। जिस समय द्रव्यकी पूर्व अवस्था नाशको प्राप्त होती है उसी समय उसकी नई अवस्था उत्पन्न होती है फिर भी उसका त्रैकालिक अन्वय स्वभाव बना रहता है। इसी बातको आचार्य समन्तभद्रने इन शब्दोमे व्यक्त किया है—'घटका इच्छुक उसका नाश होनेपर दुखी होता है, मुकुटका इच्छुक उसका उत्पाद होनेपर हर्षित होता है और स्वर्णका इच्छुक न दुखी होता है न हर्षित होता है, वह मध्यस्थ रहता है। एक ही समयमे यह शोक, प्रमोद और माध्यस्थभाव बिना ३० कारणके नही हो सकता इससे प्रत्येक द्रव्य उत्पाद, व्यय और ध्रौव्ययुत है यह सिद्ध होता है।

(१)–दादीनि त्रीणि द्रव्य–मु.। (२) लक्ष्यम् । तत्पर्या–मु, आ,. दि १।

आह 'नित्यावस्थितान्यरूपाणि'इत्युक्तं तत्र न ज्ञायते किं नित्यमित्यत आह—

तद्भावाव्ययं नित्यम् ॥ ३१ ॥

'तद्भावः'इत्युच्यते । कस्तद्भावः ? प्रत्यभिज्ञानहेतुता। तदेवेदमिति स्मरणं प्रत्यभिज्ञानम् । तदकस्मान्न भवतीति योऽस्य हेतुः स तद्भावः[1]। भवनं भावः । तस्य भावस्तद्भावः । येनात्मना प्राग्दृष्टं वस्तु तेनैवात्मना पुनरपि भावात्तदेवेदमिति प्रत्यभिज्ञायते । यद्यत्यन्त[2]निरोधोऽभिनवप्रादुर्भावमात्रमेव वा स्यात्ततः स्मरणानुपपत्तिः । तदधीनो लोकसंव्यवहारो विरुध्यते । ततस्तद्भावेनाव्ययं[3] तद्भावाव्ययं नित्यमिति निश्चीयते । तत् तु कथञ्चिद्वेदितव्यम् । सर्वथा नित्यत्वे अन्यथाभावाभावात्संसारतद्विनिवृत्तिकारणप्रक्रियाविरोधः स्यात् ।

ननु इदमेव विरुद्धं तदेव नित्यं तदेवानित्यमिति । यदि नित्यं व्ययोदयाभावादनित्यताव्याघातः । अथानित्यमेव स्थित्यभावान्नित्यताव्याघात इति ? नैतद्विरुद्धम् । कुतः ?

'नित्यावस्थितान्यरूपाणि' यह सूत्र कह आये हैं। वहाँ यह नहीं ज्ञात होता कि नित्य क्या है इसलिये आगेका सूत्र कहते हैं—

उसके भावसे (अपनी जातिसे) च्युत न होना नित्य है ॥ ३१ ॥

अब तद्भाव इस पदका खुलासा करते हैं।

शंका—'तद्भाव' क्या वस्तु है ?

समाधान—जो प्रत्यभिज्ञानका कारण है वह तद्भाव है, 'वही यह है' इस प्रकारके स्मरणको प्रत्यभिज्ञान कहते हैं। वह अकस्मात् तो होता नहीं, इसलिये जो इसका कारण है वही तद्भाव है। इसकी निरुक्ति 'भवनं भावः, तस्य भावः तद्भावः' इस प्रकार होती है। तात्पर्य यह है कि पहले जिस रूप वस्तुको देखा है उसी रूप उसके पुन. होनेसे 'वही यह है' इस प्रकारका प्रत्यभिज्ञान होता है। यदि पूर्व वस्तुका सर्वथा नाश हो जाय या सर्वथा नई वस्तुका उत्पाद माना जाय तो इससे स्मरणकी उत्पत्ति नहीं हो सकती और स्मरणकी उत्पत्ति न हो सकनेसे स्मरणके आधीन जितना लोकसंव्यवहार चालू है वह सब विरोधको प्राप्त होता है। इसलिये जिस वस्तुका जो भाव है उस रूपसे च्युत न होना तद्भावाव्यय अर्थात् नित्य है ऐसा निश्चित होता है। परन्तु इसे कथंचित् जानना चाहिये। यदि सर्वथा नित्यता मान ली जाय तो परिणमनका सर्वथा अभाव प्राप्त होता है और ऐसा होनेसे संसार और इसकी निवृत्तिके कारण रूप प्रक्रियाका विरोध प्राप्त होता है।

शंका—उसीको नित्य कहना और उसीको अनित्य कहना यह विरुद्ध है। यदि नित्य है तो उसका व्यय और उत्पाद न होनेसे उसमें अनित्यता नहीं बनती। और यदि अनित्य है तो स्थितिका अभाव होनेसे नित्यताका व्याघात होता है ?

समाधान—नित्यता और अनित्यताका एक साथ रहना विरुद्ध नहीं है, क्योंकि—

(१) तद्भावः । तस्य मु.। (२)–त्यन्तविरोधो मु. । (३)–नाव्ययं नित्य–मु.।

अर्पितानर्पितसिद्धेः ॥ ३२ ॥

अनेकान्तात्मकस्य वस्तुनः प्रयोजनवशाद्यस्य कस्यचिद्धर्मस्य विवक्षया[1] प्रापितं प्राधान्यमर्पितमुपनीतमिति यावत् । तद्विपरीतमनर्पितम् । प्रयोजनाभावात् सतोऽप्यविवक्षा भवतीत्युपसर्जनीभूतमनर्पितमित्युच्यते । अर्पितं चानर्पितं चार्पितानर्पिते । ताभ्या सिद्धेरर्पितानर्पितसिद्धेर्नास्ति विरोध । तद्यथा—एकस्य देवदत्तस्य पिता पुत्रो भ्राता[2] भागिनेय इत्येवमादयः सम्बन्धा जनकत्वजन्यत्वादिनिमित्ता न विरुध्यन्ते; अर्पणाभेदात् । पुत्रापेक्षया पिता, पित्रपेक्षया पुत्र इत्येवमादिः । तथा द्रव्यमपि सामान्यार्पणया नित्यम्, विशेषार्पणयाऽनित्यमिति नास्ति विरोधः । तौ च सामान्यविशेषौ कथञ्चिद् भेदाभेदाभ्यां व्यवहारहेतू भवतः ।

अत्राह, सतोऽनेकनयव्यवहारतन्त्रत्वात् उपपन्ना भेदसंघातेभ्यः सतां स्कन्धा[3]त्मनोत्पत्तिः । इदं तु सन्दिग्धम्, कि संघातः संयोगादेव द्वचणुकादिलक्षणो भवति, उत कश्चिद्विशेषोऽवध्रियत इति ? उच्यते, 'सति संयोगे बन्धादेकत्वपरिणामात्मकात्संघातो निष्पद्यते ।

मुख्यता और गौणताकी अपेक्षा एक वस्तुमें विरोधी मालूम पड़नेवाले दो धर्मोंकी सिद्धि होती है ॥ ३२ ॥

वस्तु अनेकान्तात्मक है। प्रयोजनके अनुसार उसके किसी एक धर्मको विवक्षासे जब प्रधानता प्राप्त होती है तो वह अर्पित या उपनीत कहलाता है और प्रयोजनके अभावमे जिसकी प्रधानता नही रहती वह अनर्पित कहलाता है। तात्पर्य यह है कि किसी वस्तु या धर्मके रहते हुए भी उसकी विवक्षा नही होती इसलिये जो गौण हो जाता है वह अनर्पित कहलाता है। इन दोनोका 'अर्पितं च अनर्पित च' इस प्रकार द्वन्द्व समास है। इन दोनोकी अपेक्षा एक वस्तुमे परस्पर विरोधी दो धर्मोकी सिद्धि होती है इसलिये कोई विरोध नही है। खुलासा इस प्रकार है—

जैसे देवदत्तके पिता, पुत्र, भाई और भाजने इसी प्रकार और भी जनकत्व और जन्यत्व आदिके निमित्तसे होनेवाले सम्बन्ध विरोधको प्राप्त नही होते। जब जिस धर्मकी प्रधानता होती है उस समय उसमे वह धर्म माना जाता है। उदाहरणार्थ-पुत्रकी अपेक्षा वह पिता है और पिताकी अपेक्षा वह पुत्र है आदि। उसी प्रकार द्रव्य भी सामान्यकी अपेक्षा नित्य है और विशेषकी अपेक्षा अनित्य है इसलिये कोई विरोध नही है। वे सामान्य और विशेष कथचित् भेद और अभेद की अपेक्षा ही व्यवहारके कारण होते हैं।

शंका—सत् अनेक प्रकारके नय के व्यवहारके आधीन होनेसे भेद, संघात और भेद-संघातसे स्कन्धोकी उत्पत्ति भले ही बन जावे परन्तु यह संदिग्ध है कि द्वचणुक आदि लक्षणवाला संघात सयोगसे ही होता है या उसमे और कोई विशेषता है ?

समाधान—संयोगके होनेपर एकत्व परिणमन रूप बन्धसे संघातकी उत्पत्ति होती है।

(१) विवक्षाया–आ., दि. १, दि. २। (२) भ्राता माता भाग–मु.। (३) स्कन्धानामेवोत्प–दि. १, दि, २ आ.।

यद्येवमिदमुच्यतां, कतो[1] नु खलु पुद्गलजात्यपरित्यागे[2] संयोगे च सति भवति केषांचिद्बन्धोऽन्येषां च नेति ? उच्यते, यस्मात्तेषां पुद्गलात्माविशेषेऽप्यनन्तपर्यायाणां परस्परविलक्षणपरिणामादाहितसामर्थ्याद्भवन्प्रतीतः—

स्निग्धरूक्षत्वाद् बन्धः ॥ ३३ ॥

५ बाह्याभ्यन्तरकारणवशात् स्नेहपर्यायाविर्भावात् स्निह्यते[3] स्मेति स्निग्धः। तथा रूक्षणाद्रूक्षः। स्निग्धश्च रूक्षश्च स्निग्धरूक्षौ। तयोर्भावः स्निग्धरूक्षत्वम्। स्निग्धत्वं चिक्कणगुणलक्षणः पर्यायः। तद्विपरीतपरिणामो रूक्षत्वम्। 'स्निग्धरूक्षत्वात्' इति हेतुनिर्देशः। तत्कृतो बन्धो द्व्यणुकादिपरिणामः। द्वयोः स्निग्धरूक्षयोरण्वोः परस्परश्लेषलक्षणे बन्धे सति द्व्यणुकस्कन्धो भवति। एवं संख्येयासंख्येयानन्तप्रदेशः स्कन्धो योज्यः।

१० तत्र स्नेहगुण एकद्वित्रिचतुःसंख्येयासंख्येयानन्तविकल्पः। तथा रूक्षगुणोऽपि। तद्गुणाः परमाणवः सन्ति। यथा तोयाजागोमहिष्युष्ट्रीक्षीरघृतेषु स्नेहगुणः प्रकर्षाप्रकर्षेण प्रवर्तते। पांशुकणिकाशर्करादिषु च रूक्षगुणो दृष्टः। तथा परमाणुष्वपि स्निग्धरूक्षगुणयोर्वृत्तिः प्रकर्षाप्रकर्षेणानुमीयते।

शंका—यदि ऐसा है तो यह बतलाइये कि सब पुद्गलजातिके होकर भी उनका संयोग होनेपर

१५ किन्हीका बन्ध होता है और किन्हीका नही होता, इसका क्या कारण है ?

समाधान—चूँकि वे सब जातिसे पुद्गल हैं तो भी उनकी जो अनन्त पर्यायें हैं उनका परस्पर विलक्षण परिणमन होता है, इसलिये उससे जो सामर्थ्य उत्पन्न होती है उससे ऐसा प्रतीत होता है कि—

स्निग्धत्व और रूक्षत्वसे बन्ध होता है ॥ ३३ ॥

बाह्य और आभ्यन्तर कारणसे जो स्नेह पर्याय उत्पन्न होती है उससे पुद्गल स्निग्ध कहलाता

२० है। इसकी व्युत्पत्ति 'स्निह्यते स्मेति स्निग्धः' होगी। तथा रूखापनके कारण पुद्गल रूक्ष कहा जाता है। स्निग्ध पुद्गलका धर्म स्निग्धत्व है और रूक्ष पुद्गलका धर्म रूक्षत्व है। पुद्गलकी चिकने गुणरूप जो पर्याय है वह स्निग्धत्व है और इससे जो विपरीत परिणमन है वह रूक्षत्व है। सूत्रमें 'स्निग्धरूक्षत्वात्' इस प्रकार हेतुपरक निर्देश किया है। तात्पर्य यह है कि द्व्यणुक आदि लक्षणवाला जो बन्ध होता है वह इनका कार्य है। स्निग्ध और रूक्ष गुणवाले दो परमाणुओंका परस्पर संश्लेषलक्षण बन्ध होनेपर

२५ द्व्यणुक नामका स्कन्ध बनता है। इसी प्रकार संख्यात, असंख्यात और अनन्त प्रदेशवाले स्कन्ध उत्पन्न होते हैं। स्निग्ध गुणके एक, दो, तीन, चार, संख्यात, असंख्यात और अनन्त भेद है। इसी प्रकार रुक्ष गुणके भी एक, दो, तीन, चार, संख्यात, असंख्यात और अनन्त भेद हैं। और इन गुणवाले परमाणु होते हैं। जिस प्रकार जल तथा बकरी, गाय, भैंस और ऊंटके दूध और घीमें उत्तरोत्तर अधिक रूपसे स्नेह गुण रहता है तथा पांशु, कणिका और शर्करा आदिमें उत्तरोत्तर न्यूनरूपसे रूक्ष गुण रहता

३० है उसी प्रकार परमाणुओंमें भी न्यूनाधिकरूपसे स्निग्ध और रूक्ष गुण का अनुमान होता है।

---

(१)–कुतोऽत्र खलु दि. १, दि. २। (२)–त्यागे सति मु.। (३)–ह्यतेऽस्मिन्निति मु.।

स्निग्धरूक्षत्वगुणनिमित्ते बन्धे अविशेषेण प्रसक्ते अनिष्टगुणनिवृत्यर्थमाह—

न जघन्यगुणानाम् ॥ ३४ ॥

जघन्यो निकृष्टः । गुणो भागः । जघन्यो गुणो येषां ते जघन्यगुणाः । तेषां जघन्य गुणानां नास्ति बन्धः । तद्यथा—एकगुणस्निग्धस्यैकगुणस्निग्धेन द्व्यादिसंख्येयासंख्येयानन्तगुणस्निग्धेन वा नास्ति बन्धः । तस्यैवैकगुणस्निग्धस्य एकगुणरूक्षेण द्व्यादिसंख्येयासंख्येयानन्तगुणरूक्षेण वा नास्ति बन्धः । तथा एकगुणरूक्षस्यापि योज्यमिति ।　५

एतौ जघन्यगुणस्निग्धरूक्षौ वर्जयित्वा अन्येषां स्निग्धानां रूक्षाणां च परस्परेण बन्धो भवतीत्यविशेषेण प्रसङ्गे तत्रापि प्रतिषेधविषयख्यापनार्थमाह—

गुणसाम्ये सदृशानाम् ॥ ३५ ॥

'सदृश'ग्रहणं तुल्यजातीयसप्रत्ययार्थम् । 'गुणसाम्य'ग्रहणं तुल्यभागसंप्रत्ययार्थम् ।　१०
एतदुक्त भवति—द्विगुणस्निग्धानां द्विगुणरूक्षैः त्रिगुणस्निग्धानां त्रिगुणरूक्षैः द्विगुणस्निग्धानां द्विगुणस्निग्धैः द्विगुणरूक्षाणां द्विगुणरूक्षैश्चैत्येवमादिषु नास्ति बन्ध इति । यद्येवं 'सदृश'ग्रहणं किमर्थम् ? गुणवैषम्ये सदृशानामपि बन्धप्रतिपत्त्यर्थं 'सदृश'ग्रहणं क्रियते ।

स्निग्धत्व और रूक्षत्व गुणके निमित्तसे सामान्यसे बन्धके प्राप्त होनेपर बन्धमे अप्रयोजनीय गुणके निराकरण करनेके लिये आगेका सूत्र कहते हैं—　१५

जघन्य गुणवाले पुद्गलोंका बन्ध नहीं होता ॥ ३४ ॥

यहा जघन्य शब्दका अर्थ निकृष्ट है और गुण शब्दका अर्थ भाग है। जिनमे जघन्य गुण होता है अर्थात् जिनका शक्त्यंश निकृष्ट होता है वे जघन्य गुणवाले कहलाते है। उन जघन्य गुणवालोंका बन्ध नही होता। यथा—एक स्निग्ध शक्त्यंशवालेका एक स्निग्ध शक्त्यशवालेके साथ या दो से लेकर संख्यात, असंख्यात और अनन्त शक्त्यशवालोके साथ बन्ध नही होता। उसी प्रकार एक स्निग्ध शक्त्यशवालेका एक रूक्ष शक्त्यशवालेके साथ या दोसे लेकर सख्यात, असख्यात और अनन्त रूक्ष शक्त्यशवालो के साथ बन्ध नही होता। इसी प्रकार एक रूक्षशक्त्यशवालेकी भी योजना करनी चाहिए।　२०

इन जघन्य स्निग्ध और रूक्ष शक्त्यशवालोके सिवा अन्य स्निग्ध और रूक्ष पुद्गलोका परस्पर बन्ध सामान्य रीतिसे प्राप्त हुआ इसलिये इनमे भी जो बन्धयोग्य नही है उनका खुलासा करनेके लिये आगेका सूत्र कहते है—　२५

समान शक्त्यंश होने पर तुल्यजातिवालों का बन्ध नहीं होता ॥ ३५ ॥

तुल्य जातिवालोका ज्ञान करानेके लिये सदृश पदका ग्रहण किया है। तुल्य शक्त्यशोका ज्ञान करानेके लिये 'गुणसाम्य' पदका ग्रहण किया है। तात्पर्य यह है कि दो स्निग्ध शक्त्यंशवालोंका दो रूक्ष शक्त्यशवालोंके साथ, तीन स्तिग्ध शक्त्यंशवालोका तीन रूक्ष शक्त्यंशवालोके साथ, दो स्निग्ध शक्त्यंशवालों का दो स्निग्ध शक्त्यशवालोंके साथ, दो रूक्ष शक्त्यंशवालोका दो रूक्ष शक्त्यंशवालोके साथ बन्ध नही होता। इसी प्रकार अन्यत्र भी जानना चाहिए।　३०

शंका—यदि ऐसा है तो सूत्रमे 'सदृश' पद किसलिये ग्रहण किया है ?

अतो विषमगुणानां तुल्यजातीयानामतुल्यजातीयानां चानियमेन बन्धप्रसक्तौ इष्टार्थसंप्रत्ययार्थमिदमुच्यते--

द्व्यधिकादिगुणानां तु ॥ ३६ ॥

द्वाभ्यां गुणाभ्यामधिको द्व्यधिकः। कः पुनरसौ ? चतुर्गुणः। 'आदि'शब्दः प्रकारार्थः। ५ कः पुनरसौ प्रकारः ? द्व्यधिकता। तेन पञ्चगुणादीनां संप्रत्ययो न भवति। तेन द्व्यधिकादिगुणानां तुल्यजातीयानामतुल्यजातीयानां च बन्ध उक्तो भवति नेतरेषाम्। तद्यथा--द्विगुणस्निग्धस्य परमाणोरेकगुणस्निग्धेन द्विगुणस्निग्धेन त्रिगुणस्निग्धेन वा नास्ति बन्धः। चतुर्गुणस्निग्धेन पुनरस्ति बन्धः। तस्यैव पुनर्द्विगुणस्निग्धस्य पञ्चगुणस्निग्धेन षट्सप्ताष्टसंख्येयासंख्येयानन्तगुणस्निग्धेन वा बन्धो नास्ति। एवं त्रिगुणस्निग्धस्य पञ्चगुण १० स्निग्धेन बन्धोऽस्ति। शेषैः पूर्वोत्तरैर्न भवति। चतुर्गुणस्निग्धस्य षड्गुणस्निग्धेनास्ति

समाधान--शक्त्यंशोंकी असमानताके रहते हुए बन्ध होता है इस बातका ज्ञान करानेके लिये सूत्रमें सदृश पदको ग्रहण किया है।

इस उपर्युक्त कथनसे समानजातीय या असमानजातीय विषम शक्त्यंशवालोंका अनियमसे बन्ध प्राप्त हुआ अतः इष्ट अर्थका ज्ञान करानेके लिये आगेका सूत्र कहते है--

१५ **दो अधिक आदि शक्त्यंशवालोंका तो बन्ध होता है ॥ ३६ ॥**

जिसमें दो शक्त्यंश अधिक हों उसे द्व्यधिक कहते है।

शंका--वह द्व्यधिक कौन हुआ ?

समाधान--चार शक्त्यंशवाला।

सूत्रमें आदि शब्द प्रकारवाची है।

२० शंका--वह प्रकार रूप अर्थ क्या है ?

समाधान--द्व्यधिकपना।

इससे पांच शक्त्यंश आदिका ज्ञान नहीं होता। तथा इससे यह भी तात्पर्य निकल आता है कि समानजातीय या असमानजातीय दो अधिक आदि शक्त्यंशवालोंका बन्ध होता है दूसरोंका नहीं। जैसे--दो स्निग्ध शक्त्यंशवाले परमाणुका एक स्निग्ध शक्त्यंशवाले परमाणुके साथ, दो स्निग्ध शक्त्यंशवाले २५ परमाणुके साथ और तीन स्निग्ध शक्त्यंशवाले परमाणुके साथ बन्ध नहीं होता। हां, चार स्निग्ध शक्त्यंशवाले परमाणुके साथ अवश्य बन्ध होता है। तथा उसी दो स्निग्ध शक्त्यंशवाले परमाणुका पांच स्निग्ध शक्त्यंशवाले परमाणुके साथ, इसी प्रकार छह, सात, आठ, संख्यात, असंख्यात और अनन्त स्निग्ध शक्त्यंशवाले परमाणुके साथ बन्ध नही होता। इसी प्रकार तीन स्निग्ध शक्त्यंशवाले परमाणुका पांच स्निग्ध शक्त्यंशवाले परमाणुके साथ बन्ध होता है। किन्तु आगे पीछेके शेष स्निग्ध शक्त्यंशवाले परमाणु ३० के साथ बन्ध नहीं होता। चार स्निग्ध शक्त्यंशवाले परमाणुका छह स्निग्ध शक्त्यंशवाले परमाणुके

---

(१)–सक्तौ विशिष्टा मु.।

बन्धः। शेषैः पूर्वोत्तरैर्नास्ति। एवं शेषेष्वपि योज्यः। तथा द्विगुणरूक्षस्य एकद्वित्रिगुणरूक्षैर्नास्ति बन्धः। चतुर्गुणरूक्षेण त्वस्ति बन्धः। तस्यैव द्विगुणरूक्षस्य पञ्चगुणरूक्षादिभिरुत्तरैर्नास्ति बन्धः। एवं त्रिगुणरूक्षादीनामपि द्विगुणाधिकैर्बन्धो योज्यः। एवं भिन्नजातीयेष्वपि योज्यः। उक्तं च—

"णिद्धस्स णिद्धेण दुराधिएण लुक्खस्स लुक्खेण दुराधिएण। ५

णिद्धस्स लुक्खेण हवेइ बंधो जहण्णवज्जो विसमे समे वा॥"

'तु' शब्दो विशेषणार्थः। प्रतिषेधं व्यावर्तयति बन्धं च विशेषयति।

किमर्थमधिकगुणविषयो बन्धो व्याख्यातो न समगुणविषय इत्यत आह—

बन्धेऽधिकौ पारिणामिकौ च॥ ३७॥

अधिकाराद् 'गुण' शब्दः सम्बध्यते। अधिकगुणावधिकाविति। भावान्तरापादनं पारिणामिकत्वं क्लिन्नगुडवत्। यथा क्लिन्नो गुडोऽधिकमधुररसः परीतानां रेण्वादीनां स्वगुणापादनात्[1] पारिणामिकः। तथाऽन्योऽप्यधिकगुणः अल्पीयसः पारिणामिक इति १०

साथ बन्ध होता है किन्तु आगे पीछेके शेष स्निग्ध शक्त्यंशवाले परमाणुके साथ बन्ध नहीं होता। इसी प्रकार यह क्रम आगे भी जानना चाहिये। तथा दो रूक्ष शक्त्यंशवाले परमाणुका एक, दो और तीन रूक्ष शक्त्यंशवाले परमाणुके साथ बन्ध नहीं होता। हां, चार रूक्ष शक्त्यंशवाले परमाणुके साथ अवश्य बन्ध होता है। उसी दो रूक्ष शक्त्यंशवाले परमाणुका आगेके पांच आदि रूक्ष शक्त्यंशवाले परमाणुओंके साथ बन्ध नहीं होता। इसी प्रकार तीन आदि रूक्ष शक्त्यंशवाले परमाणुओंका भी दो अधिक शक्त्यंशवाले परमाणुओंके साथ बन्ध जान लेना चाहिये। समानजातीय परमाणुओंमें बन्धका जो क्रम बतलाया है विजातीय परमाणुओंमें भी बन्धका वही क्रम जानना चाहिये। कहा भी है— १५

'स्निग्धका दो अधिक शक्त्यंशवाले स्निग्धके साथ बन्ध होता है। रूक्षका दो अधिक शक्त्यंशवाले रूक्षके साथ बन्ध होता है। तथा स्निग्धका रूक्षके साथ सम या विषम गुणोंके होनेपर इसी नियमसे बन्ध होता है। किन्तु जघन्य शक्त्यंशवालेका बन्ध सर्वथा वर्जनीय है।' २०

सूत्र में 'तु' पद विशेषणपरक है जिससे बन्धके प्रतिषेधका निवारण होता है और बन्धका विधान होता है।

अधिक गुणवालेके साथ बन्ध होता है ऐसा क्यों कहा, समगुणवाले के साथ बन्ध होता है ऐसा क्यों नहीं कहा? अब इसी बातके बतलानेके लिये आगेका सूत्र कहते हैं— २५

बन्धके समय दो अधिक गुणवाला परिणमन करानेवाला होता है॥ ३७॥

'गुण' शब्दका अधिकार चला आ रहा है, इसलिये इस सूत्रमें उसका सम्बन्ध होता है जिससे 'अधिकौ' पदसे 'अधिकगुणौ' अर्थका ग्रहण होता है। गीले गुडके समान एक अवस्थासे दूसरी अवस्थाको प्राप्त कराना पारिणामिक कहलाता है। जैसे अधिक मीठे रसवाला गीला गुड उस पर पड़ी हुई धूलिको अपने गुणरूपसे परिणमानेके कारण पारिणामिक होता है उसी प्रकार अधिक गुणवाला अन्य भी अल्प ३०

---

(१)–गुणोत्पाद–मु., दि. २, ता.।

कृत्वा द्विगुणादिस्निग्धरूक्षस्य चतुर्गुणादिस्निग्धरूक्षः पारिणामिको भवति । ततः पूर्वावस्थाप्रच्यवनपूर्वकं तार्तीयिकमवस्थान्तरं प्रादुर्भवतीत्येकत्वमुपपद्यते । इतरथा हि शुक्लकृष्णतन्तुवत् संयोगे सत्यप्यपारिणामिकत्वात्सर्वं विविक्तरूपेणैवावतिष्ठेत । उक्तेन विधिना बन्धे पुनः सति ज्ञानावरणादीनां कर्मणां त्रिंशत्सागरोपमकोटीकोट्यादि-
५ स्थितिरुपपन्ना भवति ।

गुणवालेका पारिणामिक होता है। इस व्यवस्थाके अनुसार दो शक्त्यंशवाले स्निग्ध या रूक्ष परमाणुका चार शक्त्यंशवाला स्निग्ध या रूक्ष परमाणु पारिणामिक होता है। इससे पूर्व अवस्थाओंका त्याग होकर उनसे भिन्न एक तीसरी अवस्था उत्पन्न होती है। अत. उनमें एकरूपता आ जाती है। अन्यथा सफेद और काले तन्तुके समान संयोगके होनेपर भी पारिणामिक न होनेसे सब अलग अलग ही स्थित
१० रहेगा। परन्तु उक्त विधिसे बन्धके होनेपर ज्ञानावरणादि कर्मोंकी तीस कोडाकोडी सागर स्थिति बन जाती है।

विशेषार्थ—यहाँ एक परमाणुका अन्य परमाणुसे बन्ध कैसे होता है इसका विचार किया गया है। रूक्ष और स्निग्ध ये विरोधी गुण हैं। जिसमें स्निग्ध गुण होता है उसमें रूक्ष गुण नहीं होता और जिसमें रूक्ष गुण होता है उसमें स्निग्ध गुण नहीं होता। ये गुण ही बन्धके कारण होते हैं। किन्तु इसका अभिप्राय
१५ यह नहीं कि रूक्ष और स्निग्ध गुणका सद्भावमात्र बन्धका कारण है क्योंकि ऐसा माननेपर एक भी पुद्गल परमाणु बन्धके बिना नहीं रह सकता, इसलिए यहाँपर विधिनिषेध द्वारा बतलाया गया है कि किन पुद्गल परमाणुओंका परस्परमें बन्ध होता है और किनका नहीं होता है। जो स्निग्ध और रूक्ष गुण जघन्य शक्त्यंश लिए हुए होते हैं उन पुद्गल-परमाणुओंका बन्ध नहीं होता। इसी प्रकार गुणकी समानताके होनेपर सदृशोंका बन्ध नहीं होता किन्तु द्व्यधिक गुणवाले पुद्गलपरमाणुका ही द्व्यहीन
२० गुणवाले पुद्गलपरमाणुके साथ होता है। ऐसा बन्ध स्निग्ध परमाणुका स्निग्ध परमाणुके साथ, रूक्ष परमाणुका रूक्ष परमाणुके साथ और स्निग्ध परमाणुका रूक्ष परमाणुके साथ होता है यह नियम है। इसके अनुसार निम्न व्यवस्था फलित होती है—

क्रमांक	गुणांश	सदृशबन्ध	विसदृशबन्ध
१	जघन्य+जघन्य	नहीं	नहीं
२	जघन्य+एकादि अधिक	नहीं	नहीं
३	जघन्येतर+समजघन्येतर	नहीं	नहीं
४	जघन्येतर+एकाधिकजघन्येतर	नहीं	नहीं
५	जघन्येतर+द्व्यधिकजघन्येतर	है	है
६	जघन्येतर+त्र्यादिअधिकजघन्येतर	नहीं	नहीं

२५

३० तत्त्वार्थसूत्रमें निर्दिष्ट यह बन्ध-व्यवस्था प्रवचनसारका अनुसरण करती है। प्रवचनसारमें भी

'उत्पादव्ययध्रौव्ययुक्तं सत्' इति द्रव्यलक्षणमुक्तं पुनरपरेण प्रकारेण द्रव्यलक्षण-प्रतिपादनार्थमाह—

गुणपर्ययवद् द्रव्यम् ॥ ३८ ॥

गुणाश्च पर्ययाश्च गुणपर्यया.। तेऽस्य सन्तीति गुणपर्ययवद् द्रव्यम्। अत्र मतोरुत्पत्तावुक्त एव समाधि.। कथंचित् भेदोपपत्तेरिति। के गुणा. के पर्याया.? अन्वयिनो गुणा व्यतिरेकिण: पर्याया:। उभयैरुपेतं द्रव्यमिति। उक्तं च— ५

"गुण इदि दव्वविहाणं दव्वविकारो हि पज्जवो भणिदो।
तेहि अणूणं दव्वं अजुदपसिद्धं हवे णिच्चं ॥" इति ॥

एतदुक्तं भवति, द्रव्यं द्रव्यान्तराद् येन विशिष्यते स गुण। तेन हि तद् द्रव्यं विधीयते।

इसी प्रकारसे-बन्ध व्यवस्थाका निर्देश किया गया है किन्तु षट्खण्डागमके वर्गणाखण्डमें कही गई बन्ध व्यवस्था इससे कुछ भिन्न है जिसका ठीक तरहसे परिज्ञान होनेके लिए आगे कोष्ठक दिया जाता है— १०

क्रमाक	गुणांश	सदृशबन्ध	विसदृशबन्ध
१	जघन्य+जघन्य	नही	नही
२	जघन्य+एकादिअधिक	नही	नही
३	जघन्येतर+समजघन्येतर	नही	है
४	जघन्येतर+एकाधिक जघन्येतर	नही	है
५	जघन्येतर+द्वयधिक जघन्येतर	है	है
६	जघन्येतर+त्र्यादि अधिकजघन्येतर	नही	है

१५

'उत्पादव्ययध्रौव्ययुक्तं सत्' इस प्रकार द्रव्यका लक्षण कहा किन्तु अब अन्य प्रकार से द्रव्यके लक्षणका कथन करनेके लिए आगेका सूत्र कहते है— २०

गुण और पर्यायवाला द्रव्य है ॥ ३८ ॥

जिसमें गुण और पर्याय दोनों है वह गुण पर्यायवाला कहलाता है और वही द्रव्य है। यहा 'मतुप्' प्रत्यय का प्रयोग कैसे बनता है इस विषयमे पहले समाधान कर आये है। तात्पर्य यह है कि द्रव्यका गुण और पर्यायोसे कथचित् भेद है इसलिये यहां 'मतुप्' प्रत्ययका प्रयोग बन जाता है।

शंका—गुण किन्हे कहते है और पर्याय किन्हे कहते है? २५

समाधान—गुण अन्वयी होते है और पर्याय व्यतिरेकी।

तथा इन दोनोसे युक्त द्रव्य होता है। कहा भी है—

'द्रव्यमे भेद करनेवाले धर्मको गुण और द्रव्य के विकारको पर्याय कहते है। द्रव्य इन दोनोसे युक्त होता है। तथा वह अयुतसिद्ध और नित्य होता है।'

तात्पर्य यह है कि जिससे एक द्रव्य दूसरे द्रव्यसे जुदा होता है वह गुण है। इसी गुणके द्वारा उस ३०

असति तस्मिन् द्रव्यसंकरप्रसङ्गः[1] स्यात् । तद्यथा——जीवः पुद्गलादिभ्यो ज्ञानादिभिर्गुणै-र्विशिष्यते, पुद्गलादयश्च रूपादिभिः । ततश्चाविशेषे संकरः स्यात् । ततः सामान्यापेक्षया अन्वयिनो ज्ञानादयो जीवस्य गुणाः पुद्गलादीनां च रूपादयः । तेषां विकारा विशेषात्मना भिद्यमानाः पर्यायाः । घटज्ञानं पटज्ञानं क्रोधो मानो गन्धो वर्णस्तीव्रो मन्द इत्येवमादयः । तेभ्योऽन्यत्वं कथंचिदापद्यमानः समुदायो द्रव्यव्यपदेशभाक् । यदि हि सर्वथा समुदायोऽनर्थान्तरभूत एव स्यात् सर्वाभावः स्यात् । तद्यथा——परस्परविलक्षणानां समुदाये सति एकानर्थान्तरभावात् समुदायस्य सर्वाभावः परस्परतोऽर्थान्तरभूतत्वात् । यदिदं रूपं तस्मादर्थान्तरभूता रसादयः । ततः समुदयोऽनर्थान्तरभूतः । यश्च रसादिभ्योऽर्थान्तरभूताद्रूपादनर्थान्तरभूतः समुदायः स कथं रसादिभ्योऽर्थान्तरभूतो न भवेत् । ततश्च रूपमात्रं समुदायः प्रसक्तः । न चैकं रूपं समुदायो भवितुमर्हति । ततः समुदायाभावः । समुदायाभावाच्च तदनर्थान्तरभूतानां समुदायिनामप्यभाव इति सर्वाभावः । एवं रसादि-

---

द्रव्यका अस्तित्व सिद्ध होता है। यदि भेदक गुण न हो तो द्रव्योंमे सांकर्य हो जाय। खुलासा इस प्रकार है——

जीव द्रव्य पुद्गलादिक द्रव्योंसे ज्ञानादि गुणोंके द्वारा भेदको प्राप्त होता है और पुद्गलादिक द्रव्य भी अपने रूपादि गुणोंके द्वारा भेदको प्राप्त होते हैं। यदि ज्ञानादि गुणोंके कारण विशेषता न मानी जाय तो सांकर्य प्राप्त होता है। इसलिये सामान्यकी अपेक्षा जो अन्वयी ज्ञानादि हैं वे जीवके गुण हैं और रूपादिक पुद्गलादिकके गुण हैं। तथा इनके विकार विशेषरूपसे भेदको प्राप्त होते हैं इसलिये वे पर्याय कहलाते हैं। जैसे घटज्ञान, पटज्ञान, क्रोध,मान, गन्ध, वर्ण, तीव्र और मन्द आदिक। तथा जो इनसे कथचित् भिन्न है और समुदाय रूप है वह द्रव्य कहलाता है। यदि समुदायको सर्वथा अभिन्न मान लिया जाय तो सबका अभाव प्राप्त होता है। खुलासा इस प्रकार है——परस्पर विलक्षण धर्मोका समुदाय होनेपर यदि उसे एक और अभिन्न माना जाय तो समुदायका और सबका अभाव प्राप्त होता है, क्यों कि वे धर्म परस्पर भिन्न हैं। जो यह रूप है उससे रसादिक भिन्न है। अब यदि इनका समुदाय अभिन्न माना जाता है तो रसादिकसे भिन्न जो रूप है और उससे अभिन्न जो समुदाय है वह रसादिकसे भिन्न कैसे नही होगा अर्थात् अवश्य होगा। और इस प्रकार समुदाय रूपमात्र प्राप्त होता है। परन्तु एक रूप गुण समुदाय हो नहीं सकता इसलिये समुदायका अभाव प्राप्त होता है और समुदायका अभाव हो जानेसे उससे अभिन्न समुदायियोंका भी अभाव होता है इस प्रकार समुदाय और समुदायी

---

(१)–प्रसंगात् । तद्य–ता., ना. ।

ष्वपि योज्यम् । तस्मात्समुदायमिच्छता कथचिदर्थान्तरभाव एषितव्य ।

उक्ताना द्रव्याणा लक्षणनिर्देशात्तद्विषय एव द्रव्याध्यवसाये प्रसक्ते अनुक्तद्रव्यसंसूचनार्थमिदमाह—

कालश्च ॥ ३९॥

किम् ? 'द्रव्यम्'इति वाक्यशेष । कुत. ? तल्लक्षणोपेतत्वात् । द्विविधं लक्षणमुक्तम्— ५ 'उत्पादव्ययध्रौव्ययुक्त सत्' 'गुणपर्ययवद् द्रव्यम्'इति च । तदुभयं लक्षण कालस्य

सबका अभाव हो जाता है। जिस प्रकार रूपकी अपेक्षा कथन किया उसी प्रकार रसादिककी अपेक्षा भी कथन करना चाहिये। इसलिये यदि समुदाय स्वीकार किया जाता है तो वह कथचित् अभिन्न ही मानना चाहिये।

विशेषार्थ—पहिले उत्पाद, व्यय और ध्रौव्यसे युक्त द्रव्य होता है यह कह आए है। यहाँ प्रका- १० रान्तरसे द्रव्यका लक्षण कहा गया है। इसमे द्रव्यको गुणपर्यायवाला बतलाया गया है। बात यह है कि प्रत्येक द्रव्य अनन्तगुणोका और क्रमसे होनेवाली उनकी पर्यायोका पिण्डमात्र है। सर्वत्र गुणोको अन्वयी और पर्यायोको व्यतिरेकी बतलाया है। इसका अर्थ यह है कि जिनसे धारामे एकरूपता बनी रहती है वे गुण कहलाते है और जिनसे उसमे भेद प्रतीत होता है वे पर्याय कहलाते है। जीवमे ज्ञानादिक की धाराका, पुद्गलमे रूप रसादिककी धाराका, धर्मद्रव्यमे गतिहेतुत्वकी धाराका, अधर्मद्रव्यमे स्थिति- १५ हेतुत्वकी धाराका, आकाशमे अवगाहन हेतुत्वकी धाराका और काल द्रव्यमे वर्तनाका कभी विच्छेद नही होता इसलिए वे ज्ञानादिक उस उस द्रव्यके गुण है किन्तु वे गुण सदाकाल एकरूप नही रहते। जो नित्य द्रव्योके गुण है उन्हे यदि छोड भी दिया जाय तो भी जीव और पुद्गलोके गुणोमे प्रतिसमय स्पष्टतया परिणाम लक्षित होता है। उदाहरणार्थ—जीवका ज्ञानगुण ससार अवस्थामे कभी मतिज्ञानरूप होता है और कभी श्रुतज्ञान रूप। इसीलिए ये मतिज्ञानादि ज्ञानगुणकी पर्याय है। इसीप्रकार अन्य २० गुणोमे भी जान लेना चाहिए। द्रव्य सदा इन गुणरूप पर्यायों मे रहता है इसलिए वह गुणपर्यायवाला कहा गया है। फिर भी गुण और पर्यायको द्रव्यसे सर्वथा भिन्न न जानना चाहिए। वे दोनो मिलकर द्रव्यकी आत्मा है इसका अभिप्राय यह है कि गुण और पर्याय को छोड़कर द्रव्य कोई स्वतत्र वस्तु नही।

पूर्वोक्त द्रव्योके लक्षणका निर्देश करनेसे यह प्राप्त हुआ कि जो उस लक्षणका विषय है वही द्रव्य है, अत. अभी तक जिस द्रव्यका कथन नही किया उसकी सूचना करनेके लिये आगेका सूत्र कहते है— २५

काल भी द्रव्य है ॥ ३९ ॥

शंका—क्या है ?

समाधान—'द्रव्य है' इतना वाक्य शेष है।

शका—काल द्रव्य क्यो है ?

समाधान—क्यो कि इसमे द्रव्यका लक्षण पाया जाता है। ३०

जो उत्पाद, व्यय और ध्रौव्यसे युक्त है वह सत् है तथा जो गुण और पर्यायवाला है वह द्रव्य है

विद्यते। तद्यथा––ध्रौव्यं तावत्कालस्य स्वप्रत्ययं स्वभावव्यवस्थानात् । व्ययोदयौ परप्रत्ययौ, अगुरुलघुगुणवृद्धिहान्यपेक्षया स्वप्रत्ययौ च। तथा गुणा अपि कालस्य साधारणासाधारणरूपाः सन्ति । तत्रासाधारणो वर्तनाहेतुत्वम्, साधारणाश्चाचेतनत्वामूर्तत्वसूक्ष्मत्वागुरुलघुत्वादयः। पर्यायाश्च व्ययोत्पादलक्षणा योज्याः। तस्माद् द्विप्रकारलक्षणोपेतत्वादाकाशादिवत्कालस्य द्रव्यत्वं सिद्धम्।

तस्यास्तित्वलिङ्गं धर्मादिवद् व्याख्यातम् 'वर्तनालक्षणः कालः' इति[1]। ननु किमर्थमयं कालः पृथगुच्यते ? यत्रैव धर्मादय उक्तास्तत्रैवायमपि वक्तव्यः 'अजीवकाया धर्माधर्माकाशकालपुद्गलाः' इति ? नैवं शङ्क्यम्; तत्रोद्देशे सति कायत्वमस्य स्यात्। नेष्यते च मुख्योपचारप्रदेशप्रचयकल्पनाभावात्। धर्मादीनां तावन्मुख्यप्रदेशप्रचय उक्तः, 'असंख्येयाः प्रदेशाः' इत्येवमादिना। अणोरप्येकप्रदेशस्य पूर्वोत्तरभाव[2]प्रज्ञापननयापेक्षयोपचारकल्पनया प्रदेशप्रचय उक्तः। कालस्य पुनर्द्वेधाऽपि प्रदेशप्रचयकल्पना नास्तीत्यकायत्वम्। अपि च तत्र पाठे 'निष्क्रियाणि च' इत्यत्र धर्मादीनामाकाशान्तानां निष्क्रियत्वे प्रति-

इस प्रकार द्रव्यका दो प्रकारसे लक्षण कहा है। वे दोनों ही लक्षण कालमें पाये जाते हैं। खुलासा इस प्रकार है––

कालमें ध्रुवता स्वनिमित्तक है, क्योंकि वह अपने स्वभावमें सदा स्थित है। व्यय और उत्पाद परनिमित्तक है, और अगुरुलघु गुणकी हानि और वृद्धिकी अपेक्षा स्वनिमित्तक भी हैं। तथा काल के साधारण और असाधारण रूप दो प्रकारके गुण भी हैं। उनमेंसे असाधारण गुण वर्तनाहेतुत्व है और साधारण गुण अचेतनत्व, अमूर्तत्व, सूक्ष्मत्व और अगुरुलघुत्व आदिक हैं। इसी प्रकार व्यय और उत्पादरूप पर्याय भी घटित कर लेना चाहिये। इसलिये कालमें जब द्रव्यके दोनों लक्षण पाये जाते हैं तो वह आकाशके समान स्वतन्त्र द्रव्य है यह सिद्ध होता है।

धर्मादिक द्रव्यके समान इसके अस्तित्वके कारण का व्याख्यान किया ही है कि कालका लक्षण वर्तना है।

शंका––काल द्रव्यको अलगसे क्यों कहा ? जहाँ धर्मादिक द्रव्योंका कथन किया है वहीं पर इसका कथन करना था जिससे प्रथम सूत्रका रूप निम्न होता––'अजीवकाया धर्माधर्माकाशकालपुद्गलाः'

समाधान––इस प्रकार शंका करना ठीक नही है; क्योंकि वहां पर यदि इसका कथन करते तो इसे कायपना प्राप्त होता। परन्तु काल द्रव्य कायवान् नहीं कहा है, क्योंकि इसमें मुख्य और उपचार दोनों प्रकारसे प्रदेशप्रचयकी कल्पनाका अभाव है। धर्मादिक द्रव्योंका तो 'असंख्येयाः प्रदेशाः' इत्यादिक सूत्र द्वारा मुख्यरूपसे प्रदेशप्रचय कहा है। उसी प्रकार एक प्रदेशवाले अणुका भी पूर्वोत्तरभाव प्रज्ञापन नयकी अपेक्षा उपचारकल्पनासे प्रदेशप्रचय कहा है परन्तु कालके दोनों प्रकारसे प्रदेशप्रचयकी कल्पना नही बनती इसलिये वह अकाय है। दूसरे यदि प्रथम सूत्र में कालका पाठ रखते हैं तो 'निष्क्रियाणि च'

(१) इति। किमर्थ–मु.। (२)–त्तरप्रज्ञा–मु.।

पादिते इतरेषां[1] जीवपुद्गलानां सक्रियत्वप्राप्तिवत्कालस्यापि सक्रियत्व स्यात् । अथाकाशात्प्राक्काल उद्दिश्येत[2] ? तन्न; 'आ आकाशादेकद्रव्याणि' इत्येकद्रव्यत्वमस्य स्यात् । तस्मात्पृथगिह कालोद्देश. क्रियते । अनेकद्रव्यत्वे सति किमस्य प्रमाणम् ? लोकाकाशस्य यावन्तः प्रदेशास्तावन्तः कालाणवो निष्क्रिया एकैकाकाशप्रदेशे एकैकवृत्त्या लोकं व्याप्य व्यवस्थिताः । उक्त च— ५

"लोगागासपदेसे एक्केक्के जे ट्ठिया हु एक्का ।
रयणाणं रासीविव ते कालाणू मुणेयव्वा ।।"

रूपादिगुणविरहादमूर्ता. ।

यहापर धर्मसे लेकर आकाश तक के द्रव्योको निष्क्रिय कहनेपर जैसे जीव और पुद्गलोको सक्रियत्व प्राप्त होता है वैसे ही काल द्रव्यको भी सक्रियत्व प्राप्त होता है । १०

शका—इस दोषको दूर करनेके लिये आकाशसे पहले कालको रख दिया जाय ?

समाधान—यह कहना ठीक नही है क्योकि 'आकाश तक एक द्रव्य है' इस सूत्र वचनके अनुसार यदि कालको आकाशके पहले रखते है तो उसे एक द्रव्यत्व प्राप्त होता है ।

ये सब दोष न रहे इसलिये कालका अलगसे कथन किया है ।

शका—काल अनेक द्रव्य है इसमे क्या प्रमाण है ? १५

समाधान—लोकाकाशके जितने प्रदेश है उतने कालाणु है और वे निष्क्रिय है। तात्पर्य यह है कि लोकाकाशके एक एक प्रदेशपर एक एक कालाणु अवस्थित है। कहा भी है—

'लोकाकाशके एक एक प्रदेश पर जो रत्नोकी राशिके समान अवस्थित है उन्हे कालाणु जानो ।।'

ये कालाणु रूपादि गुणोसे रहित होनेके कारण अमूर्त है ।

विशेषार्थ—पहले पॉच द्रव्योके अस्तित्वकी चरचा कर आये है। यहाँ छठा द्रव्य काल है इसका विचार किया जा रहा है। काल द्रव्य है या नही इस विषयमे श्वेताम्बर परम्परामे दो मत मिलते है। एक मत तो कालको द्रव्यरूपसे स्वीकार करता है और दूसरा मत कालको स्वतन्त्र द्रव्य नही मानता। इस दूसरे मतके अनुसार सूर्यादिके निमित्तसे जो दिन-रात, घड़ी-घण्टा, पल-विपल आदि रूप काल अनुभवमे आता है वह सब पुद्गल द्रव्यकी पर्याय है। किन्तु विचारणीय प्रश्न यह है कि इन जीव पुद्गल आदि द्रव्योका परिणमन किसके निमित्तसे होता है ? यदि कहा जाय कि उत्पन्न होना, व्यय होना और ध्रुव रहना यह प्रत्येक द्रव्यका स्वभाव है । इसके लिए अन्य निमित्तके माननेकी क्या आवश्यकता ? तो इस प्रश्नपर यह तर्क होता है कि यदि इस तरह सर्वथा स्वभावसे ही प्रत्येक द्रव्यका परिणमन माना जाता है तो गति, स्थिति और अवगाहको भी सर्वथा स्वभावसे मान लेने मे क्या आपत्ति है। और ऐसी हालतमे केवल जीव और पुद्गल ये दो द्रव्य ही अवशिष्ट रहते है, शेष द्रव्योका अभाव प्राप्त होता है, इतना ही क्यो, जीव और पुद्गलका तथा पुद्गल और पुद्गलका बन्ध भी सर्वथा स्वाभाविक मानना ३०

(१)–पुद्गलादीना मु । (२)–श्यते । आ आका–आ., दि., १, दि., ता. ।

५ किम् ? दैवस्यायुष आस्रव इत्यनुवर्तते । अविशेषाभिधानेऽपि सौधर्मादिविशेषगतिः । कुतः ? पृथक्करणात् । यद्येवम्, पूर्वसूत्रे उक्त आस्रवविधिरविशेषेण प्रसक्तः तेन सरागसंयमसंयमासंयमावपि भवनवास्याद्यायुष आस्रवौ प्राप्नुतः ? नैष दोषः; सम्यक्त्वाभावे सति तद्व्यपदेशाभावात्तदुभयमप्यत्रान्तर्भवति ।

आयुषोऽनन्तरमुद्दिष्टस्य नाम्न आस्रवविधौ वक्तव्ये, तत्राऽशुभनाम्न आस्रवप्रति-
१० पत्त्यर्थमाह—

योगवक्रता विसंवादनं चाशुभस्य नाम्नः ।। ।। २२ ।।

निर्जरा होती है वह अकामनिर्जरा है। मिथ्यात्वके कारण मोक्षमार्गमें उपयोगी न पड़नेवाले कायक्लेशबहुल मायासे व्रतोंका धारण करना बालतप है। ये सब देवायुके आस्रवके कारण जानने चाहिये।

क्या देवायुका आस्रव इतना ही है या और भी है? अब इसी बातको बतलानेके लिये
१५ आगेका सूत्र कहते हैं—

सम्यक्त्व भी देवायुको आस्रव है ।। २१ ।।

शंका—सम्यक्त्व क्या है ?

समाधान—'देवायु का आस्रव है' इस पदकी पूर्व सूत्र से अनुवृत्ति होती ह।

यद्यपि सम्यक्त्वको सामान्यसे देवायुका आस्रव कहा है तो भी इससे सौधर्म आदि विशेष
२० देवोंका ज्ञान होता है।

शंका—किस कारणसे

समाधान—अलग सूत्र बनानेसे।

शंका—यदि ऐसा है तो पूर्व सूत्रमें जो विधान किया है वह सामान्यरूपसे प्राप्त होता है और इससे सरागसंयम और संयमासंयम ये भवनवासी आदिकी आयुके भी आस्रव हैं यह प्राप्त होता है ?

२५ समाधान—यह कोई दोष नहीं है, क्योंकि सम्यक्त्वके अभावमें सरागसंयम और संयमासंयम नहीं होते, इसलिये उन दोनोंका यहीं अन्तर्भाव होता है। अर्थात् ये भी सौधर्मादि देवायुके आस्रव हैं; क्योंकि ये सम्यक्त्वके होनेपर ही होते है।

आयुके बाद नामके आस्रवका कथन क्रमप्राप्त है। उसमें भी पहले अशुभ नामके आस्रवका ज्ञान करानेके लिये आगेका सूत्र कहते है

३० **योगवक्रता और विसंवाद ये अशुभ नाम कर्मके आस्रव हैं ।। २२ ।।**

(१)–पेतमनुकम्पाकाय–ता., ना.।

योगस्त्रिप्रकारो व्याख्यात.। तस्य वक्रता कौटिल्यम्। विसंवादनमन्यथाप्रवर्तनम्। ननु च नार्थभेद.। योगवक्रतैवान्यथाप्रवर्तनम् ? सत्यमेवमेतत्—स्वगता योगवक्रतेत्युच्यते। परगतं विसंवादनम्। सम्यगभ्युदयनि.श्रेयसार्थासु क्रियासु प्रवर्तमानमन्यं तद्विपरीतकायवाङ्मनोभिर्विसंवादयति मैवं कार्षीरेवं कुर्विति। एतदुभयमशुभनामकर्मास्रवकारणं वेदितव्यम्। 'च'शब्देन मिथ्यादर्शनपैशुन्यास्थिरचित्तताकूटमानतुलाकरणपरनिन्दाऽऽत्मप्रशंसादि. समुच्चीयते। ५

अथ शुभनामकर्मण: क आस्रव इत्यत्रोच्यते—

तद्विपरीतं शुभस्य ॥ २३ ॥

कायवाङ्मनसामृजुत्वमविसंवादनं च तद्विपरीतम्। 'च'शब्देन समुच्चितस्य च विपरीतं ग्राह्यम्। धार्मिकदर्शनसंभ्रमसद्भावोपनयनसंसरणभीरुताप्रमादवर्जनादिः। १० तदेतच्छुभनामकर्मास्रवकारणं वेदितव्यम्।

आह किमेतावानेव शुभनाम्न आस्रवविधिरुत कश्चिदस्ति प्रतिविशेष इत्यत्रोच्यते—यदिदं तीर्थंकरनामकर्मानन्तानुपमप्रभावमचिन्त्यविभूतिविशेषकारणं त्रैलोक्यविजयकरं

तीन प्रकारके योगका व्याख्यान पहले कर आये है। इसकी कुटिलता योगवक्रता है। अन्यथा प्रवृत्ति करना विसंवाद है। १५

शंका—इस तरह इनमें अर्थभेद नही प्राप्त होता; क्योकि योगवक्रता और अन्यथा प्रवृत्ति करना एक ही बात है ?

समाधान—यह कहना सही है तब भी योगवक्रता स्वगत है और विसंवादन परगत। जो स्वर्ग और मोक्षके योग्य समीचीन क्रियाओका आचरण कर रहा है उसे उसके विपरीत मन, वचन और कायकी प्रवृत्ति द्वारा रोकना कि ऐसा मत करो ऐसा करो विसंवादन है। इस प्रकार ये दोनों एक २० नही है किन्तु अलग-अलग है।

ये दोनो अशुभ नामकर्मके आस्रवके कारण जानने चाहिये। सूत्रमे आये हुए 'च' पदसे मिथ्यादर्शन, चुगलखोरी, चित्तका स्थिर न रहना, मापने और तौलनेके बांट घट बढ़ रखना, दूसरोकी निन्दा करना और अपनी प्रशंसा करना आदि आस्रवोका समुच्चय होता है।

अब शुभ नामकर्मका आस्रव क्या है यह बतलानेके लिये आगेका सूत्र कहते है २५

उससे विपरीत अर्थात् योगकी सरलता और अविसंवाद ये शुभ नामकर्मके आस्रव हैं ॥२३॥

काय, वचन और मनकी सरलता तथा अविसंवाद ये उससे विपरीत है। उसी प्रकार पूर्व सूत्रकी व्यवस्था करते हुए 'च' शब्दसे जिनका समुच्चय किया गया है उनके विपरीत आस्रवोका ग्रहण करना चाहिये। जैसे—धार्मिक पुरुषो व स्थानोंका दर्शन करना, आदर सत्कार करना, सद्भाव रखना, उपनयन, ससारसे डरना और प्रमादका त्याग करना आदि। ये सब शुभ नामकर्मके आस्रवके ३० कारण है।

शंका—क्या इतने ही शुभ नामकर्मके आस्रव है या और भी कोई विशेषता है ?

समाधान—जो यह अनन्त और अनुपम प्रभाववाला, अचिन्त्य विभूति विशेषका कारण और

तस्यास्रवविधिविशेषोऽस्तीति । यद्येवमुच्यतां के तस्यास्रवाः ? इत्यत इदमारभ्यते—

दर्शनविशुद्धिर्विनयसम्पन्नता शीलव्रतेष्वनतीचारोऽभीक्ष्णज्ञानोपयोगसंवेगौ शक्तितस्त्यागतपसी साधुसमाधिर्वैयावृत्यकरणमर्हदाचार्यबहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिर्मार्गप्रभावना प्रवचनवत्सलत्वमिति तीर्थकरत्वस्य ।। २४ ।।

जिनेन भगवताऽर्हत्परमेष्ठिनोपदिष्टे निर्ग्रन्थलक्षणे मोक्षवर्त्मनि रुचिर्दर्शनविशुद्धिः प्रागुक्तलक्षणा । तस्या अष्टावङ्गानि निश्शङ्कितत्वं निःकाङ्क्षिता विचिकित्साविरहता अमूढदृष्टिता उपबृंहणं स्थितीकरणं वात्सल्यं प्रभावनं चेति । सम्यग्ज्ञानादिषु मोक्ष-मार्गेषु तत्साधनेषु च गुर्वादिषु स्वयोग्यवृत्त्या सत्कार आदरो विनयस्तेन सम्पन्नता विनय-सम्पन्नता । अहिंसादिषु व्रतेषु तत्प्रतिपालनार्थेषु च क्रोधवर्जनादिषु शीलेषु निरवद्या वृत्तिः शीलव्रतेष्वनतीचारः । जीवादिपदार्थस्वतत्त्वविषये सम्यग्ज्ञाने नित्यं युक्तता अभीक्ष्ण-ज्ञानोपयोगः । संसारदुःखान्नित्यभीरुता संवेगः । त्यागो दानम् । तत्त्रिविधम्—आहारदानम-भयदानं ज्ञानदानं चेति । तच्छक्तितो यथाविधि प्रयुज्यमानं त्याग इत्युच्यते । अनिगूहित-

---

तीन लोककी विजय करनेवाला तीर्थंकर नामकर्म है उसके आस्रवमें विशेषता है, अतः अगले सूत्र द्वारा उसीका कथन करते हैं—

दर्शनविशुद्धि, विनयसंपन्नता, शील और व्रतोंका अतिचार रहित पालन करना, ज्ञानमें सतत उपयोग, सतत संवेग, शक्तिके अनुसार त्याग, शक्तिके अनुसार तप, साधु-समाधि, वैयावृत्त्य करना, अरिहंतभक्ति, आचार्यभक्ति, बहुश्रुतभक्ति, प्रवचन-भक्ति, आवश्यक क्रियाओंको न छोड़ना, मोक्षमार्गकी प्रभावना और प्रवचनवात्सल्य ये तीर्थंकर नामकर्मके आस्रव हैं ।। २४ ।।

(१) जिन भगवान् अरिहंत परमेष्ठी द्वारा कहे हुए निर्ग्रन्थ स्वरूप मोक्षमार्गपर रुचि रखना दर्शन-विशुद्धि है । इसका विशेष लक्षण पहले कह आये हैं । उसके आठ अंग है ? निःशंकितत्व, निःकांक्षिता निर्विचिकित्सितत्व, अमूढ़दृष्टिता, उपबृंहण, स्थितीकरण, वात्सल्य और प्रभावना । (२) सम्यग्-ज्ञानादि मोक्षमार्ग और उनके साधन गुरु आदिके प्रति अपने योग्य आचरण द्वारा आदर सत्कार करना विनय है और इससे युक्त होना विनयसम्पन्नता है । (३) अहिंसादिक व्रत हैं और इनके पालन करनेके लिये क्रोधादिकका त्याग करना शील है । इन दोनोंके पालन करनेमें निर्दोष प्रवृत्ति रखना शीलव्रतानतिचार है । (४) जीवादि पदार्थरूप स्वतत्त्वविषयक सम्यग्ज्ञानमें निरन्तर लगे रहना आभीक्ष्ण ज्ञानोपयोग है । (५) संसारके दुखोंसे निरन्तर डरते रहना संवेग है । (६) त्याग दान है । वह तीन प्रकारका है—आहारदान, अभयदान और ज्ञानदान । उसे शक्तिके अनुसार विधिपूर्वक देना यथाशक्ति त्याग है । (७) शक्तिको न छिपाकर मोक्षमार्गके अनुकूल शरीरको

---

(१) मोक्षसाधनेषु तत्–मु. ।

वीर्यस्य मार्गाविरोधि कायक्लेशस्तपः। यथा भाण्डागारे दहने समुत्थिते तत्प्रशमनमनुष्ठीयते बहूपकारत्वात्तथाऽनेकव्रतशीलसमृद्धस्य मुनेस्तपसः कुतश्चित्प्रत्यूहे समुपस्थिते तत्सन्धारणं समाधिः। गुणवद्दुःखोपनिपाते निरवद्येन विधिना तदपहरणं वैयावृत्त्यम्। अर्हदाचार्येषु[1] बहुश्रुतेषु प्रवचने च भावविशुद्धियुक्तोऽनुरागो भक्तिः। षण्णामावश्यकक्रियाणां यथाकालं प्रवर्तनमावश्यकापरिहाणिः। ज्ञानतपोदानजिनपूजाविधिना[2] धर्मप्रकाशनं मार्गप्रभावना। वत्से धेनुवत्सधर्मणि स्नेहः प्रवचनवत्सलत्वम्। तान्येतानि षोडशकारणानि सम्यग्भाव्यमानानि व्यस्तानि समस्तानि च तीर्थकरनामकर्मास्रवकारणानि प्रत्येतव्यानि।

इदानीं नामास्रवाभिधानानन्तरं गोत्रास्रवे वक्तव्ये सति नीचैर्गोत्रस्यास्रवविधानार्थमिदमाह—

परात्मनिन्दाप्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य ॥ २५॥

तथ्यस्य[3] वाऽतथ्यस्य वा दोषस्योद्भावनं प्रति इच्छा निन्दा। गुणोद्भावनाभिप्रायः प्रशंसा। यथासंख्यमभिसम्बन्धः[4]—परनिन्दा आत्मप्रशंसेति। प्रतिबन्धकहेतुसन्निधाने

क्लेश देना यथाशक्ति तप है। (८) जैसे भांडारमें आग लग जानेपर बहुत उपकारी होनेसे आगको शान्त किया जाता है उसी प्रकार अनेक प्रकारके व्रत और शीलोंसे समृद्ध मुनिके तप करते हुए किसी कारणसे विघ्नके उत्पन्न होनेपर उसका संधारण करना—शान्त करना साधुसमाधि है। (९) गुणी पुरुषके दुःखमें आ पड़नेपर निर्दोष विधिसे उसका दुःख दूर करना वैयावृत्त्य है। (१०-१३) अरिहंत, आचार्य, बहुश्रुत और प्रवचन इनमें भावोंकी विशुद्धिके साथ अनुराग रखना अरिहंतभक्ति, आचार्यभक्ति, बहुश्रुतभक्ति और प्रवचनभक्ति है। (१४) छह आवश्यक क्रियाओंका यथा समय करना आवश्यकापरिहाणि है। (१५) ज्ञान, तप, दान और जिनपूजा इनके द्वारा धर्मका प्रकाश करना मार्गप्रभावना है। (१६) जैसे गाय बछड़ेपर स्नेह रखती है उसी प्रकार साधर्मियोंपर स्नेह रखना प्रवचनवत्सलत्व है। ये सब सोलह कारण हैं। यदि अलग-अलग इनका भले प्रकार चिन्तन किया जाता है तो भी ये तीर्थंकर नामकर्मके आस्रवके कारण होते हैं और समुदायरूपसे सबका भले प्रकार चिन्तन किया जाता है तो भी ये तीर्थंकर नामकर्मके आस्रवके कारण होते हैं।

नामकर्मके आस्रवोंका कथन करनेके बाद अब गोत्र कर्मके आस्रवोंका कथन क्रमप्राप्त है। उसमें भी पहले नीचगोत्रके आस्रवोंका कथन करनेके लिये आगेका सूत्र कहते हैं—

परनिंदा, आत्मप्रशंसा, सद्गुणोंका उच्छादन और असद्गुणोंका उद्भावन ये नीचगोत्रके आस्रव हैं॥ २५॥

सच्चे या झूठे दोषको प्रकट करनेकी इच्छा निन्दा है। गुणोके प्रकट करनेका भाव प्रशंसा है। पर और आत्मा शब्दके साथ इनका क्रमसे सम्बन्ध होता है। यथा परनिन्दा और आत्मप्रशंसा।

(१)—चार्यबहु—मु.। (२)—तपोजिन—मु.। (३) तथ्यस्य वा दो—मु.। (४)—संख्यमिति सम्ब—आ., दि. १, दि. २।

सति अनुद्भूतवृत्तिता अनाविर्भाव उच्छादनम् । प्रतिबन्धकाभावे[1] प्रकाशवृत्तिता उद्भावनम् । अत्रापि च यथाक्रममभिसम्बन्धः—सद्गुणोच्छादनमसद्गुणोद्भावनमिति । तान्येतानि नीचैर्गोत्रस्यास्रवकारणानि वेदितव्यानि ।

अथोच्चैर्गोत्रस्य क आस्रवविधिरत्रोच्यते—

५ **तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥ २६ ॥**

'तत्' इत्यनेन प्रत्यासत्तेर्नीचैर्गोत्रस्यास्रवः[2] प्रतिनिर्दिश्यते । अन्येन[3] प्रकारेण वृत्तिर्विपर्ययः। तस्य विपर्ययस्तद्विपर्ययः। कः पुनरसौ विपर्ययः? आत्मनिन्दा, परप्रशंसा, सद्गुणोद्भावनमसद्गुणोच्छादनं च । गुणोत्कृष्टेषु विनयेनावनतिर्नीचैर्वृत्तिः । विज्ञानादिभिरुत्कृष्टस्यापि सतस्तत्कृतमदविरहोऽनहङ्कारताऽनुत्सेकः । तान्येतान्युत्तरस्योच्चैर्गोत्र-
१० स्यास्रवकारणानि भवन्ति ।

अथ गोत्रानन्तरमुद्दिष्टस्यान्तरायस्य क आस्रव इत्युच्यते—

विघ्नकरणमन्तरायस्य ॥ २७ ॥

रोकनेवाले कारणोंके रहनेपर प्रकट नहीं करनेकी वृत्ति होना उच्छादन है और रोकनेवाले कारणोंका अभाव होनेपर प्रकट करनेकी वृत्ति होना उद्भावन है । यहाँ भी क्रमसे सम्बन्ध होता है । यथा—सद्गुणोच्छादन और असद्गुणोद्भावन । इन सबको नीच गोत्रके आस्रवके कारण जानना चाहिये ।
१५ अब उच्च गोत्रके आस्रवके कारण क्या हैं यह बतलानेके लिये आगेका सूत्र कहते हैं—

उनका विपर्यय अर्थात् परप्रशंसा, आत्मनिन्दा, सद्गुणोंका उद्भावन और असद्गुणों का उच्छादन तथा नम्रवृत्ति और अनुत्सेक ये उच्च गोत्रके आस्रव हैं ॥ २६ ॥

इसके पहले नीच गोत्रके आस्रवोंका उल्लेख कर आये है, अतः 'तत्' इस पदसे उनका ग्रहण होता है। अन्य प्रकारसे वृत्ति होना विपर्यय है । नीच गोत्र का जो आस्रव कहा है उससे
२० विपर्यय तद्विपर्यय है ।

शंका—वे विपरीत कारण कौन हैं !

समाधान—आत्मनिन्दा, परप्रशंसा, सद्गुणोंका उदभावन और असद्गुणोंका उच्छादन।

जो गुणोंमें उत्कृष्ट हैं उनके प्रति विनयसे नम्र रहना नीचैर्वृत्ति है । ज्ञानादिकी अपेक्षा श्रेष्ठ होते हुए भी उसका मद न करना अर्थात् अहंकार रहित होना अनुत्सेक है । ये उत्तर अर्थात् उच्च
२५ गोत्रके आस्रवके कारण हैं ।

अब गोत्रके बाद क्रम प्राप्त अन्तराय कर्मका क्या आस्रव है यह बतलानेके लिये आगेका सूत्र कहते हैं—

दानादिकमें विघ्न डालना अन्तराय कर्मका आस्रव है ॥ २७ ॥

---

(१)—भावेन प्रकाश—मु. । (२)—गोत्रास्रवः आ., दि. १, दि. २ । (३) अनेन मु. ।

दानादीन्युक्तानि 'दानलाभभोगोपभोगवीर्याणि च' इत्यत्र। तेषां विहननं विघ्नः। विघ्नस्य करणं विघ्नकरणमन्तरायस्यास्रवविधिर्वेदितव्य। अत्र चोद्यते—तत्प्रदोषनिह्नवादयो ज्ञानदर्शनावरणादीनां प्रतिनियता आस्रवहेतवो वर्णिता, कि ते प्रतिनियतज्ञानावरणाद्यास्रवहेतव एव उताविशेषेणेति। यदि प्रतिनियतज्ञानावरणाद्यास्रवहेतव एव, आगमविरोध प्रसज्यते। आगमे हि सप्त कर्माणि आयुर्वर्ज्यानि प्रतिक्षणं युगपदास्रवन्तीत्युक्तम्। तद्विरोध. स्यात्। अथाविशेषेण आस्रवहेतवो[1] विशेषनिर्देशो न युक्त इति? अत्रोच्यते—यद्यपि तत्प्रदोषादिभिर्ज्ञानावरणादीनां सर्वासां कर्मप्रकृतीनां प्रदेशबन्धनियमो नास्ति, तथाप्यनुभागनियमहेतुत्वेन तत्प्रदोषनिह्नवादयो विभज्यन्ते।

इति तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसञ्ज्ञिकायां षष्ठोऽध्यायः।

'दानलाभभोगोपभोगवीर्याणि च' इस सूत्रकी व्याख्या करते समय दानादिकका व्याख्यान कर आये हैं। उनका नाश करना विघ्न है। और इस विघ्नका करना अन्तराय कर्मका आस्रव जानना चाहिये।

शंका—तत्प्रदोष और निह्नव आदिक ज्ञानावरण और दर्शनावरण आदि कर्मोके प्रतिनियत आस्रवके कारण कहे तो क्या वे ज्ञानावरण और दर्शनावरण आदि प्रतिनियत कर्मोके आस्रवके कारण है या सामान्यसे सभी कर्मोके आस्रवके कारण है? यदि ज्ञानावरणादिक प्रतिनियत कर्मोके ही आस्रवके कारण है तो आगमसे विरोध प्राप्त होता है, क्योकि आयुके सिवा शेष सात कर्मोका प्रति समय आस्रव होता है ऐसा आगममे कहा है, अत. इससे विरोध होता है। और यदि सामान्यसे सब कर्मो के आस्रवके कारण है ऐसा माना जाता है तो इसप्रकार विशेषरूपसे कथन करना युक्त नही ठहरता?

समाधान—यद्यपि तत्प्रदोष आदि से ज्ञानावरणादि सब कर्म प्रकृतियोका प्रदेश बन्ध होता है ऐसा नियम नही है तो भी वे प्रतिनियत अनुभागबन्धके हेतु है इसलिये तत्प्रदोष, निह्नव आदिका अलग-अलग कथन किया है।

इस प्रकार सर्वार्थसिद्धि नामक तत्त्वार्थवृत्तिमें छठा अध्याय समाप्त हुआ।

---

(१)—हेतुविशेष–आ., ता., ना., दि. १, दि. २।

अथ सप्तमोऽध्यायः

आस्रवपदार्थो व्याख्यातः । तत्प्रारम्भकाले एवोक्तं 'शुभः पुण्यस्य' इति तत्सामान्येनोक्तम् । तद्विशेषप्रतिपत्त्यर्थं कः पुनः शुभ इत्युक्ते इदमुच्यते—

हिंसाऽनृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् ॥ १ ॥

५ 'प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा' इत्येवमादिभिः सूत्रैर्हिंसादयो निर्देक्ष्यन्ते । तेभ्यो विरमणं विरतिर्व्रतमित्युच्यते । व्रतमभिसन्धिकृतो नियमः, इदं कर्तव्यमिदं न कर्तव्यमिति वा । ननु च हिंसादयः परिणामविशेषा अध्रुवाः, कथं तेषामपादानत्वमुच्यते ? बुद्ध्यपाये ध्रुवत्वविवक्षोपपत्तेः । यथा धर्माद्विरमतीत्यत्र य एष मनुष्यः सम्भिन्नबुद्धिः स पश्यति—दुष्करो धर्मः, फलं चास्य श्रद्धामात्रगम्यमिति स बुद्ध्या सम्प्राप्य निवर्तते । एवमिहापि यः

१०

सातवाँ अध्याय

आस्रव पदार्थका व्याख्यान करते समय उसके आरम्भ में 'शुभः पुण्यस्य' यह कहा है पर वह सामान्य रूपसे ही कहा है, अतः विशेष रूपसे उसका ज्ञान करानेके लिए शुभ क्या है ऐसा पूछने पर आगेका सूत्र कहते हैं—

हिंसा, असत्य, चोरी, अब्रह्म और परिग्रहसे निवृत्त होना व्रत है ॥ १ ॥

१५ 'प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा' इत्यादि सूत्रों द्वारा हिंसादिकका जो स्वरूप आगे कहेंगे उनसे विरत होना व्रत कहलाता है । प्रतिज्ञा करके जो नियम लिया जाता है वह व्रत है । या 'यह करने योग्य है और यह नहीं करने योग्य है' इस प्रकार नियम करना व्रत है ।

शंका—हिंसा आदिक परिणाम विशेष ध्रुव अर्थात् सदा काल स्थिर नहीं रहते इसलिये उनका अपादान कारकमें प्रयोग कैसे बन सकता है ?

२० समाधान—बुद्धिपूर्वक त्यागमें ध्रुवपनेकी विवक्षा बन जानेसे अपादान कारकका प्रयोग बन जाता है । जैसे 'धर्मसे विरत होता है' यहाँ जो यह धर्मसे विमुख बुद्धिवाला मनुष्य है वह विचार करता है कि 'धर्म दुष्कर है और उसका फल श्रद्धामात्रगम्य है' इस प्रकार वह बुद्धिसे समझ कर

---

(१) 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ।'–पा. यो. सू. २, ३० । (२) 'अभिसन्धिकृता विरतिर्विषयाद्योग्याद्व्रतं भवति ।'–रत्न० ३,४० । (३) 'ध्रुवमपायेऽपादानम् ।'–पा. १, ४, २४ । (४) 'धर्माद्विरमति × × य एष मनुष्यः संभिन्नबुद्धिर्भवति स पश्यति ।'–पा. म. भा. १, ४, ३, २४ (५) स्वबुद्ध्या मु. । 'स बुद्ध्या निवर्तते ।'–पा. म. भा. १, ४, ३, २४ । (६) 'य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति ।'–पा. म. भा. १, ४, ३, २४ ।

एष मनुष्यः प्रेक्षापूर्वकारी स पश्यति—य एते हिंसादयः परिणामास्ते पापहेतवः। पापकर्मणि प्रवर्तमानान् जनानिहैव राजानो दण्डयन्ति परत्र च दुःखमाप्नुवन्तीति स[1] बुद्धचा सम्प्राप्य निवर्तते। ततो बुद्धचा ध्रुवत्वविवक्षोपपत्तेरपादानत्वं युक्तम्। 'विरति'शब्दः प्रत्येकं परिसमाप्यते हिंसाया विरतिः अनृताद्विरतिरित्येवमादि। तत्र अहिंसाव्रतमादौ क्रियते प्रधानत्वात्। सत्यादीनि हि तत्परिपालनार्थानि सस्यस्य वृतिपरिक्षेपवत्। सर्वसावद्यनिवृत्तिलक्षणसामायिकापेक्षया एकं व्रतं, तदेव छेदोपस्थापनापेक्षया पञ्चविधमिहोच्यते। ननु च अस्य व्रतस्यास्रवहेतुत्वमनुपपन्नं संवरहेतुष्वन्तर्भावात्। संवरहेतवो वक्ष्यन्ते गुप्तिसमित्यादयः। तत्र दशविधे धर्मे संयमे वा व्रतानामन्तर्भाव इति? नैष दोषः; तत्र संवरो निवृत्तिलक्षणो वक्ष्यते। प्रवृत्तिश्चात्र दृश्यते[2]; हिंसानृतादत्तादानादिपरित्यागे अहिंसासत्यवचनदत्तादानादिक्रियाप्रतीतेः गुप्त्यादिसंवरपरिकर्मत्वाच्च। व्रतेषु हि कृतपरिकर्मा साधुः सुखेन संवरं करोतीति ततः पृथक्त्वेनोपदेशः क्रियते। ननु च षष्ठमणु-

धर्मसे विरत हो जाता है। इसी प्रकार यहा भी जो यह मनुष्य विचारपूर्वक काम करनेवाला है वह विचार करता है कि जो ये हिंसादिक परिणाम है वे पापके कारण है और जो पाप कार्य मे प्रवृत्त होते है उन्हे इसी भवमे राजालोग दण्ड देते है और वे पापाचारी परलोकमे दुःख उठाते है, इस प्रकार वह बुद्धिसे समझ कर हिंसादिकसे विरत हो जाता है। इसलिये बुद्धिसे ध्रुवत्वपने की विवक्षा बन जाने से अपादान कारकका प्रयोग करना उचित है।

विरति शब्दको प्रत्येक शब्दके साथ जोड़ लेना चाहिये। यथा हिंसासे विरति, असत्य से विरति आदि।

इन पाँच व्रतोमे अहिंसा व्रतको प्रारम्भमें रखा है क्योकि वह सबमे मुख्य है। धान्य के खेतके लिये जैसे उसके चारो ओर काटोका घेरा होता है उसी प्रकार सत्यादिक सभी व्रत उसकी रक्षाके लिये है।

सब पापोसे निवृत्त होनेरूप सामायिककी अपेक्षा एक व्रत है। वही व्रत छेदोपस्थापनाकी अपेक्षा पांच प्रकारका है और उन्हीका यहा कथन किया है।

शंका—यह व्रत आस्रवका कारण है यह बात नही बनती, क्यो कि संवरके कारणोंमे इसका अन्तर्भाव होता है। आगे गुप्ति, समिति इत्यादि संवरके कारण कहनेवाले है। वहा दस प्रकारके धर्मोमे एक सयम नामका धर्म बतलाया है उसमे व्रतोका अन्तर्भाव होता है?

समाधान—यह कोई दोष नही है, क्योकि वहां निवृत्तिरूप संवरका कथन करेगे और यहां प्रवृत्ति देखी जाती है, क्यो कि हिंसा, असत्य और अदत्तादान आदिका त्याग करने पर अहिंसा, सत्यवचन और दी हुई वस्तुका ग्रहण आदि रूप क्रिया देखी जाती है। दूसरे ये व्रत गुप्ति आदि रूप सवरके अङ्ग है। जिस साधुने व्रतोकी मर्यादा कर ली है वह सुखपूर्वक संवर करता है इसलिये व्रतोका अलगसे उपदेश दिया है।

(१)–वन्तीति स्वबुद्धचा मु., ता. ना.। (२) दृश्यते हिंसानृतादत्तादानादिक्रिया–मु.।

व्रतमस्ति रात्रिभोजनविरमणं तदिहोपसंख्यातव्यम् ? न; भावनास्वन्तर्भावात् । अहिंसाव्रतभावना हि वक्ष्यन्ते[1]। तत्र आलोकितपानभोजनभावना कार्यति ।

तस्य पञ्चतयस्य व्रतस्य भेदप्रतिपत्त्यर्थमाह—

देशसर्वतोऽणुमहती[2] ॥ २ ॥

५ देश एकदेशः । सर्वः सकलः । देशश्च सर्वश्च देशसर्वौ ताभ्यां देशसर्वतः । 'विरतिः' इत्यनुवर्तते । अणु च महच्चाणुमहती । व्रताभिसम्बन्धान्नपुंसकलिङ्गनिर्देशः । यथासंख्यमभिसम्बध्यते । देशतो विरतिरणुव्रतं सर्वतो विरतिर्महाव्रतमिति द्विधा भिद्यते प्रत्येकं व्रतम् । एतानि व्रतानि भावितानि वरौषधवद्यत्नवते[3] दु:खनिवृत्तिनिमित्तानि भवन्ति ।

किमर्थं कथं वा भावनं तेषामित्यत्रोच्यते—

१० **तत्स्थैर्यार्थं भावनाः पञ्च पञ्च ॥ ३ ॥**

तेषां व्रतानां स्थिरीकरणार्थमेकैकस्य व्रतस्य पञ्च पञ्च भावना वेदितव्याः ।

शंका—रात्रिभोजनविरमण नाम छठा अणुव्रत है उसकी यहां परिगणना करनी थी ?

समाधान—नहीं, क्योंकि उसका भावनाओंमें अन्तर्भाव हो जाता है। आगे अहिंसा व्रतकी भावनाएं कहेंगे। उनमें एक आलोकितपानभोजन नामकी भावना है उसमें रात्रिभोजनविरमण नामक

१५ व्रतका अन्तर्भाव हो जाता है।

उस पांच प्रकारके व्रतके भेदोंका कथन करनेके लिये आगेका सूत्र कहते हैं।

हिंसादिकसे एकदेश निवृत्त होना अणुव्रत है और सब प्रकारसे निवृत्त होना महाव्रत है ॥२॥

देश शब्दका अर्थ एकदेश है और सर्व शब्दका अर्थ सकल है। सूत्रमें देश और सर्व शब्दका द्वन्द्व समास करके तसि प्रत्यय करके 'देशसर्वतः' पद बनाया है। इस सूत्रमें विरति शब्दकी अनुवृत्ति पूर्व

२० सूत्रसे होती है। यहां अणु और महत् शब्दका द्वन्द्व समास होकर अणुमहती पद बना है। व्रत शब्द नपुंसक लिंग है इसलिये 'अणुमहती' यह नपुंसक लिंगपरक निर्देश किया है। इनका सम्बन्ध क्रमसे होता है। यथा—एकदेश निवृत्त होना अणुव्रत है और सब प्रकारसे निवृत्त होना महाव्रत है इस प्रकार अहिंसादि प्रत्येक व्रत दो प्रकारके हैं। प्रयत्नशील जो पुरुष उत्तम औषधिके समान इन व्रतोंका सेवन करता है उसके दुःखोंका नाश होता है।

२५ इन व्रतोंकी किसलिये और किस प्रकार भावना करनी चाहिये, अब इसी बातको बतलानेके लिये आगेका सूत्र कहते हैं—

उन व्रतोंको स्थिर करनेके लिये प्रत्येक व्रतकी पांच पांच भावनाएं हैं ॥ ३ ॥

उन व्रतोंको स्थिर करनेके लिये एक एक व्रतकी पांच पांच भावनाएं जाननी चाहिये।

---

(१)—क्ष्यन्ते । आलो—आ., दि. १, दि., २। (२) 'एते जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्।' —पा. यो. सू. २, ३१। (३) वरौषधवत् दुःख—आ.।

यद्येवमाद्यस्याहिंसाव्रतस्य भावना. का इत्यत्रोच्यते—

वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकितपानभोजनानि पञ्च ॥ ४ ॥

वाग्गुप्ति. मनोगुप्तिः ईर्यासमितिः आदाननिक्षेपणसमितिः आलोकितपानभोजनमित्येताः पञ्चाहिंसाव्रतस्य भावना. ।

अथ द्वितीयस्य व्रतस्य का इत्यत्रोच्यते—　५

क्रोधलोभभीरुत्वहास्यप्रत्याख्यानान्यनुवीचीभाषणं च पञ्च ॥ ५ ॥

क्रोधप्रत्याख्यानं लोभप्रत्याख्यानं भीरुत्वप्रत्याख्यानं हास्यप्रत्याख्यानम् अनुवीचीभाषणं चेत्येताः पञ्च भावनाः सत्यव्रतस्य ज्ञेयाः। अनुवीचीभाषणं निरवद्यानुभाषणमित्यर्थः ।

इदानी तृतीयस्य व्रतस्य का भावना इत्यत्राह—　१०

शून्यागारविमोचितावासपरोपरोधाकरणभैक्षशुद्धिसधर्माविसंवादाः पञ्च ॥ ६ ॥

शून्यागारेषु गिरिगुहातरुकोटरादिष्वावासः । परकीयेषु च विमोचितेष्वावासः। परेषामुपरोधाऽकरणम् । आचारशास्त्रमार्गेण भैक्षशुद्धिः । ममेदं तवेदमिति सधर्मभिर-

---

यदि ऐसा है तो प्रथम अहिसा व्रतकी भावनाएं कौन-सी है ? अब इस बातको बतलानेके लिए आगेका सूत्र कहते है—　१५

वचनगुप्ति, मनोगुप्ति, ईर्यासमिति, आदाननिक्षेपणसमिति और आलोकितपानभोजन ये अहिंसाव्रतकी पांच भावनाएं हैं ॥ ४ ॥

वचनगुप्ति, मनोगुप्ति, ईर्यासमिति, आदाननिंक्षेपणसमिति और आलोकितपानभोजन ये अहिसा व्रतकी पांच भावनाए है।

अब दूसरे व्रतकी भावनाएं कौनसी है यह बतलानेके लिये आगेका सूत्र कहते है—　२०

क्रोधप्रत्याख्यान, लोभप्रत्याख्यान, भीरुत्वप्रत्याख्यान, हास्यप्रत्याख्यान और अनुवीचीभाषण ये सत्य व्रतकी पांच भावनाएं हैं ॥ ५ ॥

क्रोधप्रत्याख्यान, लोभप्रत्याख्यान, भीरुत्वप्रत्याख्यान, हास्यप्रत्याख्यान और अनुवीचीभाषण ये सत्य व्रतकी पांच भावनाएं है। अनुवीचीभाषणका अर्थ निर्दोष भाषण है।

अब तीसरे व्रतकी कौनसी भावनाएं है, यह बतलानेके लिये आगेका सूत्र कहते है—　२५

शून्यागारावास, विमोचितावास, परोपरोधाकरण, भैक्षशुद्धि और सधर्माविसंवाद ये अचौर्य व्रतकी पांच भावनाएं हैं ॥ ६ ॥

पर्वतकी गुफा और वृक्षका कोटर आदि शून्यागार है इनमे रहना शून्यागारावास है। दूसरो द्वारा छोड़े हुए मकान आदिमे रहना विमोचितावास है। दूसरोंको ठहरनेसे नही रोकना परोपरोधाकरण है। आचार शास्त्रमें बतलाई हुई विधिके अनुसार भिक्षा लेना भैक्षशुद्धि है। यह मेरा है यह तेरा है इस　३०

विसंवादः। इत्येताः पञ्चादत्तादानविरमणव्रतस्य भावनाः।

अथेदानीं ब्रह्मचर्यव्रतस्य भावना वक्तव्या इत्यत्राह—

स्त्रीरागकथाश्रवणतन्मनोहराङ्गनिरीक्षणपूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागाः पञ्च ॥ ७ ॥

५ त्यागशब्दः प्रत्येकं परिसमाप्यते। स्त्रीरागकथाश्रवणत्यागः तन्मनोहराङ्गनिरीक्षणत्यागः पूर्वरतानुस्मरणत्यागः वृष्येष्टरसत्यागः स्वशरीरसंस्कारत्यागश्चेति चतुर्थव्रतस्य भावनाः पञ्च विज्ञेयाः।

अथ पञ्चमव्रतस्य भावनाः का इत्यत्रोच्यते—

मनोज्ञामनोज्ञेन्द्रियविषयरागद्वेषवर्जनानि पञ्च ॥ ८ ॥

१० पञ्चानामिन्द्रियाणां स्पर्शनादीनामिष्टानिष्टेषु विषयेषु[1]पनिपतितेषु स्पर्शादिषु रागवर्जनानि पञ्च आकिञ्चन्यस्य व्रतस्य भावनाः प्रत्येतव्याः।

किञ्चान्यद्यथाऽमीषां व्रतानां द्रढिमार्थं भावनाः प्रतीयन्ते तद्विपश्चिद्भिरिति भावनोपदेशः, तथा तदर्थं तद्विरोधिष्वपीत्याह—

प्रकार सधर्मियोंसे विसंवाद नहीं करना सधर्माविसंवाद है। ये अदत्तादानविरमण व्रतकी पांच १५ भावनाएं हैं।

अब इस समय ब्रह्मचर्य व्रतकी पांच भावनाओंका कथन करना चाहिये; इसलिये आगका सूत्र कहते हैं—

स्त्रियोंमें रागको पैदा करनेवाली कथाके सुननेका त्याग, स्त्रियोंके मनोहर अंगोंको देखनेका त्याग, पूर्व भोगोंके स्मरणका त्याग, गरिष्ठ और इष्ट रस का त्याग तथा अपने शरीरके २० संस्कारका त्याग ये ब्रह्मचर्य व्रतकी पांच भावनाएं हैं ॥ ७ ॥

त्याग शब्दको प्रत्येक शब्दके साथ जोड़ लेना चाहिये। यथा-स्त्रीरागकथाश्रवणत्याग, तन्मनोहरांगनिरीक्षणत्याग, पूर्वरतानुस्मरणत्याग, वृष्येष्टरसत्याग और स्वशरीरसंस्कारत्याग ये ब्रह्मचर्य व्रतकी पांच भावनाएं हैं।

अब पांचवें व्रतकी कौनसी भावनाएं है यह बतलाने के लिये आगेका सूत्र कहते हैं—

२५ **मनोज्ञ और अमनोज्ञ इन्द्रियों के विषयोंमें क्रमसे राग और द्वेषका त्याग करना ये अपरिग्रहव्रतकी पांच भावनाएं हैं ॥ ८ ॥**

स्पर्शन आदि पांच इन्द्रियोंके इष्ट और अनिष्ट स्पर्श आदिक पांच विषयोंके प्राप्त होने पर राग और द्वेषका त्याग करना ये आकिचन्य व्रतकी पांच भावनाएं जाननी चाहिये।

जिस प्रकार इन व्रतोंकी दृढ़ताके लिये भावनाएं हैं इसलिये भावनाओंका उपदेश दिया है उसी ३० प्रकार विद्वान् पुरुषोंको व्रतोंकी दृढताके लिये विरोधी भावोंके विषयमें क्या करना चाहिये? यह बतलानेके लिये अब आगेका सूत्र कहते हैं—

---

(१)-येषूपरिपतितेषु आ., दि. १, दि. २।

हिंसादिष्विहामुत्रापायावद्यदर्शनम् ।। ९ ।।

अभ्युदयनि.श्रेयसार्थानां क्रियाणां विनाशकं. प्रयोगोऽपायः । अवद्यं गर्ह्यम् । अपायश्चावद्यं चापायावद्ये तयोर्दर्शनमपायावद्यदर्शनं भावयितव्यम् । क्व ? इहामुत्र च । केषु ? हिसादिषु । कथमिति चेदुच्यते—हिंसायां तावत्, हिंस्रो हि नित्योद्वेजनीयः सततानुबद्धवैरश्च इह च वधबन्धपरिक्लेशादीन् प्रतिलभते प्रेत्य चाशुभां गतिं गर्हितश्च ५ भवतीति हिसाया व्युपरमः श्रेयान् । तथा अनृतवादी अश्रद्धेयो भवति इहैव च जिह्वाच्छेदादीन् प्रतिलभते मिथ्याभ्याख्यानदु.खितेभ्यश्च बद्धवैरेभ्यो बहूनि व्यसनान्यवाप्नोति प्रेत्य चाशुभां गति गर्हितश्च भवतीति अनृतवचनादुपरम. श्रेयान् । तथा स्तेनः परद्रव्याहरणासक्तः सर्वस्योद्वेजनीयो भवति । इहैव चाभिघातवधबन्धहस्तपादकर्णनासोत्तरौष्ठच्छेदनभेदनसर्वस्वहरणादीन् प्रतिलभते प्रेत्य चाशुभां गति गर्हितश्च भवतीति स्तेयाद् १० व्युपरतिः श्रेयसी । तथा अब्रह्मचारी मदविभ्रमोद्भ्रान्तचित्तो वनगज इव वासिता-

हिंसादिक पांच दोषोंमें ऐहिक और पारलौकिक अपाय और अवद्यका दर्शन भावने योग्य है ।।९।।

स्वर्ग और मोक्षकी प्रयोजक क्रियाओंका विनाश करनेवाली प्रवृत्ति अपाय है। अवद्यका अर्थ गर्ह्य है। अपाय और अवद्य इन दोनोके दर्शनकी भावना करनी चाहिये।

शका—कहां ? १५

समाधान—इस लोक और परलोकमें ।

शंका—किनमे ?

समाधान—हिसादि पांच दोषोमे।

शंका—कैसे ?

समाधान—हिसामे यथा—हिसक निरन्तर उद्वेजनीय है, वह सदा वैरको बांधे रहता है। इस २० लोकमे वध, बन्ध और क्लेश आदिको प्राप्त होता है तथा परलोकमें अशुभ गतिको प्राप्त होता है और गर्हित भी होता है इस लिये हिसाका त्याग श्रेयस्कर है। असत्यवादीका कोई श्रद्धान नही करता। वह इस लोकमे जिह्वाछेद आदि दुखों को प्राप्त होता है तथा असत्य बोलनेसे दु खी हुए अतएव जिन्होने वैर बांध लिया है उनसे बहुत प्रकारकी आपत्तियोंको और परलोकमें अशुभ गतिको प्राप्त होता है और गर्हित भी होता है इसलिये असत्य वचनका त्याग श्रेयस्कर है। तथा परद्रव्यका अपहरण २५ करनेवाले चोरका सब तिरस्कार करते है। इस लोकमे वह ताड़ना, मारना, बांधना तथा हाथ, पैर, कान, नाक, ऊपरके ओठका छेदना, भेदना और सर्वस्वहरण आदि दुखोंको और परलोकमें अशुभ गतिको प्राप्त होता है और गर्हित भी होता है इसलिये चोरीका त्याग श्रेयस्कर है। तथा जो अब्रह्मचारी है उसका चित्त मदसे भ्रमता रहता है। जिस प्रकार वनका हाथी हथिनीसे जुदा कर दिया जाता है और

(१)–शकप्रयो—मु.।

वञ्चितो विवशो वधबन्धनपरिक्लेशाननुभवति मोहाभिभूतत्वाच्च कार्याकार्यानभिज्ञो न किञ्चित्कुशलमाचरति पराङ्गनालिङ्गनसङ्गकृतरतिश्चेहैव वैरानुबन्धिनो लिङ्गच्छेदनवधबन्धसर्वस्वहरणादीनपायान् प्राप्नोति प्रेत्य चाशुभां गतिमश्नुते गर्हितश्च भवति अतो विरतिरात्महिता । तथा परिग्रहवान् शकुनिरिव गृहीतमांसखण्डोऽन्येषां ५ तदर्थिनां पतत्त्रिणामिहैव तस्करादीनामभिभवनीयो भवति तदर्जनरक्षणप्रक्षयकृतांश्च दोषान् बहूनवाप्नोति न चास्य तृप्तिर्भवति इन्धनैरिवाग्नेः लोभाभिभूतत्वाच्च कार्याकार्यानपेक्षो भवति प्रेत्य चाशुभां गतिमास्कन्दते लुब्धोऽयमिति गर्हितश्च भवतीति तद्विरमणं श्रेयः । एवं हिंसादिष्वपायावद्यदर्शनं भावनीयम् ।

हिंसादिषु भावनान्तरप्रतिपादनार्थमाह—

१० **दुःखमेव वा ॥ १० ॥**

हिंसादयो दुःखमेवेति भावयितव्याः । कथं हिंसादयो दुःखम् ? दुःखकारणत्वात् । यथा **"अन्नं वै प्राणाः"** इति । कारणस्य कारणत्वाद्वा । यथा **"धनं प्राणाः"** इति । धनकारण-

---

विवश होकर उसे वध, बन्धन और क्लेश आदि दुःखोंको भोगना पड़ता है ठीक यही अवस्था अब्रह्मचारी की होती है । मोहसे अभिभूत होनेके कारण वह कार्य और अकार्यके विवेकसे रहित होकर कुछ भी उचित १५ आचरण नहीं करता । परस्त्रीके आलिंगन और संसर्गमें ही इसकी रति रहती है इसलिये यह वैरको बढ़ानेवाले लिंगका छेदा जाना, मारा जाना, बांधा जाना और सर्वस्वका अपहरण किया जाना आदि दुखोंको और परलोकमें अशुभ गतिको प्राप्त होता है तथा गर्हित भी होता है इसलिये अब्रह्मका त्याग आत्महितकारी है । जिस प्रकार पक्षी मांसके टुकड़ेको प्राप्त करके उसको चाहनेवाले दूसरे पक्षियोंके द्वारा पराभूत होता है उसी प्रकार परिग्रहवाला भी इसी लोक में उसको चाहनेवाले चोर आदिके २० द्वारा पराभूत होता है । तथा उसके अर्जन, रक्षण और नाशसे होनेवाले अनेक दोषोंको प्राप्त होता है । जैसे ईंधनसे अग्निकी तृप्ति नहीं होती वैसे ही इसकी कितने ही परिग्रहसे कभी भी तृप्ति नहीं होती । यह लोभातिरेकके कारण कार्य और अकार्यका विवेक नहीं करता, परलोकमें अशुभ गतिको प्राप्त होता ह । तथा यह लोभी है इस प्रकारसे इसका तिरस्कार भी होता है इसलिये परिग्रहका त्याग श्रेयस्कर है । इस प्रकार हिंसा आदि दोषोंमें अपाय और अवद्यके दर्शनकी भावना करनी चाहिये ।

२५ अब हिंसा आदि दोषोंमें दूसरी भावनाका कथन करने के लिये आगेका सूत्र कहते हैं—

अथवा हिंसादिक दुःख ही हैं ऐसी भावना करनी चाहिये ॥१०॥

हिंसादिक दुःख ही हैं ऐसा चिन्तन करना चाहिये ।

शंका—हिंसादिक दुःख कैसे हैं ?

समाधान—दुःखके कारण होनेसे । यथा–'अन्न ही प्राण है ।' अन्न प्राणधारणका कारण है पर ३० कारणमें कार्यका उपचार करके जिस प्रकार अन्नको ही प्राण कहते हैं । या कारणका कारण होनेसे हिंसादिक दुःख हैं । यथा–'धन ही प्राण हैं ।' यहां अन्नपानका कारण धन है और प्राणका कारण

मन्नपानमन्नपानकारणाः प्राणा इति। तथा हिंसादयोऽसद्वेद्यकर्मकारणम्। असद्वेद्यकर्म च दुःखकारणमिति दुःखकारणे दुःखकारणकारणे वा दुःखोपचारः। तदेते[1] दुःखमेवेति भावनं परात्मसाक्षिकमवगन्तव्यम्। ननु[2] च तत्सर्वं न दुःखमेव; विषयरतिसुखसद्भावात्? न तत्सुखम्, वेदनाप्रतीकारत्वात्कच्छूकण्डूयनवत्।

पुनरपि भावनान्तरमाह[3]—　　५

[4]मैत्रीप्रमोदकारुण्यमाध्यस्थानि च सत्त्वगुणाधिकक्लिश्यमानाविनेयेषु ॥ ११ ॥

परेषां दुःखानुत्पत्त्यभिलाषो मैत्री। वदनप्रसादादिभिरभिव्यज्यमानान्तर्भक्तिरागः प्रमोदः। दीनानुग्रहभावः कारुण्यम्। रागद्वेषपूर्वकपक्षपाताभावो माध्यस्थम्। दुष्कर्मविपाकवशान्नानायोनिषु सीदन्तीति सत्त्वा जीवाः। सम्यग्ज्ञानादिभिः प्रकृष्टा गुणाधिकाः। असद्वेद्योदयापादितक्लेशाः क्लिश्यमानाः। तत्त्वार्थश्रवणग्रहणाभ्यामसंपादितगुणा अवि-　　१०
नेयाः। एतेषु सत्त्वादिषु यथासंख्यं मैत्र्यादीनि भावयितव्यानि। सर्वसत्त्वेषु मैत्री,

---

अन्नपान है इसलिये जिस प्रकार धनको प्राण कहते हैं उसी प्रकार हिंसादिक असाता वेदनीय कर्मके कारण है और असाता वेदनीय दुःखका कारण है, इसलिये दुःखके कारण या दुःखके कारणके कारण हिंसादिकमें दुःखका उपचार है। ये हिंसादिक दुःख ही हैं इस प्रकार अपनी और दूसरोकी साक्षीपूर्वक भावना करनी चाहिये।　　१५

शंका—ये हिंसादिक सबके सब केवल दुःख ही हैं यह बात नही है, क्योंकि विषयोंके सेवनमे सुख उपलब्ध होता है?

समाधान—विषयोके सेवनसे जो सुखाभास होता है वह सुख नही है, किन्तु दादको खुजलानेके समान केवल वेदनाका प्रतिकारमात्र है।

और भी अन्य भावना करनेके लिये आगेका सूत्र कहते हैं—　　२०

प्राणीमात्रमें मैत्री, गुणाधिकोंमें प्रमोद, क्लिश्यमानोंमें करुणा वृत्ति और अविनेयोंमें माध्यस्थ भावकी भावना करनी चाहिये ॥ ११ ॥

दूसरोको दुःख न हो ऐसी अभिलाषा रखना मैत्री है। मुखकी प्रसन्नता आदिके द्वारा भीतर भक्ति और अनुरागका व्यक्त होना प्रमोद है। दीनो पर दयाभाव रखना कारुण्य है। रागद्वेषपूर्वक पक्षपातका न करना माध्यस्थ है। बुरे कर्मोके फलसे जो नाना योनियोंमें जन्मते और मरते है वे सत्त्व है। सत्त्व　　२५
यह जीवका पर्यायवाची नाम है। जो सम्यग्ज्ञानादि गुणोमे बढे चढ़े है वे गुणाधिक कहलाते है। असातावेदनीयके उदयसे जो दुखी है वे क्लिश्यमान कहलाते है। जिनमे जीवादि पदार्थोको सुनने और ग्रहण करनेका गुण नही है वे अविनेय कहलाते है। इन सत्त्व आदिकमें क्रमसे मैत्री आदिकी

---

(१) तदेते दुःखमेवेति भावन परमात्मसा–आ.। तदेतत् दुःखमेवेति भावन परात्मसा–मु.। तदेते दुःखमेवेति भावनं परत्रात्मसा–ता.। (२) ननु च सर्वं दुःखमेव ता.। (३) भावनार्थमाह आ., दि. १, दि. २। (४) 'मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्।'–पा. यो. सू. १, ३३।

गुणाधिकेषु प्रमोदः, क्लिश्यमानेषु कारुण्यम्, अविनेयेषु माध्यस्थमिति । एवं भावयतः पूर्णान्यहिंसादीनि व्रतानि भवन्ति ।

पुनरपि भावनान्तरमाह—

जगत्कायस्वभावौ वा संवेगवैराग्यार्थम् ॥ १२ ॥

जगत्स्वभावस्तावदनादिरनिधनो वेत्रासनझल्लरीमृदङ्गनिभः । अत्र जीवा अनादिसंसारेऽनन्तकालं नानायोनिषु दुःखं भोजं भोजं पर्यटन्ति । न चात्र किञ्चिन्नियतमस्ति । जलबुद्बुदोपमं जीवितम्, विद्युन्मेघादिविकारचपला भोगसम्पद इति । एवमादिजगत्स्वभावचिन्तनात्संसारात्संवेगो भवति । कायस्वभावश्च अनित्यता दुःखहेतुत्वं निःसारता अशुचित्वमिति । एवमादिकायस्वभावचिन्तनाद्विषयरागनिवृत्तेर्वैराग्यमुपजायते । इति १० जगत्कायस्वभावौ भावयितव्यौ ।

अत्राह; उक्तं भवता हिंसादिनिवृत्तिर्व्रतमिति, तत्र न जानीमः के हिंसादयः क्रियाविशेषा इत्यत्रोच्यते। युगपद्वक्तुमशक्यत्वात्तल्लक्षणनिर्देशस्य क्रमप्रसङ्गे याऽसावादौ चोदिता सैव तावदुच्यते—

भावना करनी चाहिये। जो सब जीवोंमें मैत्री, गुणाधिकोंमें प्रमोद, क्लिश्यमानोंमें कारुण्य और १५ अविनेयोंमें माध्यस्थ भावकी भावना करता है उसके अहिंसा आदि व्रत पूर्णताको प्राप्त होते हैं।

अब फिर भी और भावनाके लिये आगेका सूत्र कहते हैं—

संवेग और वैराग्यके लिये जगत्के स्वभाव और शरीरके स्वभावकी भावना करनी चाहिये ॥१२॥

जगत्का स्वभाव यथा—यह जगत् अनादि है, अनिधन है, वेत्रासन, झल्लरी और मृदंगके समान है। २० इस अनादि संसारमें जीव अनन्त काल तक नाना योनियोंमें दुःखको पुनः पुनः भोगते हुए भ्रमण करते हैं। इसमें कोई भी वस्तु नियत नहीं है। जीवन जलके बुलबुलेके समान है। और भोग-सम्पदाएं बिजुली और इन्द्रधनुषके समान चंचल हैं। इत्यादि रूपसे जगत्के स्वभावका चिन्तन करनेसे संसारसे संवेग–भय होता है। कायका स्वभाव यथा—यह शरीर अनित्य है, दुःखका कारण है, निःसार है और अशुचि है इत्यादि। इस प्रकार कायके स्वभावका चिन्तन करनेसे विषयोंसे आसक्ति हटकर वैराग्य २५ उत्पन्न होता है। अतः जगत् और कायके स्वभावकी भावना करनी चाहिये।

यहां पर शंकाकार कहता है कि आपने यह तो बतलाया कि हिंसादिकसे निवृत्त होना व्रत है। परन्तु वहां यह न जान सके कि हिंसादिक क्रियाविशेष क्या है? इसलिये यहां कहते हैं। तथापि उन सबका एक साथ कथन करना अशक्य है किन्तु उनका लक्षण क्रमसे ही कहा जा सकता है अतः प्रारम्भमें जिसका उल्लेख किया है उसीका स्वरूप बतलानेके लिये आगेका सूत्र कहते हैं—

---

(१) शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः ।'–पा. यो. सू. २,४०। (२) भगवता मु., ता., ना.।

प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा ॥ १३ ॥

प्रमादः सकषायत्वं तद्वानात्मपरिणामः प्रमत्तः । प्रमत्तस्य योगः प्रमत्तयोगः । तस्मात्प्रमत्तयोगात् इन्द्रियादयो दशप्राणास्तेषां यथासंभवं व्यपरोपणं वियोगकरणं हिंसेत्यभिधीयते । सा प्राणिनो दुःखहेतुत्वादधर्महेतुः । 'प्रमत्तयोगात्'इति विशेषणं केवलं प्राणव्यपरोपणं नाधर्मायेति ज्ञापनार्थम् । उक्तं च— ५

वियोजयति चासुभिर्न च वधेन संयुज्यते ।।[1]" इति ॥

उक्तं च—

"उच्चालिदम्हि[2] पादे इरियासमिदस्स णिग्गमट्ठाणे ।
आवादे[धे]ज्ज कुलिंगो मरेज्ज तज्जोगमासेज्ज ॥
ण हि तस्स[3] तण्णिमित्तो बंधो सुहुमो वि देसिदो समए । १०
मुच्छापरिग्गहो त्ति य अज्झप्पपमाणदो भणिदो ।।"

ननु च प्राणव्यपरोपणाभावेऽपि प्रमत्तयोगमात्रादेव हिंसेष्यते । उक्तं च—

"मरदु[4] व जियदु व जीवो अयदाचारस्स णिच्छिदा हिंसा ।
पयदस्स णत्थि बंधो हिंसामित्तेण समिदस्स ।।"

प्रमत्तयोगसे प्राणोंका वध करना हिंसा है ॥ १३ ॥ १५

प्रमाद कषाय सहित अवस्थाको कहते है और इस प्रमादसे युक्त जो आत्माका परिणाम होता है वह प्रमत्त कहलाता है। तथा प्रमत्तका योग प्रमत्तयोग है। इसके सम्बन्धसे इन्द्रियादि दस प्राणोका यथासम्भव व्यपरोपण अर्थात् वियोग करना हिसा कही जाती है। इससे प्राणियोको दुःख होता है इसलिये वह अधर्मका कारण है। केवल प्राणोका वियोग करनेसे अधर्म नही होता है यह बतलानेके लिये सूत्रमे 'प्रमत्तयोगसे' यह पद दिया है। कहा भी है— २०

'यह प्राणी दूसरेको प्राणोसे वियुक्त करता है तो भी उसे हिसा नही लगती ।।' और भी कहा है—

'ईर्यासमितिसे युक्त साधुके अपने पैरके उठाने पर चलनेके स्थानमे यदि कोई क्षुद्र प्राणी उनके पैरसे दब जाय और उसके सम्बन्धसे मर जाय तो भी उस निमित्तसे थोड़ा भी बन्ध आगममे नही कहा है, क्यो कि जैसे अध्यात्म दृष्टिसे मूर्च्छाको ही परिग्रह कहा है वैसे यहा भी रागादि परिणामको हिसा कहा है ।।' २५

शंका—प्राणोंका विनाश न होने पर भी केवल प्रमत्तयोगसे ही हिसा कही जाती है। कहा भी है—

'जीव मर जाय या जीता रहे तो भी यत्नाचारसे रहित पुरुषके नियमसे हिसा होती है और जो यत्नाचारपूर्वक प्रवृत्ति करता है हिसाके हो जाने पर भी उसे बन्ध नही होता ।।'

---

(१) सिद्ध. द्वा. ३,१६। (२) प्रवचन. क्षे. ३,१६। (३) प्रवचन. क्षे. ३,१७। (४) वचन. ३,१७।

नैष दोषः। अत्रापि[1] प्राणव्यपरोपणमस्ति भावलक्षणम्। तथा चोक्तम्—

"स्वयमेवात्मनाऽऽत्मानं हिनस्त्यात्मा प्रमादवान्।
पूर्वं प्राण्यन्तराणान्तु पश्चात्स्याद्वा न वा वधः॥"

आह अभिहितलक्षणा हिंसा। तदनन्तरोद्दिष्टमनृतं किंलक्षणमित्यत्रोच्यते—

५ **असदभिधानमनृतम्॥ १४॥**

सच्छब्दः प्रशंसावाची। न सदसदप्रशस्तमिति यावत्। असतोऽर्थस्याभिधानमसदभिधानमनृतम्। ऋतं सत्यं, न ऋतमनृतम्। किं पुनरप्रशस्तम्? प्राणिपीडाकरं यत्तदप्रशस्तं विद्यमानार्थविषयं वा अविद्यमानार्थविषयं वा। उक्तं च प्रागेवाहिंसा[2]व्रतपरिपालनार्थमितरद्व्रतम् इति। तस्माद्धिंसाकरं[3] वचोऽनृतमिति निश्चेयम्।

१० अथानृतानन्तरमुद्दिष्टं यत्स्तेयं तस्य किं लक्षणमित्यत आह—

अदत्तादानं स्तेयम्॥ १५॥

आदानं ग्रहणमदत्तस्यादानमदत्तादानं स्तेयमित्युच्यते। यद्येवं कर्मनोकर्मग्रहणमपि

समाधान—यह कोई दोष नही है, क्यों कि यहां भी भावरूप प्राणोंका नाश है ही। कहा भी है—'प्रमादसे युक्त आत्मा पहले स्वयं अपने द्वारा ही अपना घात करता है इसके बाद दूसरे प्राणियोंका १५ वध होवे या मत होवे॥'

हिंसाका लक्षण कहा अब उसके बाद असत्य का लक्षण बतलानेके लिये आगेका सूत्र कहते हैं—

असत् बोलना अनृत है॥ १४॥

सत् शब्द प्रशंसावाची है। जो सत् नही वह असत् है। असत् का अर्थ अप्रशस्त है। तात्पर्य यह है कि जो पदार्थ नहीं है उसका कथन करना अनृत–असत्य कहलाता है। ऋतका अर्थ सत्य है २० और जो ऋत-सत्य नही है वह अनृत है।

शंका—अप्रशस्त किसे कहते है?

समाधान—जिससे प्राणियोंको पीड़ा होती है उसे अप्रशस्त कहते हैं। भले ही वह चाहे विद्यमान पदार्थको विषय करता हो या चाहे अविद्यमान पदार्थको विषय करता हो। यह पहले ही कहा है कि शेष व्रत अहिंसा व्रतकी रक्षाके लिये हैं। इसलिये जिससे हिंसा हो वह वचन अनृत है ऐसा निश्चय २५ करना चाहिये।

असत्यके बाद जो स्तेय कहा है उसका क्या लक्षण है यह बतलानेके लिये आगेका सूत्र कहते है—

बिना दी हुई वस्तुका लेना स्तेय है॥ १५॥

आदान शब्दका अर्थ ग्रहण है। बिना दी हुई वस्तुका लेना अदत्तादान है और यही स्तेय-चोरी कहलाता है।

३० शंका—यदि स्तेयका पूर्वोक्त अर्थ किया जाता है तो कर्म और नोकर्मका ग्रहण करना भी स्तेय

---

(१) तत्रापि आ., दि. १, दि. २। (२)–हिंसाप्रतिपाल–मु.। (३) कर्मवचो मु.।

स्तेयं प्राप्नोति; अन्येनादत्तत्वात् ? नैष दोष; दानादाने यत्र सम्भवतस्तत्रैव स्तेय-व्यवहारः । कुतः ? 'अदत्त'ग्रहणसामर्थ्यात् । एवमपि भिक्षोर्ग्रामनगरादिषु भ्रमणकाले रथ्याद्वारादिप्रवेशाददत्तादानं प्राप्नोति ? नैष दोषः; सामान्येन मुक्तत्वात् । तथाहि—अयं भिक्षुः पिहितद्वारादिषु न प्रविशति अमुक्तत्वात् । अथवा 'प्रमत्तयोगात्'इत्यनुवर्तते । प्रमत्तयोगाददत्तादानं यत् तत्स्तेयमित्युच्यते । न च रथ्यादि प्रविशतः प्रमत्तयोगोऽस्ति । ५ तेनैतदुक्तं भवति, यत्र संक्लेशपरिणामेन प्रवृत्तिस्तत्र स्तेयं भवति बाह्यवस्तुनो[1] ग्रहणे चाग्रहणे च ।

अथ चतुर्थमब्रह्म किलक्षणमित्यत्रोच्यते—

मैथुनमब्रह्म ॥ १६ ॥

स्त्रीपुंसयोश्चारित्रमोहोदये सति रागपरिणामाविष्टयोः परस्परस्पर्शनं प्रति इच्छा १० मिथुनम् । मिथुनस्य कर्म मैथुनमित्युच्यते । न सर्वं कर्म । कुतः ? लोके शास्त्रे च तथा

ठहरता है, क्यों कि ये किसीके द्वारा दिये नही जाते ?

समाधान—यह कोई दोष नही है, क्यो कि जहां देना और लेना सम्भव है वही स्तेयका व्यवहार होता है ।

शंका—यह अर्थ किस शब्दसे फलित होता है ? १५

समाधान—सूत्रमे जो 'अदत्त' पदका ग्रहण किया है उससे ज्ञात होता है कि जहां देना लेना सम्भव है वही स्तेयका व्यवहार होता है।

शंका—स्तेयका उक्त अर्थ करने पर भी भिक्षुके ग्राम नगरादिकमे भ्रमण करते समय गली, कूचा, दरवाजा आदिमे प्रवेश करने पर बिना दी हुई वस्तुका ग्रहण प्राप्त होता है ?

समाधान—यह कोई दोष नही है, क्यो कि वे गली, कूचा और दरवाजा आदि सबके लिये खुले २० है। यह भिक्षु जिनमे किवाड़ आदि लगे है उन दरवाजा आदिमे प्रवेश नही करता, क्योंकि वे सबके लिए खुले नही है। अथवा, 'प्रमत्तयोगात्' इस पदकी अनुवृत्ति होती है जिस से यह अर्थ होता है कि प्रमत्त के योगसे बिना दी हुई वस्तुका ग्रहण करना स्तेय है। गली कूचा आदिमे प्रवेश करनेवाले भिक्षुके प्रमत्तयोग तो है नही इसलिये वैसा करते हुए उसे स्तेयका दोष नही लगता। इस सब कथनका यह अभि-प्राय है कि बाह्य वस्तु ली जाय या न ली जाय किन्तु जहां संक्लेशरूप परिणामके साथ प्रवृत्ति होती है २५ वहा स्तेय है।

अब चौथा जो अब्रह्म है उसका क्या लक्षण है यह बतलाने के लिये आगेका सूत्र कहते हैं—

मैथुन अब्रह्म है ॥ १६ ॥

चारित्र मोहनीयका उदय होनेपर राग परिणामसे युक्त स्त्री और पुरुषके जो एक दूसरेको स्पर्श करनेकी इच्छा होती है वह मिथुन कहलाता है और इसका कार्य मैथुन कहा जाता है। सब कार्य मैथुन ३०

(१)–वस्तुनो ग्रहणे च आ.।

प्रसिद्धेः । लोके तावदागोपालादिप्रसिद्धं स्त्रीपुंसयोः[1] रागपरिणामनिमित्तं चेष्टितं मैथुनमिति । शास्त्रेऽपि **"अश्ववृषभयोर्मैथुनेच्छायाम्"**[2] इत्येवमादिषु तदेव गृह्यते । अपि च 'प्रमत्तयोगात्' इत्यनुवर्तते तेन स्त्रीपुंसमिथुनविषयं रतिसुखार्थं चेष्टितं मैथुनमिति गृह्यते, न सर्वम् । अहिंसादयो[3] गुणा यस्मिन् परिपाल्यमाने बृंहन्ति वृद्धिमुपयान्ति तद् ब्रह्म । ५ न ब्रह्म अब्रह्म[4] इति । किं तत् ? मैथुनम् । तत्र हिंसादयो दोषाः पुष्यन्ति । यस्मान्मैथुनसेवनप्रवणः स्थास्नूंश्चरिष्णून् प्राणिनो हिनस्ति मृषावादमाचष्टे अदत्तमादत्ते अचेतनमितरं[5] च परिग्रहं गृह्णाति ।

अथ पञ्चमस्य परिग्रहस्य किं लक्षणमित्यत आह—

मूर्छा परिग्रहः ॥ १७ ॥

१० मूर्छेत्युच्यते[6] । का मूर्छा ? बाह्यानां गोमहिषमणिमुक्ताफलादीनां[7] चेतनाचेतनानामाभ्यन्तराणां[8] च रागादीनामुपधीनां संरक्षणार्जनसंस्कारादिलक्षणाव्यावृत्तिर्मूर्छा । ननु

नहीं कहलाता क्योंकि लोकमें और शास्त्रमें इसी अर्थमें मैथुन शब्दकी प्रसिद्धि है। लोकमें बाल गोपाल आदि तक यह प्रसिद्ध है कि स्त्री पुरुषकी रागपरिणामके निमित्तसे होनेवाली चेष्टा मैथुन है। शास्त्रमें भी 'घोड़ा और बैलकी मैथुनेच्छा होनेपर' इत्यादि वाक्योंमें यही अर्थ लिया जाता है। दूसरे १५ 'प्रमत्तयोगात्' इस पदकी अनुवृत्ति होती है इसलिये रतिजन्य सुखके लिये स्त्री-पुरुषकी मिथुनविषयक जो चेष्टा होती है वही मैथुन रूपसे ग्रहण किया जाता है सब नहीं ।

अहिंसादिक गुण जिसके पालन करनेपर बढ़ते हैं वह ब्रह्म कहलाता है और जो इससे रहित है वह अब्रह्म है।

शंका—अब्रह्म क्या है ?

२० समाधान—मैथुन।

मैथुनमें हिंसादिक दोष पुष्ट होते हैं, क्योंकि जो मैथुनके सेवनमें दक्ष है वह चर और अचर सब प्रकारके प्राणियोंकी हिसा करता है, झूठ बोलता है, बिना दी हुई वस्तु लेता है तथा चेतन और अचेतन दोनों प्रकारके परिग्रहको स्वीकार करता है।

अब पांचवा जो परिग्रह है उसका क्या लक्षण है यह बतलानेके लिये आगेका सूत्र कहते हैं—

२५ **मूर्च्छा परिग्रह है ॥ १७ ॥**

अब मूर्च्छाका स्वरूप कहते हैं।

शंका—मूर्च्छा क्या है ?

समाधान—गाय, भैंस, मणि और मोती आदि चेतन अचेतन बाह्य उपधिका तथा रागादिरूप आभ्यन्तर उपधिका संरक्षण, अर्जन और संस्कार आदि रूप व्यापार ही मूर्च्छा है।

(१)–पुंसराग–मु.। (२) पा० सू० ७।१।५१ इत्यत्र वार्तिकम् । (३)–दयो धर्मा य–मु.। (४) अब्रह्म । किं मु.। (५) सचेतनमितरच्च मु.। (६)–च्यते । केयं मूर्च्छा मु., आ., दि. १, दि. २। (७)–मुक्तादी–मु., ता.। (८)–तनानां च रागा–मु.।

च लोके वातादिप्रकोपविशेषस्य मूर्छेति प्रसिद्धिरस्ति तद्ग्रहणं कस्मान्न भवति ? सत्यमेवमेतत् । मूर्छिरयं मोहसामान्ये वर्तते । **"सामान्यचोदनाश्च विशेषेष्ववतिष्ठन्ते"** इत्युक्ते विशेषे व्यवस्थितः परिगृह्यते[1], परिग्रहप्रकरणात् । एवमपि बाह्यस्य परिग्रहत्वं न प्राप्नोति; आध्यात्मिकस्य संग्रहात् ? सत्यमेवमेतत्; प्रधानत्वादभ्यन्तर एव संगृहीतः[2] । असत्यपि बाह्ये ममेदमिति सङ्कल्पवान् सपरिग्रह[3] एव भवति । अथ बाह्यः परिग्रहो न भवत्येव, भवति च मूर्छाकारणत्वात् यदि ममेदमिति संकल्पः परिग्रहः; सञ्ज्ञानाद्यपि परिग्रहः प्राप्नोति तदपि हि ममेदमिति सङ्कल्प्यते रागादिपरिणामवत् ? नैष दोषः; 'प्रमत्तयोगात्'इत्यनुवर्तते[4] । ततो ज्ञानदर्शनचारित्रवतोऽप्रमत्तस्य मोहाभावान्न मूर्छाऽस्तीति निष्परिग्रहत्वं सिद्धम् । किञ्च तेषां ज्ञानादीनामहेयत्वादात्मस्वभावत्वादपरिग्रहत्वम् । रागादयः पुनः कर्मोदयतन्त्रा इति अनात्मस्वभावत्वाद्धेयाः । ततस्तेषु सङ्कल्पः परिग्रह इति युज्यते । तन्मूलाः सर्वे दोषाः । ममेदमिति हि सति संकल्पे संरक्षणादयः

शंका—लोकमें वातादि प्रकोप विशेष का नाम मूर्च्छा है ऐसी प्रसिद्धि है, इसलिए यहाँ इस मूर्च्छाका ग्रहण क्यों नहीं किया जाता ?

समाधान—यह कहना सत्य है तथापि मूर्च्छ धातुका सामान्य अर्थ मोह है और सामान्य शब्द तद्गत विशेषोंमें ही रहते हैं ऐसा मान लेने पर यहां मूर्च्छाका विशेष अर्थ ही लिया गया है, क्यों कि यहां परिग्रहका प्रकरण है।

शंका—मूर्च्छाका यह अर्थ लेने पर भी बाह्य वस्तुको परिग्रहपना नहीं प्राप्त होता, क्यों कि मूर्च्छा इस शब्दसे आभ्यन्तर परिग्रहका संग्रह होता है।

समाधान—यह कहना सही है, क्यों कि प्रधान होनेसे आभ्यन्तरका ही संग्रह किया है। यह स्पष्ट ही है कि बाह्य परिग्रहके न रहने पर भी 'यह मेरा है' ऐसा संकल्प वाला पुरुष परिग्रहसहित ही होता है।

शंका—यदि बाह्य पदार्थ परिग्रह नहीं है और मूर्च्छाका कारण होनेसे 'यह मेरा है' इस प्रकारका संकल्प ही परिग्रह है तो ज्ञानादिक भी परिग्रह ठहरते है, क्यो कि रागादि परिणामोंके समान ज्ञानादिकमें भी 'यह मेरा है' इस प्रकारका संकल्प होता है ?

समाधान—यह कोई दोष नहीं है, क्यों कि 'प्रमत्तयोगात्' इस पदकी अनुवृत्ति होती है, इसलिये जो ज्ञान, दर्शन और चारित्रवाला होकर प्रमादरहित है उसके मोहका अभाव होनेसे मूर्च्छा नहीं है, अतएव परिग्रहरहितपना सिद्ध होता है। दूसरे वे ज्ञानादिक अहेय हैं और आत्माके स्वभाव हैं इसलिये उनमें परिग्रहपना नहीं प्राप्त होता। परन्तु रागादिक तो कर्मोंके उदयसे होते है, अतः वे आत्माका स्वभाव न होनेसे हेय है इसलिये उनमें होनेवाला संकल्प परिग्रह है यह बात बन जाती है। सब दोष परिग्रहमूलक ही होते हैं। 'यह मेरा है' इस प्रकारके संकल्पके होने पर संरक्षण आदि रूप भाव होते हैं।

(१)-गृह्यते। एवमपि ता., ना.। (२) संगृह्यते। असत्यपि मु.। (३)-ग्रहो भवति मु.। (४)-र्तते। ज्ञान-आ., दि, १, दि. २।

संजायन्ते । तत्र च हिंसाऽवश्यम्भाविनी । तदर्थमनृतं जल्पति । चौर्यं वा आचरति । मैथुने च कर्मणि प्रयतते । तत्प्रभवा नरकादिषु दुःखप्रकाराः ।

एवमुक्तेन[2] प्रकारेण हिंसादिदोषदर्शिनोऽहिंसादिगुणाहितचेतसः परमप्रयत्नस्याहिंसादीनि व्रतानि यस्य सन्ति सः—

५ **निश्शल्यो व्रती ॥ १८ ॥**

शृणाति हिनस्तीति शल्यम् । शरीरानुप्रवेशि काण्डादिप्रहरण[3] शल्यमिव शल्य यथा तत् प्राणिनो बाधाकरं तथा[4] शारीरमानसबाधाहेतुत्वात्कर्मोदयविकारः शल्यमित्युपचर्यते । तत् त्रिविधम्—मायाशल्यं निदानशल्य मिथ्यादर्शनशल्यमिति । माया निकृतिर्वञ्चना । निदानं विषयभोगाकाङ्क्षा । मिथ्यादर्शनमतत्त्वश्रद्धानम् । एतस्मात्त्रि-
१० विधाच्छल्यान्निष्क्रान्तो निश्शल्यो व्रती इत्युच्यते । अत्र चोद्यते—शल्याभावान्निःशल्यो व्रताभिसम्बन्धाद् व्रती, न निश्शल्यत्वाद्व्रती भवितुमर्हति । न हि देवदत्तो दण्डसम्बन्धाच्छत्री भवतीति ? अत्रोच्यते—उभयविशेषणविशिष्टस्येष्टत्वात्[5] । न हिंसाद्युपरति-

और इसमे हिंसा अवश्यंभाविनी है। इसके लिये असत्य बोलता है, चोरी करता है, मैथुन कर्ममें प्रवृत्त होता है। नरकादिकमे जितने दुःख है वे सब इससे उत्पन्न होते है।

१५ इस प्रकार उक्त विधिसे जो हिंसादिमे दोषोंका दर्शन करता है, जिसका चित्त अहिंसादि गुणोंमें लगा रहता है और जो प्रयत्नशील है वह यदि अहिंसादि व्रतोंको पाले तो किस संज्ञाको प्राप्त होता है इसी बातका खुलासा करनेके लिये अब आगेका सूत्र कहते है—

जो शल्यरहित है वह व्रती है ॥१८॥

'शृणाति हिनस्ति इति शल्यम्' यह शल्य शब्दकी व्युत्पत्ति है। शल्यका अर्थ है पीडा देनेवाली वस्तु।
२० जब शरीरमें कांटा आदि चुभ जाता है तो वह शल्य कहलाता है। यहा उसके समान जो पीडाकर भाव है वह शल्य शब्दसे लिया गया है। जिस प्रकार काटा आदि शल्य प्राणियोको बाधाकर होती है उसी प्रकार शरीर और मन सम्बन्धी बाधाका कारण होनेसे कर्मोदयजनित विकारमें भी शल्यका उपचार कर लेते है अर्थात् उसे भी शल्य कहते है। वह शल्य तीन प्रकारकी है—माया शल्य, निदान शल्य और मिथ्यादर्शन शल्य। माया, निकृति और वंचना अर्थात् ठगनेकी वृत्ति यह माया शल्य है। भोगों-
२५ की लालसा निदान शल्य है और अतत्त्वोंका श्रद्धान मिथ्यादर्शन शल्य है। इन तीन शल्योंसे जो रहित है वही निःशल्य व्रती कहा जाता है।

शंका—शल्यके न होनेसे निःशल्य होता है और व्रतोंके धारण करनेसे व्रती होता है। शल्यरहित होनेसे व्रती नही हो सकता। उदाहरणार्थ देवदत्त के हाथमें लाठी होनेपर वह छत्री नही हो सकता ?

समाधान—व्रती होनेके लिये दोनों विशेषणोसे युक्त होना आवश्यक है, यदि किसीने शल्योंका

(१) चौर्यं वाचरति ता.। (२) एवमुक्तक्रमेण हिंसा–ता.। (३)–प्रहरण। तच्छल्य–मु.। (४) तथा शरीर–मु.। (५)–विशिष्टत्वात् मु.।

मात्रव्रताभिसम्बन्धाद् व्रती भवत्यन्तरेण शल्याभावम् । सति शल्यापगमे व्रतसम्बन्धाद् व्रती विवक्षितो यथा बहुक्षीरघृतो गोमानिति व्यपदिश्यते । बहुक्षीरघृताभावात्सतीष्वपि गोषु न गोमांस्तथा सशल्यत्वात्सत्स्वपि व्रतेषु न व्रती । यस्तु नि शल्य स व्रती ।

तस्य भेदप्रतिपत्त्यर्थमाह—

अगार्यनगारश्च ॥ १९ ॥ ५

प्रतिश्रयार्थिभिः अङ्गचते इति अगारं वेश्म, तद्वानगारी । न विद्यते अगारमस्येत्यनगार । द्विविधो व्रती अगारी अनगारश्च । ननु चात्र विपर्ययोऽपि प्राप्नोति शून्यागारदेवकुलाद्यावासस्य मुनेरगारित्वम् अनिवृत्तविषयतृष्णस्य कुतश्चित्कारणाद् गृहं विमुच्य वने वसतोऽनगारत्वञ्च प्राप्नोतीति[2] ? नैष दोष , भावागारस्य विवक्षितत्वात् । चारित्रमोहोदये सत्यगारसम्बन्ध प्रत्यनिवृत्त[3] परिणामो भावागारमित्युच्यते । स १० यस्यास्त्यसावगारी वने वसन्नपि । गृहे वसन्नपि तदभावादनगार इति च भवति । ननु चागारिणो व्रतित्वं न प्राप्नोति, असकलव्रतत्वात् ? नैष दोष ; नैगमादिनयापेक्षया

त्याग नही किया और केवल हिंसादि दोषोको छोड़ दिया तो वह व्रती नही हो सकता। यहा ऐसा व्रती इष्ट है जिसने शल्योका त्याग करके व्रतोको स्वीकार किया है। जैसे जिसके यहा बहुत घी दूध होता है वह गायवाला कहा जाता है। यदि उसके घी दूध नही होता और गाए है तो वह गायवाला नही कहलाता, १५ उसी प्रकार जो सशल्य है व्रतोके होनेपर भी वह व्रती नही हो सकता। किन्तु जो नि शल्य है वह व्रती है।

अब उसके भेदोंका कथन करने के लिये आगेका सूत्र कहते है—

उसके अगारी और अनगार ये दो भेद हैं॥ १९ ॥

आश्रय चाहनेवाले जिसे अगीकार करते है वह अगार है। अगारका अर्थ वेश्म अर्थात् घर है। जिसके घर है वह अगारी है। और जिसके घर नही है वह अनगार है। इस तरह व्रती दो प्रकारका २० है—अगारी और अनगार।

शका—अभी अगारी और अनगारका जो लक्षण कहा है उससे विपरीत अर्थ भी प्राप्त होता है, क्यो कि उपर्युक्त लक्षणके अनुसार जो मुनि शून्य घर और देवकुलमे निवास करते है वे अगारी हो जायगे और विषयतृष्णाका त्याग किये बिना जो किसी कारणसे घरको छोड़कर वनमे रहने लगे है वे अनगार हो जायगे ? २५

समाधान—यह कोई दोष नही है, क्यो कि यहा पर भावागार विवक्षित है। चारित्र मोहनीयका उदय होने पर जो परिणाम घरसे निवृत्त नही है वह भावागार कहा जाता है। वह जिसके है वह वनमे निवास करते हुए भी और घरमे रहते हुए भी अगारी है और जिसके इस प्रकारका परिणाम नही है वह अनगार है।

शका—अगारी व्रती नही हो सकता, क्यो कि उसके पूर्ण व्रत नही है ? ३०

समाधान—यह कोई दोष नही है, क्योकि नैगम आदि नय की अपेक्षा नगरावासके समान अगारी-

---

(१)–मात्रसम्ब–मु. । (२)–प्नोति नैष आ., दि. १, दि. २। (३)–वृत्तिपरि–आ., दि., १, दि. २।

अगारिणोऽपि व्रतित्वमुपपद्यते नगरावासवत् । यथा गृहे अपवरके वा वसन्नपि नगरावास इत्युच्येत तथा असकलव्रतोऽपि नैगमसंग्रहव्यवहारनयापेक्षया व्रतीति व्यपदिश्यते ।

अत्राह किं हिंसादीनामन्यतमस्माद्यः प्रतिनिवृत्तः स खल्वगारी व्रती ? नैवम् । किं तर्हि ? पञ्चतय्या अपि विरतेर्वैकल्येन विवक्षित इत्युच्यते—

५ **अणुव्रतोऽगारी ॥ २० ॥**

'अणु'शब्दोऽल्पवचनः । अणूनि व्रतान्यस्य अणुव्रतोऽगारीत्युच्यते । कथमस्य व्रतानामणुत्वम् ? सर्वसावद्यनिवृत्त्यसम्भवात् । कुतस्तर्ह्यसौ निवृत्तः । त्रसप्राणिव्यपरोपणान्निवृत्तः अगारीत्याद्यमणुव्रतम् । स्नेहमोहादिवशाद् गृहविनाशे ग्रामविनाशे वा कारणमित्यभिमतादसत्यवचनान्निवृत्तो गृहीति द्वितीयमणुव्रतम् । अन्यपीडाकरं पार्थिवभयादिवशादवश्यं परित्यक्तमपि यददत्तं ततः प्रतिनिवृत्तादरः श्रावक इति तृतीयमणुव्रतम् । उपात्ताया अनुपात्तायाश्च पराङ्गनायाः सङ्गान्निवृत्तरतिर्गृहीति चतुर्थमणुव्रतम् । धनधान्यक्षेत्रा-

के भी व्रतीपना बन जाता है। जैसे कोई घरमें या झोपड़ीमें रहता है तो भी 'मैं नगरमें रहता हूँ' यह कहा जाता है उसी प्रकार जिसके पूरे व्रत नहीं हे वह नैगम, संग्रह और व्यवहारनयकी अपेक्षा व्रती कहा जाता है।

१५ शंका—जो हिंसादिकमे से किसी एकसे निवृत्त है वह क्या अगारी व्रती है ?

समाधान—ऐसा नही है।

शंका—तो क्या है ?

समाधान—जिसके एक देशसे पांचों प्रकारकी विरति है वह अगारी है यह अर्थ यहां विवक्षित है। अब इसी बातको बतलानेके लिये आगेका सूत्र कहते हैं—

२० **अणुव्रतोंका धारी अगारी है ॥ २० ॥**

अणु शब्द अल्पवाची है। जिसके व्रत अणु अर्थात् अल्प हैं वह अणुव्रतवाला अगारी कहा जाता है।

शंका—अगारीके व्रत अल्प कैसे होते है ?

समाधान—अगारीके पूरे हिंसादि दोषोंका त्याग सम्भव नहीं है इसलिये उसके व्रत अल्प होते हैं।

शंका—तो यह किसका त्यागी है ?

२५ समाधान—यह त्रस जीवोंकी हिंसाका त्यागी है; इसलिये उसके पहला अहिसा अणुव्रत होता है। गृहस्थ स्नेह और मोहादिकके वशसे गृहविनाश और ग्रामविनाशके कारण असत्य वचनसे निवृत्त है इसलिये उसके दूसरा सत्याणुव्रत होता है। श्रावक राजाके भय आदिके कारण दूसरेको पीड़ाकारी जान कर बिना दी हुई वस्तुको लेना यद्यपि अवश्य छोड़ देता है तो भी बिना दी हुई वस्तुके लेनेसे उसकी प्रीति घट जाती है इसलिये उसके तीसरा अचौर्याणुव्रत होता है। गृहस्थके स्वीकार की हुई या बिना ३० स्वीकार की हुई परस्त्रीका संग करनेसे रति हट जाती है इसलिये उसके परस्त्रीत्याग नामका चौथा

(१)—करपार्थिव—मु.।

दीनामिच्छावशात् कृतपरिच्छेदो गृहीति पञ्चममणुव्रतम् ।

आह अपरित्यक्तागारस्य किमेतावानेव विशेष आहोस्विदस्ति कश्चिदन्योऽपीत्यत आह––

दिग्देशानर्थदण्डविरतिसामायिकप्रोषधोपवासोपभोगपरिभोगपरिमाणातिथिसंविभागव्रतसम्पन्नश्च ।। २१ ।। ५

'विरति'शब्दः प्रत्येकं परिसमाप्यते । दिग्विरतिः देशविरतिः अनर्थदण्डविरतिरिति एतानि त्रीणि गुणव्रतानि, 'व्रत' शब्दस्य प्रत्येकमभिसम्बन्धात् । तथा सामायिकव्रतं प्रोषधोपवासव्रतं उपभोगपरिभोगपरिमाणव्रतं अतिथिसंविभागव्रतं[1] एतानि चत्वारि शिक्षाव्रतानि । एतैर्व्रतैः सम्पन्नो गृही विरताविरत इत्युच्यते । तद्यथा––दिक्प्राच्यादिः तत्र प्रसिद्धैरभिज्ञानैरवधिं कृत्वा नियमनं दिग्विरतिव्रतम् । ततो बहिस्त्रसस्थावर- १० व्यपरोपणनिवृत्तेर्महाव्रतत्वमवसेयम्[2] । तत्र लाभे सत्यपि परिणामस्य निवृत्तेर्लोभनिरासश्च कृतो भवति । ग्रामादीनामवधृतपरिमाणः[3] प्रदेशो देशः । ततो बहिर्निवृत्तिर्देशविरतिव्रतम् । पूर्ववद्बहिर्महाव्रतत्वं व्यवस्थाप्यम् । असत्युपकारे पापादानहेतुरनर्थदण्डः[4] । ततो

अणुव्रत होता है। तथा गृहस्थ धन, धान्य और क्षेत्र आदिका स्वेच्छासे परिमाण कर लेता है इसलिये उसके पांचवां परिग्रहपरिमाण अणुव्रत होता है। १५

गृहस्थकी क्या इतनी ही विशेषता है कि और भी विशेषता है, अब यह बतलानेके लिये आगेका सूत्र कहते हैं––

वह दिग्विरति, देशविरति, अनर्थदण्डविरति, सामायिकव्रत, प्रोषधोपवासव्रत, उपभोगपरिभोगपरिमाणव्रत और अतिथिसंविभागव्रत इन व्रतोंसे भी सम्पन्न होता है ।।२१।।

विरति शब्द प्रत्येक शब्द पर लागू होता है। यथा-दिग्विरति, देशविरति और अनर्थदण्डविरति। २० ये तीन गुणव्रत है, क्यो कि व्रत शब्द का हर एकके साथ सम्बन्ध है। तथा सामायिकव्रत, प्रोषधोपवासव्रत, उपभोगपरिभोगपरिमाणव्रत और अतिथिसंविभागव्रत ये चार शिक्षाव्रत है। इस प्रकार इन व्रतोसे जो सम्पन्न है वह गृही विरताविरत कहा जाता है। खुलासा इस प्रकार है––

जो पूर्वादि दिशाएं है उनमे प्रसिद्ध चिह्नोके द्वारा मर्यादा करके नियम करना दिग्विरतिव्रत है। उस मर्यादाके बाहर त्रस और स्थावर हिंसाका त्याग हो जानेसे उतने अशमें महाव्रत होता है। मर्यादाके २५ बाहर लाभ होते हुए भी उसमे परिणाम न रहनेके कारण लोभका त्याग हो जाता है। ग्रामादिककी निश्चित मर्यादारूप प्रदेश देश कहलाता है। उससे बाहर जानेका त्याग कर देना देशविरतिव्रत है। यहां भी पहलेके समान मर्यादाके बाहर महाव्रत होता है। उपकार न होकर जो प्रवृत्ति केवल पापका

(१) व्रतम्। इत्येतै–मु.। (२) सीमन्ताना परतः स्थूलेतरपञ्चपापसत्यागात् । देशावकाशिकेन च महाव्रतानि प्रसाध्यन्ते ।।'–रत्न. ३, ५। (३)–माणप्रदेशो मु.। (४) 'पापोपदेशहिंसादानापध्यानदुःश्रुतीः पञ्च। प्राहुः प्रमादचर्यामनर्थदण्डानदण्डधराः ।।'–रत्न. ३, ५।

विरतिरनर्थदण्डविरतिः । अनर्थदण्डः पञ्चविधः--अपध्यानं पापोपदेशः प्रमादाचरितं हिंसाप्रदानं अशुभश्रुतिरिति । तत्र परेषां जयपराजयवधबन्धनाङ्गच्छेदपरस्वहरणादि[1] कथं स्यादिति मनसा[2] चिन्तनमपध्यानम्[3] । तिर्यक्क्लेशवाणिज्यप्राणिवधकारम्भादिषु पापसंयुक्तं वचनं पापोपदेशः[4] । प्रयोजनमन्तरेण वृक्षादिच्छेदनभूमिकुट्टनसलिल-
५ सेचनाद्यवद्यकर्म प्रमादाचरितम्[5] । विषकण्टकशस्त्राग्निरज्जुकशादण्डादिहिंसोपकरणप्रदानं हिंसाप्रदानम् । हिंसारागादिप्रवर्धनदुष्टकथाश्रवणशिक्षणव्यापृतिरशुभश्रुतिः ।

समेकीभावे[6] वर्तते । तद्यथा सङ्गतं घृतं सङ्गतं तैलमित्युच्यते एकीभूतमिति गम्यते । एकत्वेन अयनं गमनं समयः, समय एव सामायिकं, समयः प्रयोजनमस्येति वा विगृह्य सामायिकम् । इयति देशे एतावति काले इत्यवधारिते सामायिके स्थितस्य महाव्रतत्वं
१० पूर्ववद्वेदितव्यम् । कुतः ? अणुस्थूलकृतहिंसादिनिवृत्तेः । संयमप्रसङ्ग इति चेत् ? न;

कारण है वह अनर्थदण्ड है। इससे विरत होना अनर्थदण्डविरति है। अनर्थदण्ड पांच प्रकारका है—अपध्यान, पापोपदेश, प्रमादाचरित, हिंसाप्रदान और अशुभश्रुति। दूसरोंका जय, पराजय, मारना, बांधना, अंगोंका छेदना और धनका अपहरण आदि कैसे किया जाय इस प्रकार मनसे विचार करना अपध्यान नामका अनर्थदण्ड है। तिर्यंचोंको क्लेश पहुंचानेवाले, वणिजका प्रसार करनेवाले
१५ और प्राणियोंकी हिंसाके कारण भूत आरम्भ आदिके विषयमें पापबहुल वचन बोलना पापोपदेश नामका अनर्थदण्ड है। बिना प्रयोजनके वृक्षादिका छेदना, भूमिका कूटना, पानीका सींचना आदि पाप कार्य प्रमादाचरित नामका अनर्थदण्ड है। विष, कांटा, शस्त्र, अग्नि, रस्सी, चाबुक और लकड़ी आदि हिंसाके उपकरणोंका प्रदान करना हिंसाप्रदान नामका अनर्थदण्ड है। हिंसा और राग आदिको बढ़ानेवाली दुष्ट कथाओंका सुनना और उनकी शिक्षा देना अशुभश्रुति नामका अनर्थदण्ड है।

२० 'सम्' उपसर्गका अर्थ एक रूप है। जैसे 'घी संगत है, तेल संगत है' जब यह कहा जाता है तब संगत का अर्थ एकीभूत होता है। सामायिकमें मूल शब्द समय है। इसके दो अवयव हैं सम् और अय। सम् का अर्थ कहा ही है और अय का अर्थ गमन है। समुदायार्थ एकरूप हो जाना समय है और समय ही सामायिक है। अथवा समय अर्थात् एक रूप हो जाना ही जिसका प्रयोजन है वह सामायिक है। इतने देशमें और इतने काल तक इस प्रकार निश्चित की गई सामायिकमें स्थित पुरुषके पहलेके समान
२५ महाव्रत जानना चाहिये, क्योंकि इसके सूक्ष्म और स्थूल दोनों प्रकारके हिंसा आदि पापोंका त्याग हो जाता है।

(१)–च्छेदस्वहर–आ.। च्छेदसर्वस्वहर–दि. १, द. २। (२) 'वधबन्धच्छेदादेर्द्वेषाद्रागाच्च परकलत्रादेः। आध्यानमपध्यानं शासति जिनशासने विशदाः ॥'–रत्न. ३,३२। (३)–ध्यानम्। प्राणिवधक–आ., दि. १, दि. २। (४) 'तिर्यक्क्लेशवणिज्याहिंसारम्भप्रलम्भनादीनाम् । कथाप्रसङ्गप्रसवः स्मर्तव्यः पाप उपदेशः ॥'–रत्न. ३, ३०। (५) 'क्षितिसलिलदहनपवनारम्भं विफलं वनस्पतिच्छेदम्। सरणं सारणमपि च प्रमादचर्यां प्रभाषन्ते ॥'–रत्न. ३,३४। (६) "तद्यदा तावदेकार्थीभावः सामर्थ्यन्तदैवं विग्रहः करिष्यते–सङ्गतार्थः समर्थः सृष्टार्थः समर्थ इति। तद्यथा सङ्गतं घृतं सङ्गतं तैलमित्युच्यते एकीभूतमिति गम्यते।'–पा. म. भा. २,१,१, १।

तद्घातिकर्मोदयसद्भावात् । महाव्रतत्वाभाव इति चेत् ? तन्न; उपचाराद् राजकुले सर्वगतचैत्राभिधानवत् ।

प्रोषधशब्दः पर्वपर्यायवाची । शब्दादिग्रहणं प्रति निवृत्तौत्सुक्यानि पञ्चापीन्द्रियाण्युपेत्य तस्मिन् वसन्तीत्युपवासः । [1]चतुर्विधाहारपरित्याग इत्यर्थः । प्रोषधे उपवासः प्रोषधोपवासः । [2]स्वशरीरसंस्कारकारणस्नानगन्धमाल्याभरणादिविरहितः शुचाववकाशे साधुनिवासे चैत्यालये स्वप्रोषधोपवासगृहे वा धर्मकथाश्रवणश्रावणचिन्तनविहितान्तःकरणः सन्नुपवसेन्निरारम्भः श्रावकः । ५

उपभोगोऽशनपानगन्धमाल्यादिः । परिभोग आच्छादनप्रावरणालङ्कारशयनासनगृहयानवाहनादिः । तयोः परिमाणमुपभोगपरिभोगपरिमाणम् । [3]मधु मांसं मद्यञ्च सदा परिहर्तव्यं त्रसघातान्निवृत्तचेतसा । [4]केतक्यर्जुनपुष्पादीनि शृङ्गवेरमूलकादीनि बहुजन्तु- १०

शंका—यदि ऐसा है तो सामायिकमे स्थित हुए पुरुषके सकलसंयमका प्रसंग प्राप्त होता है ?

समाधान—नही, क्यों कि इसके संयमका घात करनेवाले कर्मोंका उदय पाया जाता है।

शंका—तो फिर इसके महाव्रतका अभाव प्राप्त होता है ?

समाधान—नही, क्यों कि जैसे राजकुलमें चैत्रको सर्वगत उपचारसे कहा जाता है उसी प्रकार इसके महाव्रत उपचारसे जानना चाहिये। १५

प्रोषधका अर्थ पर्व है और पांचों इन्द्रियोंके शब्दादि विषयोंके त्यागपूर्वक उसमे निवास करना उपवास है। अर्थात् चार प्रकारके आहारका त्याग करना उपवास है। तथा प्रोषधके दिनोमें जो उपवास किया जाता है उसे प्रोषधोपवास कहते हैं। प्रोषधोपवासी श्रावकको अपने शरीरके संस्कारके कारण स्नान, गन्ध, माला और आभरण आदिका त्याग करके किसी पवित्र स्थानमे, साधुओके रहनेके स्थानमे, चैत्यालयमें या अपने प्रोषधोपवासके लिये नियत किये गये घरमे धर्मकथाके सुनने, सुनाने और चिन्तवन करनेमे मनको लगा कर उपवास करना चाहिये और सब प्रकारका आरम्भ छोड देना चाहिये। २०

भोजन, पान, गन्ध और माला आदि उपभोग कहलाते है तथा ओढ़ना-बिछाना, अलंकार, शयन, आसन, घर, यान और वाहन आदि परिभोग कहलाते है। इनका परिमाण करना उपभोग-परिभोग-परिमाण व्रत है।

जिसका चित्त त्रसहिंसासे निवृत्त है उसे सदाके लिये मधु, मांस और मदिराका त्याग कर देना चाहिये। जो बहुत जन्तुओंकी उत्पत्तिके आधार है और जिन्हे अनन्तकाय कहते है ऐसे केतकीके २५

(१) चतुराहारविसर्जनमुपवासः।'–रत्न. ४, १९। (२) 'पञ्चानां पापानामलंक्रियारम्भगन्धपुष्पाणाम्। स्नानाञ्जननस्यानामुपवासे परिहृतिं कुर्यात् ॥ धर्मामृतं सतृष्णः श्रवणाभ्यां पिबतु पाययेद्वान्यान्। ज्ञानध्यानपरो वा भवतूपवसन्नतन्द्रालुः ॥'–रत्न. ४-१७, १८। (३) 'त्रसहतिपरिहरणार्थं क्षौद्रं पिशितं प्रमादपरिहृतये। मद्यं च वर्जनीयं जिनचरणौ शरणमुपयातैः ॥'–रत्न. ३, ३८। (४) अल्पफलबहुविघातान्मूलकमार्द्राणि शृंगवेराणि। नवनीतनिम्बकुसुमं कैतकमित्येवमवहेयम् ॥'–रत्न. ३,३९।

योनिस्थानान्यनन्तकायव्यपदेशार्हाणि परिहर्तव्यानि बहुघाताल्पफलत्वात् । यानवाहनाभरणादिष्वेतावदेवेष्टमतोऽन्यदनिष्टमित्यनिष्टान्निवर्तनं कर्तव्यं कालनियमेन यावज्जीवं वा यथाशक्ति ।

संयममविनाशयन्नततीत्यतिथिः । अथवा नास्य तिथिरस्तीत्यतिथिः अनियतकालागमन इत्यर्थः । अतिथये संविभागोऽतिथिसंविभागः । स चतुर्विधः; भिक्षोपकरणौषधप्रतिश्रयभेदात् । मोक्षार्थमभ्युद्यतायातिथये संयमप्रायणाय शुद्धाय शुद्धचेतसा निरवद्या भिक्षा देया । धर्मोपकरणानि च सम्यग्दर्शनाद्युपबृंहणानि दातव्यानि । औषधमपि योग्यमुपयोजनीयम् । प्रतिश्रयश्च परमधर्मश्रद्धया प्रतिपादयितव्य इति । 'च'शब्दो वक्ष्यमाणगृहस्थधर्मसमुच्चयार्थः ।

कः पुनरसौ ?—

मारणान्तिकीं सल्लेखनां जोषिता ॥ २२ ॥

स्वपरिणामोपात्तस्यायुष इन्द्रियाणां बलानां च कारणवशात्संक्षयो मरणम् । 'अन्त' ग्रहणं तद्भवमरणप्रतिपत्त्यर्थम् । मरणमन्तो मरणान्तः । स प्रयोजनमस्येति मारणा-

---

फूल और अर्जुनके फूल आदि तथा अदरख और मूली आदिका त्याग कर देना चाहिये, क्यों कि इनके सेवनमें फल कम है और घात बहुत जीवोंका है। तथा यान, वाहन और आभरण आदिकमें हमारे लिये इतना ही इष्ट है शेष सब अनिष्ट है इस प्रकारका विचार करके कुछ काल के लिये या जीवन भरके लिये शक्त्यनुसार जो अपने लिये अनिष्ट हो उसका त्याग कर देना चाहिये।

संयमका विनाश न हो इस विधिसे जो आता है वह अतिथि है या जिसके आनेकी कोई तिथि नहीं नहीं उसे अतिथि कहते हैं। तात्पर्य यह है कि जिसके आनेका कोई काल निश्चित नहीं है उसे अतिथि कहते है। इस अतिथिके लिये विभाग करना अतिथिसंविभाग है। वह चार प्रकारका है—भिक्षा, उपकरण, औषध और प्रतिश्रय अर्थात् रहनेका स्थान। जो मोक्षके लिये बद्धकक्ष है, संयमके पालन करनमें तत्पर है और शुद्ध है उस अतिथिके लिये शुद्ध मनसे निर्दोष भिक्षा देनी चाहिये। सम्यग्दर्शन आदिके बढ़ानेवाले धर्मोपकरण देने चाहिये। योग्य औषधकी योजना करनी चाहिये तथा परम धर्मकी श्रद्धापूर्वक निवास-स्थान भी देना चाहिये।

सूत्रमें जो 'च' शब्द है वह आगे कहे जानेवाले गृहस्थधर्मके संग्रह करनेके लिये दिया है।

वह और कौन-सा गृहस्थ धर्म है—

तथा वह मारणान्तिक संलेखनाका प्रीति पूर्वक सेवन करनेवाला होता है ॥ २२ ॥

अपने परिणामोंसे प्राप्त हुई आयुका, इन्द्रियोंका और मन, वचन, काय इन तीन बलोंका कारण विशेषके मिलने पर नाश होना मरण है। उसी भवके मरणका ज्ञान करानेके लिये सूत्रमें मरण शब्दके साथ अन्त पदको ग्रहण किया है। मरण यही अन्त मरणान्त है और जिसका यह मरणान्त ही प्रयोजन

---

(१) 'यदनिष्टं तद्व्रतयेद्यच्चानुपसेव्यमेतदपि जह्यात् ।'—रत्न. ३,४०।

न्तिकी। सम्यक्कायकषायलेखना सल्लेखना। कायस्य बाह्यस्याभ्यन्तराणां च कषायाणां तत्कारणहापनक्रमेण[1] सम्यग्लेखना सल्लेखना। तां मारणान्तिकीं सल्लेखनां जोषिता सेविता गृहीत्यभिसम्बध्यते। ननु च विस्पष्टार्थं सेवितेत्येवं वक्तव्यम्? न; अर्थविशेषोपपत्तेः। न केवलमिह सेवनं परिगृह्यते। किं तर्हि? प्रीत्यर्थोऽपि। यस्मादसत्यां प्रीतौ बलान्न सल्लेखना कार्यते। सत्यां हि प्रीतौ स्वयमेव करोति। स्यान्मतमात्मवधः ५ प्राप्नोति; स्वाभिसन्धिपूर्वकायुरादिनिवृत्तेः? नैष दोषः; अप्रमत्तत्वात्। 'प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा' इत्युक्तम्। न चास्य प्रमादयोगोऽस्ति। कुत.? रागाद्यभावात्। रागद्वेषमोहाविष्टस्य हि विषशस्त्राद्युपकरणप्रयोगवशादात्मानं घ्नतः स्वघातो भवति। न सल्लेखनां प्रतिपन्नस्य रागादयः सन्ति ततो नात्मवधदोषः। उक्तं च—

"रागादीणमणुप्पा अहिंसगत्तं ति [2]देसिदं समये। १०
तेसिं चे उप्पत्ती हिंसेति जिणेहि णिद्दिट्ठा॥"

है वह मारणान्तिकी कहलाती है। अच्छे प्रकारसे काय और कषायका लेखन करना अर्थात् कृष करना सल्लेखना है। अर्थात् बाहरी शरीरका और भीतरी कषायोंका, उत्तरोत्तर काय और कषायको पुष्ट करनेवाले कारणोको घटाते हुए, भले प्रकारसे लेखन करना अर्थात् कृष करना सल्लेखना है। मरणके अन्तमे होनेवाली इस सल्लेखनाको प्रीतिपूर्वक सेवन करनेवाला गृहस्थ होता है यह इस सूत्रका तात्पर्य है। १५

शंका—सहज तरीकेसे अर्थका स्पष्टीकरण हो इसके लिये सूत्रमें 'जोषिता' इसके स्थानमें 'सेविता' कहना ठीक है?

समाधान—नही, क्योंकि, 'जोषिता' क्रियाके रखनेसे उससे अर्थ-विशेष ध्वनित हो जाता है। यहां केवल 'सेवन करना' अर्थ नही लिया गया है किन्तु प्रीति रूप अर्थ भी लिया गया है, क्यों कि प्रीतिके न रहन पर बलपूर्वक सल्लेखना नही कराई जाती। किन्तु प्रीति के रहने पर जीव स्वयं ही सल्लेखना २० करता है। तात्पर्य यह है कि 'प्रीतिपूर्वक सेवन करना' यह अर्थ 'जोषिता' क्रियासे निकल आता है 'सेविता' से नही, अत. सूत्रमे 'जोषिता' क्रिया रखी है।

शंका—चूंकि सल्लेखनामे अपने अभिप्रायसे आयु आदिका त्याग किया जाता है इसलिये यह आत्मघात हुआ?

समाधान—यह कोई दोष नही है, क्यों कि सल्लेखनामे प्रमादका अभाव है। 'प्रमत्तयोगसे प्राणों- २५ का वध करना हिंसा है' यह पहले कहा जा चुका है। परन्तु इसके प्रमाद नही है, क्यों कि इसके रागादिक नहीं पाये जाते। राग, द्वेष और मोहसे युक्त होकर जो विष और शस्त्र आदि उपकरणोका प्रयोग करके उनसे अपना घात करता है उसे आत्मघातका दोष प्राप्त होता है। परन्तु सल्लेखनाको प्राप्त हुए जीवके रागादिक तो हैं नहीं इसलिये इसे आत्मघातका दोष नही प्राप्त होता। कहा भी है—

"शास्त्रमे यह उपदेश है कि रागादिकका नही उत्पन्न होना अहिसा है। तथा जिनदेवने उनकी ३० उत्पत्ति को हिसा कहा है॥"

(१)—हापनया क्रमे–आ., दि. १, ता.। (२) त्ति भासिद स–मु.।

किञ्च मरणस्यानिष्टत्वाद्यथा वणिजो विविधपण्यदानादानसञ्चयपरस्य स्वगृहविनाशोऽनिष्टः। तद्विनाशकारणे च कुतश्चिदुपस्थिते यथाशक्ति परिहरति। दुष्परिहारे च पण्यविनाशो यथा न भवति तथा यतते। एवं गृहस्थोऽपि व्रतशीलपण्यसंचये प्रवर्तमानः तदाश्रयस्य न पातमभिवाञ्छति। तदुपप्लवकारणे चोपस्थिते स्वगुणाविरोधेन परिहरति। दुष्परिहारे च यथा स्वगुणविनाशो न भवति तथा प्रयतत इति कथमात्मवधो भवेत्।

अत्राह, 'निःशल्यो व्रती' इत्युक्तं तत्र च तृतीयं शल्यं मिथ्यादर्शनम्। ततः सम्यग्दृष्टिना व्रतिना निःशल्येन भवितव्यमित्युक्तम्। तत्सम्यग्दर्शनं किं सापवादं निरपवादमिति? उच्यते—कस्यचिन्मोहनीयावस्थाविशेषात्कदाचिदिमे भवन्त्यपवादाः—

शङ्काकाङ्क्षाविचिकित्साऽन्यदृष्टिप्रशंसासंस्तवाः सम्यग्दृष्टेरतिचाराः ॥ २३ ॥

निःशङ्कितत्वादयो व्याख्याताः 'दर्शनविशुद्धिः' इत्यत्र। तत्प्रतिपक्षभूताः शङ्कादयो वेदितव्याः। अथ प्रशंसासंस्तवयोः को विशेषः? मनसा मिथ्यादृष्टेर्ज्ञानचारित्रगुणो-

---

दूसरे मरण किसी को भी इष्ट नहीं है। जैसे नाना प्रकारकी विक्रेय वस्तुओंके देन, लेन और संचयमें लगे हुए किसी व्यापारीको अपने घरका नाश होना इष्ट नहीं है। फिर भी परिस्थितिवश उसके विनाशके कारण आ उपस्थित हों तो यथाशक्ति वह उनको दूर करता है। इतने पर भी यदि वे दूर न हो सकें तो जिससे विक्रेय वस्तुओंका नाश न हो ऐसा प्रयत्न करता है उसी प्रकार पण्यस्थानीय व्रत और शीलके संचयमें जुटा हुआ गृहस्थ भी उनके आधारभूत आयु आदिका पतन नहीं चाहता। यदा कदाचित् उनके विनाशके कारण उत्पन्न हो जाँय तो जिससे अपने गुणोंमें बाधा नहीं पड़े इस प्रकार उनको दूर करनेका प्रयत्न करता है। इतने पर भी यदि वे दूर न हों तो जिससे अपने गुणोंका नाश न हो इस प्रकार प्रयत्न करता है इसलिये इसके आत्मघात नामका दोष कैसे हो सकता है। अर्थात् नहीं हो सकता है।

यहां पर शंकाकार कहता है कि व्रती निःशल्य होता है ऐसा कहा है और वहां तीसरी शल्य मिथ्यादर्शन है। इसलिये सम्यग्दृष्टि व्रतीको निःशल्य होना चाहिये यह उसका अभिप्राय है, तो अब यह बतलाइये कि वह सम्यग्दर्शन सापवाद होता है या निरपवाद होता है? अब इसका समाधान करते हैं—किसी जीवके मोहनीयकी अवस्था विशेषके कारण ये अपवाद होते हैं—

शंका, कांक्षा, विचिकित्सा, अन्यदृष्टिप्रशंसा और अन्यदृष्टिसंस्तव ये सम्यग्दृष्टि के पांच अतिचार हैं ॥ २३ ॥

'दर्शनविशुद्धिः' इत्यादि सूत्रका व्याख्यान करते समय निःशंकितत्व आदिका व्याख्यान किया। ये शंकादिक उनके प्रतिपक्षभूत जानना चाहिये।

शंका—प्रशंसा और संस्तवमें क्या अन्तर है?

---

(१)-शक्ति च परि-मु.। (२) व्रतिना भवि-आ., दि., १, दि. २।

द्भावनं प्रशंसा, भूताभूतगुणोद्भाववचनं संस्तव इत्ययमनयोर्भेदः । ननु च सम्यग्दर्शनमष्टाङ्गमुक्तं तस्यातिचारैरप्यष्टभिर्भवितव्यम् ? नैष दोषः; व्रतशीलेषु पञ्च पञ्चातिचारा इत्युत्तरत्र विवक्षुणाऽऽचार्येण प्रशंसासंस्तवयोरितरानतिचारानन्तर्भाव्य पञ्चैवातिचारा उक्ताः ।

आह, सम्यग्दृष्टेरतिचारा उक्ताः । किमेवं व्रतशीलेष्वपि भवन्तीति ? ओमित्युक्त्वा तदतिचारसंख्यानिर्देशार्थमाह— ५

व्रतशीलेषु पञ्च पञ्च यथाक्रमम् ॥ २४ ॥

व्रतानि च शीलानि च व्रतशीलानि तेषु व्रतशीलेषु । शीलग्रहणमनर्थकम्; व्रतग्रहणेनैव सिद्धेः ? नानर्थकम्; विशेषज्ञापनार्थं व्रतपरिरक्षणार्थं शीलमिति दिग्विरत्यादीनीह 'शील'ग्रहणेन गृह्यन्ते । १०

अगार्यधिकारादगारिणो व्रतशीलेषु पञ्च पञ्चातिचारा वक्ष्यमाणा यथाक्रमं वेदितव्याः । तद्यथा—आद्यस्य तावदहिंसाव्रतस्य—

समाधान—मिथ्यादृष्टिके ज्ञान और चारित्र गुणोंका मनसे उद्भावन करना प्रशंसा है और मिथ्यादृष्टिमे जो गुण हैं या जो गुण नहीं हैं इन दोनोंका सद्भाव बतलाते हुए कथन करना संस्तव है, इस प्रकार यह दोनोंमें अन्तर है । १५

शंका—सम्यग्दर्शनके आठ अंग कहे हैं, इसलिए उसके अतिचार भी आठ ही होने चाहिए ।

समाधान—यह कोई दोष नही है, क्योकि आगे आचार्य व्रतों और शीलों के पाँच-पाँच अतिचार कहनेवाले हैं इसलिये अन्यदृष्टिप्रशंसा और अन्यदृष्टिसंस्तव इन दो अतिचारोमे शेष अतिचारोका अन्तर्भाव करके सम्यग्दृष्टिके पांच ही अतिचार कहे हैं ।

सम्यदृष्टिके अतिचार कहे, क्या इसी प्रकार व्रत और शीलोके भी अतिचार होते हैं ? हां, यह कह कर अब उन अतिचारोंकी संख्याका निर्देश करनेके लिये आगेका सूत्र कहते हैं— २०

व्रतों और शीलोंमें पांच पांच अतिचार हैं जो क्रमसे इस प्रकार है ॥ २४ ॥

शील और व्रत इन शब्दोका कर्मधारय समास होकर व्रतशील पद बना ह । उनमें अर्थात् व्रत-शीलोंमे ।

शंका—सूत्रमें शील पदका ग्रहण करना निष्फल है, क्यो कि व्रत पदके ग्रहण करनेसे ही उसकी सिद्धि हो जाती है ? २५

समाधान—सूत्रमें शील पदका ग्रहण करना निष्फल नही है, क्यों कि विशेषका ज्ञान करानेके लिये और व्रतोंकी रक्षा करनेके लिये शील है इसलिये यहां शील पदके ग्रहण करनेसे दिग्विरति आदि लिये जाते हैं ।

यहां गृहस्थका प्रकरण है, इसलिये गृहस्थके व्रतों और शीलोके आगे कहे जानेवाले क्रमसे पांच पांच अतिचार जानने चाहिये जो निम्न प्रकार हैं । उसमे भी पहले प्रथम अहिसाव्रतके अतिचार बतलानेक लिये आगेका सूत्र कहते हैं— ३०

बन्धवधच्छेदातिभारारोपणान्नपाननिरोधाः ॥ २५ ॥

अभिमतदेशगतिनिरोधहेतुर्बन्धः । दण्डकशावेत्रादिभिरभिघातः प्राणिनां वधः, न प्राणव्यपरोपणम्; ततः प्रागेवास्य विनिवृत्तत्वात् । कर्णनासिकादीनामवयवानामपनयनं छेदः । न्याय्यभारादतिरिक्तवाहनमतिभारारोपणम् । गवादीनां क्षुत्पिपासाबाधाकरणमन्नपाननिरोधः । एते पञ्चाहिंसाणुव्रतस्यातिचाराः ।

मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियान्यासापहारसाकारमन्त्रभेदाः ॥ २६ ॥

अभ्युदयनिःश्रेयसार्थेषु क्रियाविशेषेषु अन्यस्यान्यथा प्रवर्तनमतिसन्धापनं वा मिथ्योपदेशः । यत्स्त्रीपुंसाभ्यामेकान्तेऽनुष्ठितस्य क्रियाविशेषस्य प्रकाशनं तद्रहोभ्याख्यानं वेदितव्यम् । अन्येनानुक्तमननुष्ठितं यत्किंचित्परप्रयोगवशादेवं तेनोक्तमनुष्ठितमिति वञ्चनानिमित्तं लेखनं कूटलेखक्रिया । हिरण्यादेर्द्रव्यस्य निक्षेप्तुर्विस्मृतसंख्यस्याल्पसंख्येयमाददानस्यैवमित्यनुज्ञावचनं न्यासापहारः । अर्थप्रकरणाङ्गविकारभ्रूविक्षेपादिभिः पराकूतमुपलभ्य तदाविष्करणमसूयादिनिमित्तं यत्तत्साकारमन्त्रभेद इति कथ्यते । त एते सत्याणुव्रतस्य पञ्चातिचारा बोद्धव्याः ।

बन्ध, वध, छेद, अतिभारका आरोपण और अन्नपानका निरोध ये अहिंसा अणुव्रतके पांच अतिचार हैं ॥ २५ ॥

किसीको अपने इष्ट स्थानमें जानेसे रोकनेके कारणको बन्ध कहते हैं। डंडा, चाबुक और बेंत आदिसे प्राणियोंको मारना वध है। यहां वधका अर्थ प्राणोंका वियोग करना नहीं लिया है क्योंकि अतिचारके पहले ही हिंसाका त्याग कर दिया जाता है। कान और नाक आदि अवयवोंका भेदना छेद है। उचित भारसे अतिरिक्त भारका लादना अतिभारारोपण है। गौ आदिको भूख-प्यासके लगने पर अन्नपानका रोकना अन्नपाननिरोध है। ये पांच अहिंसाणु व्रत के अतिचार हैं।

मिथ्योपदेश, रहोभ्याख्यान, कूटलेखक्रिया, न्यासापहार और साकारमंत्रभेद ये सत्याणुव्रतके पाँच अतिचार हैं ॥ २६ ॥

अभ्युदय और मोक्षकी कारणभूत क्रियाओंमें किसी दूसरेको विपरीत मार्गसे लगा देना या मिथ्या बचनों द्वारा दूसरोंको ठगना मिथ्योपदेश है। स्त्री और पुरुष द्वारा एकान्तमें किये गये आचरण विशेषका प्रकट कर देना रहोभ्याख्यान है। दूसरेने न तो कुछ कहा और न कुछ किया तो भी अन्य किसी की प्रेरणासे उसने ऐसा कहा है और ऐसा किया है इस प्रकार छलसे -लिखना कूटलेखक्रिया है। धरोहरमें चांदी आदिको रखनेवाला कोई उसकी संख्या भूलकर यदि उसे कमती लेने लगा तो 'ठीक है' इस प्रकार स्वीकार करना न्यासापहार है। अर्थवश, प्रकरणवश, शरीरके विकारवश या भ्रूक्षेप आदिके कारण दूसरेके अभिप्रायको जान कर डाहसे उसका प्रकट कर देना साकारमंत्रभेद है। इस प्रकार ये सत्याणुव्रतके पाँच अतिचार जानने चाहिये।

---

(१)–नुक्तं यत्किं मु.। (२)–भ्रूनिक्षेपणादि–मु.।

स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमानोन्मानप्रतिरूपकव्यवहाराः ॥ २७ ॥

मुष्णन्तं स्वयमेव वा प्रयुङ्क्तेऽन्येन वा प्रयोजयति प्रयुक्तमनुमन्यते वा यतः स स्तेनप्रयोगः । अप्रयुक्तेनाननुमतेन च चौरेणानीतस्य ग्रहणं तदाहृतादानम् । उचितन्यायादन्येन प्रकारेण दानग्रहणमतिक्रमः । विरुद्धं राज्यं विरुद्धराज्यं विरुद्धराज्येऽतिक्रमः विरुद्धराज्यातिक्रमः । तत्र ह्यल्पमूल्यलभ्यानि महार्घ्याणि द्रव्याणीति प्रयत्नः । प्रस्थादि मानम्, तुलाद्युन्मानम् । एतेन न्यूनेनान्यस्मै देयमधिकेनात्मनो ग्राह्यमित्येवमादिकूटप्रयोगो हीनाधिकमानोन्मानम् । कृत्रिमैर्हिरण्यादिभिर्वञ्चनापूर्वको व्यवहारः प्रतिरूपकव्यवहारः । त एते पञ्चादत्तादानाणुव्रतस्यातिचाराः ।

परविवाहकरणेत्वरिकापरिगृहीताऽपरिगृहीतागमनानङ्गक्रीडाकामतीव्राभिनिवेशाः ॥ २८ ॥

कन्यादानं विवाहः । परस्य विवाहः परविवाहः । परविवाहस्य करणं परविवाहकरणम् । परपुरुषानेति गच्छतीत्येवंशीला[1] इत्वरी । कुत्सिता इत्वरी कुत्सायां क

स्तेनप्रयोग, स्तेन आहृतादान, विरुद्धराज्यातिक्रम, हीनाधिक मानोन्मान और प्रतिरूपकव्यवहार ये अचौर्य अणुव्रतके पाँच अतिचार हैं ॥ २७ ॥

किसीको चोरीके लिये स्वयं प्रेरित करना, या दूसरेके द्वारा प्रेरणा दिलाना या प्रयुक्त हुए की अनुमोदना करना स्तेनप्रयोग है। अपने द्वारा अप्रयुक्त और असम्मत चोरके द्वारा लाई हुई वस्तुका ले लेना तदाहृतादान है। यहाँ न्यायमार्गको छोड़ कर अन्य प्रकारसे वस्तु ली गई है इसलिये अतिचार है। विरुद्ध जो राज्य वह विरुद्धराज्य है। राज्यमे किसी प्रकारका विरोध होने पर मर्यादाका न पालना विरुद्धराज्यातिक्रम है। यदि वहां अल्प मूल्यमे वस्तुएं मिल गई तो उन्हें महँगा बेचनेका प्रयत्न करना विरुद्धराज्यातिक्रम है। मानपद से प्रस्थ आदि मापनेके बांट लिये जाते हैं और उन्मानपदसे तराजू आदि तौलनेके बांट लिये जाते हैं। कमती माप-तौलसे दूसरेको देना और बढती माप-तौलसे स्वयं लेना इत्यादि कुटिलतासे लेन-देन करना हीनाधिकमानोन्मान है। बनावटी चांदी आदिसे कपटपूर्वक व्यवहार करना प्रतिरूपक व्यवहार है। इस प्रकार ये अदत्तादान अणुव्रतके पाँच अतिचार हैं।

परविवाहकरण, इत्वरिकापरिगृहीतागमन, इत्वारिका-अपरिगृहीतागमन, अनङ्गक्रीड़ा और कामतीव्राभिनिवेश ये स्वदारसन्तोष अणुव्रतके पाँच अतिचार हैं ॥ २८ ॥

कन्याका ग्रहण करना विवाह है। किसी अन्यका विवाह परविवाह है और इसका करना परविवाहकरण है। जिसका स्वभाव अन्य पुरुषोंके पास जाना आना है वह इत्वरी कहलाती है। इत्वरी अर्थात् अभिसारिका। इसमें भी जो अत्यन्त आचरट होती है वह इत्वरिका कहलाती है। यहां कुत्सित अर्थमें

---

(१) शीला इत्वरी कुत्सा–मु., ता. ।

इत्वरिका। या एकपुरुषभर्तृका सा परिगृहीता। या गणिकात्वेन पुंश्चलीत्वेन वा पर-पुरुषगमनशीला अस्वामिका सा अपरिगृहीता। परिगृहीता चापरिगृहीता च परिगृहीता-परिगृहीते। इत्वरिके च ते परिगृहीतापरिगृहीते च इत्वरिकापरिगृहीताऽपरिगृहीते, तयोर्गमने इत्वरिकापरिगृहीतापरिगृहीतागमने। अङ्गं प्रजननं योनिश्च ततोऽन्यत्र क्रीडा
५ अनङ्गक्रीडा। कामस्य प्रवृद्धः परिणामः कामतीव्राभिनिवेशः। त एते पञ्च स्वदारसन्तोष-व्रतस्यातिचाराः।

क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यप्रमाणातिक्रमाः ॥ २९ ॥

क्षेत्रं सस्याधिकरणम्। वास्तु अगारम्। हिरण्यं रूप्यादिव्यवहारतन्त्रम्। सुवर्णं प्रतीतम्। धनं गवादि। धान्यं व्रीह्यादि। दासीदासं भृत्यस्त्रीपुंसवर्गः। कुप्यं क्षौमका-
१० र्पासकौशेयचन्दनादि। क्षेत्रं च वास्तु च क्षेत्रवास्तु, हिरण्यं च सुवर्णं च हिरण्यसुवर्णम्, धनं च धान्यं च धनधान्यम्, दासी च दासश्च दासीदासम्। क्षेत्रवास्तु च हिरण्यसुवर्णं च धनधान्यं च दासीदासं च कुप्यं च क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यानि। एतावानेव परिग्रहो मम नान्य इति परिच्छिन्नाणुप्रमाणात्[1]क्षेत्रवास्त्वादिविषयादतिरेका अतिलोभवशात्प्रमाणातिक्रमा इति प्रत्याख्यायन्ते। त एते परिग्रहपरिमाणव्रतस्याति-
१५ चाराः।

'क' प्रत्यय होकर इत्वरिका शब्द बना है। जिसका कोई एक पुरुष भर्ता है वह परिगृहीता कहलाती है। तथा जो वेश्या या व्यभिचारिणी होनेसे दूसरे पुरुषोंके पास जाती आती रहती है और जिसका कोई पुरुष स्वामी नहीं है वह अपरिगृहीता कहलाती है। परिगृहीता इत्वरिकाका गमन करना इत्वरिका-परिगृहीतागमन है और अपरिगृहीता इत्वरिकाका गमन करना इत्वरिका अपरिगृहीता गमन है।
२० यहाँ अङ्ग शब्दका अर्थ प्रजनन और योनि है। तथा इनके सिवा अन्यत्र क्रीडा करना अनङ्गक्रीड़ा है। कामविषयक बढ़ा हुआ परिणाम कामतीव्राभिनिवेश है। ये स्वदारसन्तोष अणुव्रतके पाँच अतिचार हैं।

क्षेत्र और वास्तुके प्रमाणका अतिक्रम, हिरण्य और सुवर्णके प्रमाणका अतिक्रम, धन और धान्यके प्रमाणका अतिक्रम, दासी और दासके प्रमाणका अतिक्रम तथा कुप्यके प्रमाणका अतिक्रम ये परिग्रहपरिमाण अणुव्रतके पाँच अतिचार हैं ॥ २९ ॥

२५ धान्य पैदा करनेका आधारभूत स्थान क्षेत्र है। मकान वास्तु है। जिसमें रूप्य आदि व्यवहार होता है वह हिरण्य है। सुवर्णका अर्थ स्पष्ट है। धनसे गाय आदि लिये जाते हैं। धान्य से व्रीहि आदि लिये जाते हैं। नौकर स्त्री पुरुष मिलकर दासी-दास कहलाते हैं। रेशम, कपास, और कोसाके वस्त्र तथा चन्दन आदि कुप्य कहलाता है। क्षेत्र-वास्तु, हिरण्य-सुवर्ण, धन-धान्य, दासी-दास और कुप्य इनके विषयमें मेरा इतना ही परिग्रह है इससे अधिक नहीं ऐसा प्रमाण निश्चित करके लोभवश क्षेत्र-
३० वास्तु आदिके प्रमाणको बढ़ा लेना प्रमाणातिक्रम है। इस प्रकार ये परिग्रहपरिमाण अणुव्रतके पाँच अतिचार हैं।

---

(१)-च्छिन्नात्प्रमा-मु.।

उक्ता व्रतानामतिचारा. शीलानामतिचारा वक्ष्यन्ते । तद्यथा—

ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यन्तराधानानि ॥ ३० ॥

परिमितस्य दिगवधेरतिलङ्घनमतिक्रम. । स समासतस्त्रिविधः—ऊर्ध्वातिक्रमः अधोऽतिक्रमस्तिर्यगतिक्रमश्चेति । तत्र पर्वताद्यारोहणादूर्ध्वातिक्रमः । कूपावतरणादेरधोऽतिक्रम. । बिलप्रवेशादेस्तिर्यगतिक्रम. । परिगृहीताया दिशो लोभावेशादाधिक्याभिसन्धि. क्षेत्रवृद्धिः । स एषोऽतिक्रम. प्रमादान्मोहाद् व्यासङ्गाद्वा भवतीत्यवसेयः । अननुस्मरणं स्मृत्यन्तराधानम् । त एते दिग्विरमणस्यातिचाराः ।

आनयनप्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपाः ॥ ३१ ॥

आत्मना सङ्कल्पिते देशे स्थितस्य प्रयोजनवशाद्यत्किञ्चिदानयेत्याज्ञापनमानयनम् । एव कुर्विति नियोगः प्रेष्यप्रयोग । व्यापारकरान्पुरुषान्प्रत्यभ्युत्कासिकादिकरणं शब्दानुपात । स्वविग्रहदर्शनं रूपानुपात. । लोष्टादिनिपातः पुद्गलक्षेपः । त एते देशविरमणस्य पञ्चातिचारा. ।

कन्दर्पकौत्कुच्यमौखर्यासमीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि ॥ ३२ ॥

रागोद्रेकात्प्रहासमिश्रोऽशिष्टवाक्प्रयोगः कन्दर्पः । तदेवोभयं परत्र दुष्टकायकर्म-

---

व्रतोंके अतिचार कहे अब शीलोके अतिचार कहते हैं जो इस प्रकार है—

ऊर्ध्वव्यतिक्रम, अधोव्यतिक्रम, तिर्यग्व्यतिक्रम, क्षेत्रवृद्धि और स्मृत्यन्तराधान ये दिग्विरतिव्रतके पाँच अतिचार हैं ॥ ३० ॥

दिशाकी जो मर्यादा निश्चित की हो उसका उल्लंघन करना अतिक्रम है। वह संक्षेपसे तीन प्रकारका है—ऊर्ध्वातिक्रम, अधोतिक्रम और तिर्यगतिक्रम। इनमेंसे मर्यादाके बाहर पर्वतादिक पर चढनेसे ऊर्ध्वातिक्रम होता है, कुँआ आदिमे उतरने आदिसे अधोऽतिक्रम होता है और बिल आदिमें घुसनेसे तिर्यगतिक्रम होता है। लोभके कारण मर्यादा की हुई दिशाके बढानेका अभिप्राय रखना क्षेत्रवृद्धि है। यह व्यतिक्रम प्रमादसे, मोहसे या व्यासगसे होता है। मर्यादाका स्मरण न रखना स्मृत्यन्तराधान है। ये दिग्विरमण व्रतके पाँच अतिचार है।

आनयन, प्रेष्यप्रयोग, शब्दानुपात, रूपानुपात और पुद्गलक्षेप ये देशविरति व्रतके पाँच अतिचार हैं ॥ ३१ ॥

अपने द्वारा संकल्पित देशमे ठहरे हुए पुरुषको प्रयोजन वश किसी भी वस्तुको लानेकी आज्ञा करना आनयन है। ऐसा करो इस प्रकार काममें लगाना प्रेष्यप्रयोग है। जो पुरुष किसी उद्योगमें जुटे हैं उन्हे उद्देश्य कर खासना आदि शब्दानुपात है। उन्ही पुरुषोको अपने शरीरको दिखलाना रूपानुपात है। ढेला आदिका फेंकना पुद्गलक्षेप है। इस प्रकार देशविरमण व्रतके पाँच अतिचार है।

कन्दर्प, कौत्कुच्य, मौखर्य, असमीक्ष्याधिकरण और उपभोगपरिभोगानर्थक्य ये अनर्थदण्डविरति व्रतके पाँच अतिचार हैं ॥ ३२ ॥

रागभावकी तीव्रतावश हास्यमिश्रित असभ्य वचन बोलना कन्दर्प है। परिहास और असभ्यवचन

---

(१) अधोऽतिक्रम बिलप्र–मु. । (२) मोहाद्यासङ्गा–मु. । (३)–नयेदित्या–आ., दि. १, दि. २।

प्रयुक्तं कौत्कुच्यम् । धाष्टर्यप्रायं[1] यत्किञ्चनानर्थकं बहुप्रलापित्वं[2] मौखर्यम् । असमीक्ष्य प्रयोजनमाधिक्येन करणमसमीक्ष्याधिकरणम् । यावताऽर्थेनोपभोगपरिभोगौ सोऽर्थस्ततो ऽन्यस्याधिक्यमानर्थक्यम् । त एते पञ्चानर्थदण्डविरतेरतिचाराः ।

योगदुष्प्रणिधानानादरस्मृत्यनुपस्थानानि ॥ ३३ ॥

५ योगो व्याख्यातस्त्रिविधः । तस्य दुष्टं[3] प्रणिधानं योगदुष्प्रणिधानम्—कायदुष्प्रणिधानं वाग्दुष्प्रणिधानं मनोदुष्प्रणिधानमिति । अनादरोऽनुत्साहः । अनैकाग्र्यं स्मृत्यनुपस्थानम् । त एते पञ्च सामायिकस्यातिक्रमाः ।

अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानादरस्मृत्यनुपस्थानानि ॥ ३४ ॥

जन्तवः सन्ति न सन्ति वेति प्रत्यवेक्षणं चक्षुर्व्यापारः । मृदुनोपकरणेन यत्क्रियते प्रयो-
१० जनं तत्प्रमार्जितम् । तदुभयं प्रतिषेधविशिष्टमुत्सर्गादिभिस्त्रिभिरभिसम्बध्यते[4]—अप्रत्यवेक्षिताप्रमार्जितोत्सर्ग इत्येवमादि । तत्र अप्रत्यवेक्षिताप्रमार्जितायां[5] भूमौ मूत्रपुरीषोत्सर्गः अप्रत्यवेक्षिताप्रमार्जितोत्सर्गः । अप्रत्यवेक्षिताप्रमार्जितस्यार्हदाचार्यपूजोपकरणस्य गन्ध-

---

इन दोनोंके साथ दूसरेके लिये शारीरिक कुचेष्टाएं करना कौत्कुच्य है। धीठताको लिये हुए निःसार कुछ भी बहुत बकवास करना मौखर्य है। प्रयोजनका विचार किये बिना मर्यादाके बाहर अधिक काम
१५ करना असमीक्ष्याधिकरण है। उपभोग परिभोगके लिये जितनी वस्तुकी आवश्यकता है वह अर्थ है उससे अतिरिक्त अधिक वस्तु रखना उपभोगपरिभोगानर्थक्य है। इस प्रकार ये अनर्थदण्डविरति व्रतक पाँच अतिचार है।

काययोगदुष्प्रणिधान, वचनयोगदुष्प्रणिधान, मनोयोगदुष्प्रणिधान, अनादर और स्मृतिका अनुपस्थान ये सामायिक व्रतके पाँच अतिचार हैं ॥ ३३ ॥

२० तीन प्रकारके योगका व्याख्यान किया जा चुका है। उसका बुरी तरहसे चलते रहना योगदुष्प्रणिधान है जो तीन प्रकारका है—कायदुष्प्रणिधान, वचनदुष्प्रणिधान और मनोदुष्प्रणिधान। उत्साहका न होना अनुत्साह है और वही अनादर है। तथा एकाग्रताका न होना स्मृत्यनुपस्थान है। इस प्रकार ये सामायिक व्रतके पाँच अतिचार हैं।

अप्रत्यवेक्षित अप्रमार्जित भूमिमें उत्सर्ग, अप्रत्यवेक्षित अप्रमार्जित वस्तुका आदान,
२५ **अप्रत्यवेक्षित अप्रमार्जित संस्तरका उपक्रमण, अनादर और स्मृतिका अनुपस्थान ये प्रोषधोपवास व्रतके पाँच अतिचार हैं ॥ ३४ ॥**

जीव हैं या नहीं हैं इस प्रकार आँखसे देखना प्रत्यवेक्षण कहलाता है और कोमल उपकरणसे जो प्रयोजन साधा जाता है वह प्रमार्जित कहलाता है। निषेध युक्त इन दोनों पदोंका उत्सर्ग आदि अगले तीन पदोंसे सम्बन्ध होता है। यथा—अप्रत्यवेक्षिताप्रमार्जितोत्सर्ग आदि। बिना देखी और बिना प्रमा-
३० र्जित भूमिमें मल मूत्रका त्याग करना अप्रत्यवेक्षिताप्रमार्जितोत्सर्ग है। अरहंत और आचार्यकी पूजाके

---

(१)—प्रायं बहु—आ., दि. १, दि. २ । (२)—प्रलपितं मौ—मु. । (३) दुःप्र णि—मु. । (४)—दभिरभि—मु. । (५)—मार्जितभूमौ आ., दि. १, दि. २ ।

माल्यधूपादेरात्मपरिधानाद्यर्थस्य च वस्त्रादेरादानमप्रत्यवेक्षिताप्रमार्जितादानम्। अप्रत्यवेक्षिताप्रमार्जितस्य प्रावरणादेः संस्तरस्योपक्रमणं अप्रत्यवेक्षिताप्रमार्जितसस्तरोपक्रमणम्। क्षुदभ्यर्दितत्वादावश्यकेष्वनादरोऽनुत्साहः। स्मृत्यनुपस्थानं व्याख्यातम्। त एते पञ्च प्रोषधोपवासस्यातिचाराः।

सचित्तसम्बन्धसम्मिश्राभिषवदुष्पक्वाहाराः ॥ ३५ ॥　५

सह चित्तेन वर्तते इति सचित्तं चेतनावद् द्रव्यम्। तदुपश्लिष्टः सम्बन्धः। तद्व्यतिकीर्णः सम्मिश्रः। कथं पुनरस्य सचित्तादिषु प्रवृत्तिः[1]? प्रमादसम्मोहाभ्याम्। द्रवो वृष्यो वाभिषवः। असम्यक्पक्वो दुष्पक्वः। एतैराहारो विशेष्यते—सचित्ताहारः सम्बन्धाहारः सम्मिश्राहारोऽभिषवाहारो दुष्पक्वाहार इति। त एते पञ्च भोगोपभोगपरिसख्यानस्यातिचाराः।　१०

सचित्तनिक्षेपापिधानपरव्यपदेशमात्सर्यकालातिक्रमाः ॥ ३६ ॥

सचित्ते पद्मपत्रादौ निक्षेपः सचित्तनिक्षेपः। अपिधानमावरणम्। सचित्तेनैव सम्बध्यते

उपकरण, गन्ध, माला और धूप आदिको तथा अपने ओढ़ने आदिके वस्त्रादि पदार्थोंको बिना देखे और बिना परिमार्जन किये हुए ले लेना अप्रत्यवेक्षिताप्रमार्जितादान है। बिना देखे और बिना परिमार्जन किये हुए प्रावरण आदि सस्तरका बिछाना अप्रत्यवेक्षिताप्रमार्जितसंस्तरोपक्रमण है। भूखसे पीड़ित　१५ होनेके कारण आवश्यक कार्योंमें अनुत्साहित होना अनादर है। स्मृत्यनुपस्थानका व्याख्यान पहले किया ही है। इस प्रकार ये प्रोषधोपवास व्रतके पाँच अतिचार है।

सचित्ताहार, सम्बन्धाहार, सम्मिश्राहार, अभिषवाहार और दुःपक्वाहार ये उपभोगपरिभोगपरिमाण व्रतके पाँच अतिचार हैं ॥ ३५ ॥

जो चित्त सहित है वह सचित्त कहलाता है। सचित्त से चेतना सहित द्रव्य लिया जाता है। इससे　२० सम्बन्धको प्राप्त हुआ द्रव्य सम्बन्धाहार है। और इससे मिश्रित द्रव्य सम्मिश्र है।

शंका—यह गृहस्थ सचित्तादिकमें प्रवृत्ति किस कारणसे करता है?

समाधान—प्रमाद और सम्मोहके कारण।

द्रव, वृष्य और अभिषव इनका एक अर्थ है। जो ठीक तरहसे नहीं पका है वह दुःपक्व है। ये पाँचों शब्द आहारके विशेषण है या इनसे आहार पाँच प्रकारका हो जाता है। यथा—सचित्ताहार,　२५ सम्बन्धाहार, सम्मिश्राहार, अभिषवाहार और दुःपक्वाहार ये सब भोगोपभोग परिसख्यान व्रतके पाँच अतिचार है।

सचित्तनिक्षेप, सचित्तापिधान, परव्यपदेश, मात्सर्य और कालातिक्रम ये अतिथिसंविभाग व्रतके पाँच अतिचार हैं ॥ ३६ ॥

सचित्त कमलपत्र आदिमें रखना सचित्तनिक्षेप है। अपिधानका अर्थ ढाँकना है। इस शब्दको　३०

---

(१)–त्ति स्यात्? प्रमा–मु.।

सचित्तापिधानमिति । अन्यदातृदेयार्पणं परव्यपदेशः । प्रयच्छतोऽप्यादराभावोऽन्यदातृगुणासहनं वा मात्सर्यम् । अकाले भोजनं कालातिक्रमः । त एते पञ्चातिथिसंविभागशीलातिचाराः ।

जीवितमरणाशंसामित्रानुरागसुखानुबन्धनिदानानि ॥ ३७ ॥

५ आशंसनमाशंसा आकाङ्क्षणमित्यर्थः । जीवितं च मरणं च जीवितमरणम्, जीवितमरणस्याशंसे जीवितमरणाशंसे । पूर्वसुहृत्सहपांसुक्रीडनाद्यनुस्मरणं मित्रानुरागः । अनुभूतप्रीतिविशेषस्मृतिसमन्वाहारः सुखानुबन्धः । भोगाकाङ्क्षया नियतं दीयते चित्तं तस्मिंस्तेनेति वा निदानम् । त एते पञ्च सल्लेखनाया अतिचाराः ।

अत्राह, उक्तं भवता[1] तीर्थकरत्वकारणकर्मास्रवनिर्देशे 'शक्तितस्त्यागतपसी' इति, १० पुनश्चोक्तं शीलविधाने 'अतिथिसंविभाग' इति । तस्य दानस्य लक्षणमनिर्ज्ञातं तदुच्यतामित्यत आह—

अनुग्रहार्थं स्वस्यातिसर्गो दानम् ॥ ३८ ॥

स्वपरोपकारोऽनुग्रहः । स्वोपकारः पुण्यसंचयः, परोपकारः सम्यग्ज्ञानादिवृद्धिः ।

भी सचित्त शब्दसे जोड़ लेना चाहिये जिससे सचित्तापिधानका सचित्त कमलपत्र आदिसे ढांकना यह १५ अर्थ फलित होता है। इस दानकी वस्तुका दाता अन्य है यह कह कर देना परव्यपदेश है। दान करते हुए भी आदरका न होना या दूसरे दाताके गुणोंको न सह सकना मात्सर्य है। भिक्षाकालके सिवा दूसरा काल अकाल है और उसमें भोजन कराना कालातिक्रम है। ये सब अतिथिसंविभाग शीलव्रतके पांच अतिचार हैं।

जीविताशंसा, मरणाशंसा, मित्रानुराग, सुखानुबन्ध और निदान ये
२० सल्लेखनाके पाँच अतिचार हैं ॥ ३७ ॥

आशंसाका अर्थ चाहना है। जीनेकी चाह करना जीविताशंसा है और मरनेकी चाह करना मरणाशंसा है। पहले मित्रोंके साथ पांसुक्रीडन आदि नाना प्रकारकी क्रीडाएं की रहीं उनका स्मरण करना मित्रानुराग है। अनुभवमें आये हुए विविध सुखोंका पुनः-पुनः स्मरण करना सुखानुबन्ध है। भोगाकांक्षासे जिसमें या जिसके कारण चित्त नियमसे दिया जाता है वह निदान है। ये सब सल्लेखनाके पाँच २५ अतिचार हैं।

तीर्थंकर पदके कारणभूत आस्रवके कारणोंका कथन करते समय शक्तिपूर्वक त्याग और तप कहा; पुनः शीलोंका कथन करते समय अतिथिसंविभाग व्रत कहा परन्तु दानका लक्षण अभीतक ज्ञात नहीं हुआ इसलिये दानका स्वरूप बतलानेके लिये आगेका सूत्र कहते हैं—

अनुग्रहके लिये अपनी वस्तुका त्याग करना दान है ॥ ३८ ॥

३० स्वयं अपना और दूसरेका उपकार करना अनुग्रह है। दान देनेसे पुण्यका संचय होता है यह अपना

---

(१) भगवता मु., ता.।

'स्व'शब्दो धनपर्यायवचनः । अनुग्रहार्थं स्वस्यातिसर्गस्त्यागो दानं वेदितव्यम् ।

अत्राह–उक्तं दानं तत्किमविशिष्टफलमाहोस्विदस्ति कश्चित्प्रतिविशेष इत्यत आह–

विधिद्रव्यदातृपात्रविशेषात्तद्विशेषः ॥ ३९ ॥

प्रतिग्रहादिक्रमो विधिः । विशेषो गुणकृतः । तस्य प्रत्येकमभिसम्बन्धः क्रियते— ५ विधिविशेषो द्रव्यविशषो दातृविशेषः पात्रविशेष इति । तत्र विधिविशेषः प्रतिग्रहादिष्वादरानादरकृतो भेदः । तपःस्वाध्यायपरिवृद्धिहेतुत्वादिर्द्रव्यविशेषः । अनसूयाविषादादिर्दातृविशेषः । मोक्षकारणगुणसयोगः पात्रविशेषः । ततश्च पुण्यफलविशेषः क्षित्यादिविशेषाद् बीजफलविशेषवत् ।

इति तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसञ्ज्ञिकायां सप्तमोऽध्यायः समाप्तः । १०

उपकार है तथा जिन्हे दान दिया जाता है उनके सम्यग्ज्ञान आदिकी वृद्धि होती है यह परका उपकार है। सूत्रम आये हुए स्वशब्दका अर्थ धन है। तात्पर्य यह है कि अनुग्रहके लिये जो धनका अतिसर्ग अर्थात् त्याग किया जाता है वह दान है।

दानका स्वरूप कहा तब भी उसका फल एकसा होता है या उसमे कुछ विशेषता है, यह बतलानेके लिये अब आगेका सूत्र कहते हैं— १५

विधि, देय वस्तु, दाता और पात्रकी विशेषतासे उसकी विशेषता है ॥ ३९ ॥

प्रतिग्रह आदि करनेका जो क्रम है वह विधि है। विशेषता गुणसे आती है। इस विशेष शब्दको विधि आदि प्रत्येक शब्दके साथ जोड लेना चाहिये। यथा–विधिविशेष, द्रव्यविशेष, दाताविशेष और पात्र विशेष। प्रतिग्रह आदिकमे आदर और अनादर होनेसे जो भेद होता है वह विधिविशेष है। जिससे २० तप और स्वाध्याय आदिकी वृद्धि होती है वह द्रव्यविशेष है। अनसूया और विषाद आदिका न होना दाताकी विशेषता है। तथा मोक्षके कारणभूत गुणोसे युक्त रहना पात्रकी विशेषता है। जैसे पृथिवी आदिमे विशेषता होनेसे उससे उत्पन्न हुए बीजमे विशेषता आ जाती है वैसे ही विधि आदिककी विशेषता से दानसे प्राप्त होनेवाले पुण्य फलमें विशेषता आ जाती है।

इस प्रकार सर्वार्थसिद्धि नामक तत्त्वार्थवृत्तिमे सातवाँ अध्याय समाप्त हुआ।

---

(१) क्षेत्रादि–मु.।

अथाष्टमोऽध्यायः

व्याख्यात आस्रवपदार्थः। तदनन्तरोद्देशभाग्बन्धपदार्थ इदानीं व्याख्येयः। तस्मिन्व्याख्येये सति पूर्वं बन्धहेतूपन्यासः क्रियते; तत्पूर्वकत्वाद् बन्धस्येति—

मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः ॥ १ ॥

५ मिथ्यादर्शनादय उक्ताः। क्व? मिथ्यादर्शनं तावदुक्तम्, 'तत्त्वार्थश्रद्धानं[1] सम्यग्दर्शनम्' इत्यत्र तत्प्रतिपक्षभूतम्, आस्रवविधाने च क्रियासु व्याख्यातं मिथ्यादर्शनक्रियेति। विरतिरुक्ता। तत्प्रतिपक्षभूता अविरतिर्ग्राह्या। आज्ञाव्यापादनक्रिया अनाकाङ्क्षाक्रियेत्यनयोः प्रमादस्यान्तर्भावः। स च प्रमादः कुशलेष्वनादरः। कषायाः क्रोधादयः अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पाः प्रोक्ताः। क्व? 'इन्द्रियकषाया-'इत्यत्रैव।
१० योगाः कायादिविकल्पाः प्रोक्ताः। क्व? 'कायवाङ्मनःकर्म योगः' इत्यत्र।

आठवाँ अध्याय

आस्रव पदार्थका व्याख्यान किया अब उसके बाद कहे गये बन्ध पदार्थका व्याख्यान करना चाहिये। उसका व्याख्यान करते हुए पहले बन्धके कारणोंका निर्देश करते हैं, क्योंकि बन्ध तत्पूर्वक होता है—

मिथ्यादर्शन, अविरति, प्रमाद, कषाय और योग ये बन्धके हेतु हैं ॥ १ ॥

१५ मिथ्यादर्शन आदिका व्याख्यान पहले किया जा चुका है।

शंका—इनका व्याख्यान पहले कहाँ किया है?

'तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्' इस सूत्रमें सम्यग्दर्शनका व्याख्यान किया है। मिथ्यादर्शन उसका उलटा है, अतः इससे उसका भी व्याख्यान हो जाता है। या आस्रवका कथन करते समय पच्चीस क्रियाओंमें मिथ्यादर्शनका व्याख्यान किया है। विरतिका व्याख्यान पहले कर आये हैं। उसकी उलटी
२० अविरति लेनी चाहिये। प्रमादका अन्तर्भाव आज्ञाव्यापादनक्रिया और अनाकांक्षाक्रिया इन दोनोंमें हो जाता है। अच्छे कार्योंके करनेमें आदरभावका न होना यह प्रमाद है।

कषाय क्रोधादिक हैं जो अनन्तानुबन्धी, अप्रत्याख्यान, प्रत्याख्यान और संज्वलनके भेदसे अनेक प्रकारके हैं। इनका भी पहले कथन कर आये हैं।

शंका—कहां पर?

२५ समाधान—'इन्द्रियकषाया' इत्यादि सूत्रका व्याख्यान करते समय।

तथा कायादिके भेदसे तीन प्रकारके योगका व्याख्यान भी पहले कर आये हैं।

शंका—कहाँ पर?

समाधान—'कायवाङ्मनःकर्म योगः' इस सूत्रमें।

---

(१) श्रद्धानं इत्यत्र आ., दि. १, दि. २।

मिथ्यादर्शनं द्विविधम्, नैसर्गिकं परोपदेशपूर्वकं च। तत्र परोपदेशमन्तरेण मिथ्यात्वकर्मोदयवशाद् यदाविर्भवति तत्त्वार्थाश्रद्धानलक्षणं तन्नैसर्गिकम्। परोपदेशनिमित्तं चतुर्विधम्; क्रियाक्रियावाद्यज्ञानिक[1]वैनयिकविकल्पात्। अथवा पञ्चविधं मिथ्यादर्शनम्—एकान्तमिथ्यादर्शनं विपरीतमिथ्यादर्शनं संशयमिथ्यादर्शनं वैनयिकमिथ्यादर्शनं अज्ञानिकमिथ्यादर्शनं चेति। तत्र इदमेव इत्थमेवेति धर्मिधर्मयोरभिनिवेश एकान्तः। "पुरुष एवेदं सर्वम्"[3] इति वा नित्य एव वा अनित्य एवेति। सग्रन्थो निर्ग्रन्थः, केवली कवलाहारी, स्त्री सिध्यतीत्येवमादिः विपर्ययः। सम्यग्दर्शनज्ञानचारित्राणि किं मोक्षमार्गः स्याद्वा न वेत्यन्यतरपक्षापरिग्रहः संशयः। सर्वदेवतानां सर्वसमयानां च समदर्शनं वैनयिकम्। हिताहितपरीक्षाविरहोऽज्ञानिकत्वम्। उक्तञ्च—

"असिदिसदं[4] किरियाणं अक्किरियाणं[5] तह य होइ चुलसीदी।
सत्तट्ठिमण्णाणीणं[6] वेणइयाणं तु बत्तीसं॥"

अविरतिर्द्वादशविधा, षट्कायषट्करणविषयभेदात्। षोडश कषाया नव नोकषायाः[7]-

मिथ्यादर्शन दो प्रकारका है—नैसर्गिक और परोपदेशपूर्वक। इनमेसे जो परोपदेशके बिना मिथ्यादर्शन कर्मके उदयसे जीवादि पदार्थोंका अश्रद्धानरूप भाव होता है वह नैसर्गिक मिथ्यादर्शन है। तथा परोपदेशके निमित्तसे होनेवाला मिथ्यादर्शन चार प्रकारका है—क्रियावादी, अक्रियावादी, अज्ञानी और वैनयिक। अथवा मिथ्यादर्शन पाँच प्रकारका है—एकान्त मिथ्यादर्शन, विपरीतमिथ्यादर्शन, संशयमिथ्यादर्शन, वैनयिक मिथ्यादर्शन और अज्ञानिक मिथ्यादर्शन।

यही है, इसी प्रकारका है इस प्रकार धर्म और धर्मीमे एकान्तरूप अभिप्राय रखना एकान्त मिथ्यादर्शन है। जैसे यह सब जग परब्रह्म रूप ही है, या सब पदार्थ अनित्य ही है या नित्य ही है। सग्रन्थको निर्ग्रन्थ मानना, केवलीको कवलाहारी मानना और स्त्री सिद्ध होती है इत्यादि मानना विपर्यय मिथ्यादर्शन है। सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र ये तीनो मिल कर क्या मोक्षमार्ग है या नही इस प्रकार किसी एक पक्षको स्वीकार नही करना संशय मिथ्यादर्शन है। सब देवता और सब मतोको एक समान मानना वैनयिक मिथ्यादर्शन है। हिताहितकी परीक्षासे रहित होना अज्ञानिक मिथ्यादर्शन है। कहा भी है—

"क्रियावादियोके एकसौ अस्सी, अक्रियावादियोके चौरासी, अज्ञानियोके सरसठ और वैनयिकोके बत्तीस भेद है।

छहकायके जीवोंकी दया न करनेसे और छह इन्द्रियोके विषयभेदसे अविरति बारह प्रकारकी होती है। सोलह कषाय और नौ नोकषाय ये पच्चीस कषाय है। यद्यपि कषायोसे

(१)-ज्ञानिवै-मु.। (२) अज्ञानमिथ्या-मु.। (३) इति वा नित्यमेवेति मु., दि. १, दि. २, आ.। (४) गो. कर्म., गा. ८७६। (५)-याण च होइ मु.। (६) सत्तच्छण्णा-मु। (७)-षाया ईषद्भे-दि.दि. २, आ.।

स्तेषामीषद्भेदो न भेद इति पञ्चविंशतिः कषायाः। चत्वारो मनोयोगाश्चत्वारो वाग्योगाः पञ्च काययोगा इति त्रयोदशविकल्पो योगः। आहारककाययोगाहारकमिश्रकाययोगयोः प्रमत्तसंयते सम्भवात्पञ्चदशापि[1] भवन्ति। प्रमादोऽनेकविधः[2]; शुद्धयष्टकोत्तमक्षमादिविषयभेदात्[3]। त एते पञ्च बन्धहेतवः समस्ता व्यस्ताश्च भवन्ति। तद्यथा—मिथ्यादृष्टेः पञ्चापि समुदिता बन्धहेतवो भवन्ति। सासादनसम्यग्दृष्टिसम्यङ्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टीनामविरत्यादयश्चत्वारः। संयतासंयतस्याविरतिर्विरतिमिश्रा प्रमादकषाययोगाश्च। प्रमत्तसंयतस्य प्रमादकषाययोगाः। अप्रमत्तादीनां चतुर्णां योगकषायौ। उपशान्तकषायक्षीणकषायसयोगकेवलिनामेक एव योगः। अयोगकेवलिनो न बन्धहेतुः।

उक्ता बन्धहेतवः। इदानीं बन्धो वक्तव्य इत्यत आह—

सकषायत्वाज्जीवः कर्मणो योग्यान्पुद्गलानादत्ते स बन्धः ॥ २ ॥

सह कषायेण वर्तत इति सकषायः। सकषायस्य भावः सकषायत्वम्। तस्मात्सकषायत्वादिति। पुनर्हेतुनिर्देशः[4] जठराग्न्याशयानुरूपाहारग्रहणवत्तीव्रमन्दमध्यमकषायाशयानुरू-

नोकषायोंमें थोड़ा भेद है पर वह यहां विवक्षित नहीं है, इसलिये सबको कषाय कहा है। चार मनोयोग, चार वचनयोग और पांच काययोग ये योगके तेरह भेद हैं। प्रमत्तसंयत गुणस्थानमें आहारक ऋद्धिधारी मुनिके आहारककाययोग और आहारक मिश्रकाययोग भी सम्भव हैं इस प्रकार योग पन्द्रह भी होते हैं। शुद्धयष्टक और उत्तम क्षमा आदि विषयक भेदसे प्रमाद अनेक प्रकारका है। इस प्रकार ये मिथ्यादर्शन आदि पांचों मिलकर या पृथक् पृथक् बन्धके हेतु हैं। खुलासा इस प्रकार है—

मिथ्यादृष्टि जीवके पांचों ही मिल कर बन्धके हेतु हैं। सासादनसम्यग्दृष्टि, सम्यग्मिथ्यादृष्टि और अविरतसम्यग्दृष्टिके अविरति आदि चार बन्धके हेतु हैं। संयतासंयतके विरति और अविरति ये दोनों मिश्ररूप तथा प्रमाद, कषाय और योग ये बन्धके हेतु हैं। प्रमत्तसंयतके प्रमाद, कषाय और योग ये तीन बन्धके हेतु हैं। अप्रमत्तसंयत आदि चारके योग और कषाय ये दो बन्धके हेतु हैं। उपशान्तकषाय, क्षीणकषाय और सयोगकेवली इनके एक योग ही बन्धका हेतु है। अयोगकेवलीके बन्धका हेतु नहीं है।

बन्धके हेतु कहे। अब बन्धका कथन करना चाहिये इसलिये आगेका सूत्र कहते हैं—

कषाय सहित होनेसे जीव कर्मके योग्य पुद्गलोंको ग्रहण करता है वह बन्ध है ॥२॥

कषायके साथ रहता है इसलिये सकषाय कहलाता है और सकषायका भाव सकषायत्व है। इससे अर्थात् सकषाय होनेसे। यह हेतुनिर्देश है। जिस प्रकार जठराग्निके आशयके अनुरूप आहारका ग्रहण

(१)–दश भवन्ति आ., दि. १, दि. २। (२)–नेकविधःपञ्चसमितित्रिगुप्तिशुद्धय–मु., आ., दि. १, दि. २। (३)–भेदात्। शुद्धयष्टकस्यार्थः भावकायविनयेर्यापथभिक्षाप्रतिष्ठापनशयनासनवाक्यशुद्धयोऽष्टौ दशलक्षणो धर्मश्च। त एते मु., आ., दि. १, दि. २। (४)–निर्देशः किमर्थम्? जठ–मु., दि. १।

पस्थित्यनुभवविशेषप्रतिपत्त्यर्थम्[1]। अमूर्तिरहस्त आत्मा कथं कर्मादत्त इति चोदितः सन् 'जीवः'इत्याह। जीवनाज्जीवः प्राणधारणादायुःसम्बन्धान्नायुर्विरहादिति। 'कर्मयोग्यान्' इति लघुनिर्देशात्सिद्धे 'कर्मणो योग्यान्'इति पृथग्विभक्त्युच्चारणं वाक्यान्तरज्ञापनार्थम्। किं पुनस्तद्वाक्यान्तरम्? कर्मणो जीवः सकषायो भवतीत्येकं वाक्यम्। एतदुक्तं भवति— 'कर्मणः'इति हेतुनिर्देशः कर्मणो हेतोर्जीवः सकषायो भवति नाकर्मकस्य कषायलेपोऽस्ति। ५ ततो जीवकर्मणोरनादिसम्बन्ध इत्युक्तं भवति। तेनामूर्तो जीवो मूर्तेन कर्मणा कथं बध्यते इति चोद्यमपाकृतं भवति। इतरथा हि बन्धस्यादिमत्त्वे आत्यन्तिकीं शुद्धिं दधतः सिद्धस्येव बन्धाभावः प्रसज्येत। द्वितीयं वाक्यं 'कर्मणो योग्यान् पुद्गलानादत्ते'इति। अर्थवशाद्विभक्तिपरिणाम इति [2]पूर्वहेतुसम्बन्धं त्यक्त्वा षष्ठीसम्बन्धमुपैति 'कर्मणो योग्यान्'इति। 'पुद्गल'वचनं कर्मणस्तादात्म्यख्यापनार्थम्[3]। तेनात्मगुणोऽदृष्टो निराकृतो भवति; तस्य १० संसारहेतुत्वानुपपत्तेः। 'आदत्ते'इति हेतुहेतुमद्भावख्यापनार्थम्। अतो मिथ्यादर्शनाद्या-

होता है उसी प्रकार तीव्र, मन्द और मध्यम कषायाशयके अनुरूप ही स्थिति और अनुभाग होता है। इस प्रकार इस विशेषताका ज्ञान करानेके लिये सूत्रमे 'सकषायत्वात्' इस पदद्वारा पुनः हेतुका निर्देश किया है। अमूर्ति और बिना हाथवाला आत्मा कर्मोंको कैसे ग्रहण करता है इस प्रश्नका उत्तर देनेके अभिप्रायसे सूत्रमे 'जीव' पद कहा है। जीव शब्दका व्युत्पत्तिलभ्य अर्थ है—जीवनाज्जीवः—जो जीता है १५ अर्थात् जो प्राणोको धारण करता है, जिसके आयुका सद्भाव है, आयुका अभाव नही है वह जीव है। सूत्रमें 'कर्मयोग्यान्' इस प्रकार लघु निर्देश करनेसे काम चल जाता फिर भी 'कर्मणो योग्यान्' इस प्रकार पृथक् विभक्तिका उच्चारण वाक्यान्तरका ज्ञान करानेके लिये किया है।

वह वाक्यान्तर क्या है? 'कर्मणो जीव सकषायो भवति' यह एक वाक्य है। इसका यह अभिप्राय है कि 'कर्मणः' यह हेतुपरक निर्देश है। जिसका अर्थ है कि कर्मके कारण जीव कषायसहित २० होता है। कर्मरहित जीवके कषायका लेप नही होता। इससे जीव और कर्मका अनादि सम्बन्ध है यह कथन निष्पन्न होता है। और इससे अमूर्त जीव मूर्त कर्मके साथ कैसे बंधता है इस प्रश्नका निराकरण हो जाता है। अन्यथा बन्धको सादि मानने पर आत्यन्तिक शुद्धिको धारण करनेवाले सिद्ध जीवके समान संसारी जीवके बन्धका अभाव प्राप्त होता है।

'कर्मणो योग्यान् पुद्गलानादत्ते' यह दूसरा वाक्य है, क्योकि, अर्थके अनुसार विभक्ति बदल जाती २५ है इसलिये पहले जो हेत्वर्थमे विभक्ति थी वह अब 'कर्मणो योग्यान्' इस प्रकार षष्ठी अर्थको प्राप्त होती है।

सूत्रमें 'पुद्गल' पद कर्मके साथ तादात्म्य दिखलाने के लिये दिया है। इससे अदृष्ट आत्माका गुण है इस बातका निराकरण हो जाता है, क्योकि उसे आत्माका गुण मानने पर वह संसारका कारण नही बन सकता। सूत्रमे 'आदत्ते' पद हेतुहेतुमद्भावका ख्यापन करनेके लिये दिया है। इससे मिथ्यादर्शन ३०

(१)–त्यर्थः। अहस्त आत्मा ता., ना.। (२) पूर्वं हेतु–मु.। (३)–नार्थम्। अत आत्म–आ.।

वेशादार्द्रीकृतस्यात्मनः सर्वतो योगविशेषात्तेषां सूक्ष्मैकक्षेत्रावगाहिनामनन्तानन्तप्रदेशानां पुद्गलानां कर्मभावयोग्यानामविभागेनोपश्लेषो बन्ध इत्याख्यायते। यथा भाजनविशेषे[1] प्रक्षिप्तानां विविधरसबीजपुष्पफलानां मदिराभावेन परिणामस्तथा पुद्गलानामप्यात्मनि स्थितानां योगकषायवशात्कर्मभावेन परिणामो वेदितव्यः। 'सः' वचनमन्यनिवृत्त्यर्थम्।
५ स एष बन्धो नान्योऽस्तीति। तेन गुणगुणिबन्धो निवर्तितो भवति। कर्मादिसाधनो 'बन्ध'-शब्दो व्याख्येयः।

आह किमयं बन्ध एकरूप एव, आहोस्वित्प्रकारा अप्यस्य सन्तीत्यत इदमुच्यते—

प्रकृतिस्थित्यनुभवप्रदेशास्तद्विधयः ॥ ३ ॥

प्रकृतिः स्वभावः। निम्बस्य का प्रकृतिः? तिक्तता। गुडस्य का प्रकृतिः? मधुरता।
१० तथा ज्ञानावरणस्य का प्रकृतिः? अर्थानवगमः। दर्शनावरणस्य का प्रकृति:? अर्थानालो-

---

आदिके अभिनिवेशवश गीले किये गये आत्माके सब अवस्थाओंमें योग विशेषसे उन सूक्ष्म, एक क्षेत्राव-गाही अनन्तानन्त कर्मभावको प्राप्त होने योग्य पुद्गलोंका उपश्लेष होना बन्ध है यह कहा गया है। जिस प्रकार पात्रविशेषमें प्रक्षिप्त हुए विविध रसवाले बीज, फल और फलोंका मदिरारूपसे परिणमन होता है उसी प्रकार आत्मामें स्थित हुए पुद्गलोंका भी योग और कषायके निमित्तसे कर्मरूपसे परिणमन
१५ जानना चाहिये। सूत्रमें 'सः' पद अन्यका निराकरण करनेके लिये दिया है कि यह ही बन्ध है अन्य नहीं। इससे गुणगुणीबन्धका निराकरण हो जाता है। यहां 'बन्ध' शब्दका कर्मादि साधनमें व्याख्यान कर लेना चाहिये।

विशेषार्थ—इस सूत्रमें मुख्यरूपसे बन्धकी व्याख्या की गई है। जीव द्रव्यका स्वतन्त्र अस्तित्व होते हुए भी अनादि कालसे वह कर्मोंके आधीन हो रहा है जिससे उसे नर नारक आदि नाना गतियोंमें
२० परिभ्रमण करना पड़ता है। प्रश्न यह है कि जीव कर्मोंके आधीन क्यों होता है और उन कर्मोंका स्वरूप क्या है? प्रकृत सूत्रमें इन दोनों प्रश्नोंका समर्पक उत्तर दिया गया है। सूत्रमें बतलाया गया है कि कर्मोंके कारण जीव कषायाविष्ट होता है और इससे उसके कर्मके योग्य पुद्गलोंका उपश्लेष होता है। यही बन्ध है। इससे दो बातें फलित होती हैं। प्रथम तो यह कि कर्मके निमित्तसे जीवमें अशुद्धता आती है और इस अशुद्धताके कारण कर्मका बन्ध होता है और दूसरी यह कि जीव और कर्मका यह बन्ध परम्परा
२५ से अनादि है। इस प्रकार बन्ध क्या है और वह किस कारणसे होता है यह बात इस सूत्रसे जानी जाती है।

यह बन्ध क्या एक है या इसके भेद हैं यह बतलानेक लिये आगेका सूत्र कहते हैं—

उसके प्रकृति, स्थिति, अनुभव और प्रदेश ये चार भेद हैं ॥ ३ ॥

प्रकृतिका अर्थ स्वभाव है। जिस प्रकार नीमकी क्या प्रकृति है? कड़ुआपन। गुड़की क्या प्रकृति है? मीठापन। उसी प्रकार ज्ञानावरण कर्मकी क्या प्रकृति है? अर्थका ज्ञान न होना। दर्शनावरण

---

(१)–शेषे क्षिप्ता–मु.।

कनम् । वेद्यस्य सदसल्लक्षणस्य सुखदुःखसंवेदनम् । दर्शनमोहस्य तत्त्वार्थाश्रद्धानम् । चारित्रमोहस्यासयम. । आयुषो भवधारणम् । नाम्नो नारकादिनामकरणम् । गोत्रस्योच्चैर्नीचैःस्थानसशब्दनम् । अन्तरायस्य दानादिविघ्नकरणम् । तदेवलक्षण कार्यं प्रक्रियते प्रभवत्यस्या इति प्रकृति । तत्स्वभावादप्रच्युति. स्थिति. । यथा—अजागोमहिष्यादिक्षीराणां माधुर्यस्वभावादप्रच्युति. स्थिति । तथा ज्ञानावरणादीनामर्थावगमादिस्वभावादप्रच्युतिः स्थिति । तद्रसविशेषोऽनुभव । यथा—अजागोमहिष्यादिक्षीराणां तीव्रमन्दादिभावेन रसविशेष । तथा कर्मदुपुद्गलानां स्वगतसामर्थ्यविशेषोऽनुभव । इयत्तावधारणं प्रदेश । कर्मभावपरिणतपुद्गलस्कन्धाना परमाणुपरिच्छेदेनावधारणं प्रदेश. । 'विधि'-शब्द प्रकारवचनः । त एते प्रकृत्यादयश्चत्वारस्तस्य बन्धस्य प्रकारा. । तत्र योगनिमित्तौ प्रकृतिप्रदेशौ । कषायनिमित्तौ स्थित्यनुभवौ । तत्प्रकर्षाप्रकर्षभेदात्तद्बन्धविचित्रभावः। तथा चोक्तम्—

"जोगा[1] पयडि-पएसा ठिदिअणुभागा कसायदो कुणदि ।
अपरिणदुच्छिण्णेसु य बंधट्ठिदिकारणं णत्थि ॥"

कर्मकी क्या प्रकृति है ? अर्थका आलोकन नही होना । सुख-दुखका संवेदन कराना साता और असाता वेदनीयकी प्रकृति है । तत्त्वार्थका श्रद्धान न होने देना दर्शनमोहकी प्रकृति है । असयमभाव चारित्रमोहकी प्रकृति है । भवधारण आयु कर्मकी प्रकृति है । नारक आदि नामकरण नामकर्मकी प्रकृति है । उच्च और नीच स्थानका संशब्दन गोत्र कर्मकी प्रकृति है तथा दानादिमे विघ्न करना अन्तराय कर्मकी प्रकृति है । इस प्रकारका कार्य किया जाता है अर्थात् जिससे होता है वह प्रकृति है । जिसका जो स्वभाव है उससे च्युत न होना स्थिति है । जिस प्रकार बकरी, गाय और भैंस आदिके दूधका माधुर्यस्वभावसे च्युत न होना स्थिति है । उसी प्रकार ज्ञानावरण आदि कर्मोका अर्थका ज्ञान न होने देना आदि स्वभावसे च्युत न होना स्थिति है । इन कर्मोके रसविशेषका नाम अनुभव है । जिस प्रकार बकरी, गाय और भैंस आदिके दूधका अलग-अलग तीव्र मन्द आदि रसविशेष होता है । उसी प्रकार कर्म पुद्गलोका अलग अलग स्वगत सामर्थ्यविशेष अनुभव है । तथा इयत्ताका अवधारण करना प्रदेश है । अर्थात् कर्मरूपसे परिणत पुद्गलस्कन्धोका परमाणुओंकी जानकारी करके निश्चय करना प्रदेशबन्ध है । 'विधि' शब्द प्रकारवाची है । ये प्रकृति आदिक चार उस बन्धके प्रकार है । इनमेसे योगके निमित्तसे प्रकृतिबन्ध और प्रदेशबन्ध होता है तथा कषायके निमित्तसे स्थितिबन्ध और अनुभवबन्ध होता है । योग और कषायमे जैसा प्रकर्षाप्रकर्षभेद होता है उसके अनुसार बन्ध भी नाना प्रकारका होता है । कहा भी है—

'यह जीव योगसे प्रकृति और प्रदेश बन्धको तथा कषायसे स्थिति और अनुभाग बन्धको करता है । किन्तु जो जीव योग और कषायरूपसे परिणत नही है और जिनके योग और कषायका उच्छेद हो गया है उनके कर्मबन्धकी स्थितिका कारण नही पाया जाता ॥'

विशेषार्थ—इस सूत्रमे बन्धके चार भेदोंका निर्देश किया है । साम्परायिक आस्रवसे जो भी कर्म

(१) मूला. २४४ । पंचसं० ४, ५०७ । गो. क., गा. २५७ ।

तत्राद्यस्य प्रकृतिबन्धस्य भेदप्रदर्शनार्थमाह—

आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाः ॥ ४ ॥

आद्यः प्रकृतिबन्धो ज्ञानावरणाद्यष्टविकल्पो वेदितव्यः । आवृणोत्याव्रियतेऽनेनेति वा आवरणम् । तत्प्रत्येकमभिसम्बध्यते—ज्ञानावरणं दर्शनावरणमिति । वेदयति वेद्यत इति वा वेदनीयम् । मोहयति [1]मोह्यतेऽनेनेति वा मोहनीयम् । एत्यनेन नारकादिभव-

२० जो भिक्षु निर्दोष आहारका शोध करता है, जो भिक्षाके नहीं मिलने पर या अल्पमात्रामें मिलने पर क्षुधावेदनाको नहीं प्राप्त होता, अकालमें या अदेशमें जिसे भिक्षा लेनेकी इच्छा नही होती, आवश्यकोंकी हानिको जो थोड़ा भी सहन नहीं करता, जो स्वाध्याय और ध्यानभावनामें तत्पर रहता है, जिसने बहुत बार स्वकृत और परकृत अनशन व अवमौदर्य तप किया है, जो नीरस आहारको लेता है, अत्यन्त गरम भांडमें गिरी हुई जलकी कतिपय बूँदोंके समान जिसका जलपान सूख गया है और क्षुधा-
२५ वेदनाकी उदीरणा होनेपर भी जो भिक्षालाभकी अपेक्षा उसके अलाभको अधिक गुणकारी मानता है उसका क्षुधाजन्य बाधाका चिन्तन नहीं करना क्षुधापरीषहजय है ।

जिसने जलसे स्नान करने, उसमें अवगाहन करने और उससे सिञ्चन करनेका त्याग कर दिया है, जिसका पक्षीके समान आसन और आवास नियत नहीं है, जो अतिखारे, अतिस्निग्ध और अतिरूक्ष प्रकृति विरुद्ध आहार, ग्रीष्मकालीन आतप, पित्तज्वर और अनशन आदिके कारण उत्पन्न हुई तथा

---

(१)—रस्य तप्त—मु. ।

प्रत्यनाद्रियमाणप्रतीकारस्य पिपासानलशिखां धृतिनवमृद्घटपूरितशीतलसुगन्धिसमाधिवारिणा प्रशमयत पिपासासहनं प्रशस्यते ।

परित्यक्तप्रच्छादनस्य पक्षिवदनवधारितालयस्य वृक्षमूलपथिशिलातलादिषु हिमानीपतनशीतला[1]निलसम्पाते तत्प्रतिकारप्राप्तिं प्रति निवृत्तेच्छस्य पूर्वानुभूतशीतप्रतिकारहेतुवस्तूनामस्मरतो ज्ञानभावनागर्भागारे वसतः शीतवेदनासहनं परिकीर्त्यते । ५

निवाते निर्जले ग्रीष्मरविकिरणपरिशुष्कपतितपर्णव्यपेतच्छायातरुण्यटव्यन्तरे यदृच्छयोपनिपतितस्यानशनाद्यभ्यन्तरसाधनोत्पादितदाहस्य दवाग्निदाहपरुषवातातपजनितगलतालुशोषस्य तत्प्रतीकारहेतून् बहूननुभूतानचिन्तयतः प्राणिपीडापरिहारावहितचेतसश्चारित्ररक्षणमुष्णसहनमित्युपवर्ण्यते ।

'दंशमशक'[2] ग्रहणमुपलक्षणम् । यथा **"काकेभ्यो रक्ष्यतां सर्पिः"** इति उपघातकोप[3]लक्षणं काकग्रहणं, तेन दंशमशकमक्षिकापिशुकपुत्तिकामत्कुणकीटपिपीलिकावृश्चिकादयो १०

शरीर और इन्द्रियोका मन्थन करनेवाली पिपासाका प्रतीकार करनेमे आदरभाव नही रखता और जो पिपासारूपी अग्निशिखाको सन्तोषरूपी नूतन मिट्टीके घडेमें भरे हुए शीतल सुगन्धि समाधिरूपी जलस शान्त कर रहा है उसके पिपासाजय प्रशसाके योग्य है।

जिसने आवरणका त्याग कर दिया है, पक्षीके समान जिसका आवास निश्चित नही है, वृक्षमूल, चौपथ और शिलातल आदिपर निवास करते हुए वर्फके गिरने पर और शीतल हवाका झोंका आने पर उसका प्रतीकार करनेकी इच्छासे जो निवृत्त है, पहले अनुभव किये गये शीतके प्रतीकारके हेतुभूत वस्तुओंका जो स्मरण नही करता और जो ज्ञानभावनारूपी गर्भागारमें निवास करता है उसके शीतवेदनाजय प्रशंसाके योग्य है। १५

निर्वात और निर्जल तथा ग्रीष्मकालीन सूर्यकी किरणोसे सूख कर पत्तोके गिर जानेसे छायारहित वृक्षोंस युक्त ऐसे वनके मध्य जो अपनी इच्छानुसार प्राप्त हुआ है, अनशन आदि आभ्यन्तर साधनवश जिसे दाह उत्पन्न हुई है, दवाग्निजन्य दाह, अतिकठोर वायु और आतपके कारण जिसे गले और तालुमे शोष उत्पन्न हुआ है, जो उसके प्रतीकारके बहुतसे अनुभूत हेतुओको जानता हुआ भी उनका चिन्तवन नही करता है तथा जिसका प्राणियोंकी पीडाके परिहारमे चित्त लगा हुआ है उस साधुके चारित्रके रक्षणरूप उष्णपरीषहजय कही जाती है। २० २५

सूत्रमें 'दंशमशक' पदका ग्रहण उपलक्षण है। जैसे 'कौओंसे घीकी रक्षा करनी चाहिए' यहां 'काक' पदका ग्रहण उपघातक जितने जीव है उनका उपलक्षण है, इसलिए 'दशमशक' पदसे दशमशक, मक्खी, पिस्सू, छोटी मक्खी, खटमल, कीट, चोटी और बिच्छू आदिका ग्रहण होता है। जो इनके द्वारा की गई बाधाको बिना प्रतीकार किये सहन करता है, मन, वचन और कायसे उन्हे बाधा नही पहुँ-

---

(१)–शीतानिल–आ., दि.१, दि. २। (२)–ग्रहण दशमशकोपलक्षण । यथा आ., दि० १, दि० २, ता० । (३) उपघातोप–मु० ।

गृह्यन्ते । तत्कृतां बाधामप्रतीकारां सहमानस्य तेषां बाधां त्रिधाऽप्यकुर्वाणस्य निर्वाण-प्राप्तिमात्रसंकल्पप्रावरणस्य तद्वेदनासहनं दंशमशकपरिषहक्षमेत्युच्यते ।

जातरूपवन्निष्कलङ्कजातरूपधारणमशक्यप्रा[1]र्थनीयं याचनरक्षणहिंसनादिदोषविनिर्मुक्तं निष्परिग्रहत्वान्निर्वाणप्राप्तिं प्रत्येकं साधनमनन्यबाधनं नाग्न्यं बिभ्रतो मनोविक्रियाविप्लुतिविरहात् स्त्रीरूपाण्यत्यन्ताशुचिकुणपरूपेण भावयतो रात्रिन्दिवं ब्रह्मचर्यमखण्डमातिष्ठमानस्याचेलव्रतधारणमनवद्यमवगन्तव्यम् ।

संयतस्येन्द्रियेष्टविषयसम्बधं प्रति निरुत्सुकस्य गीतनृत्यवादित्रादिविरहितेषु शून्यागारदेवकुलतरुकोटरशिलागुहादिषु स्वाध्यायध्यानभावनारतिमास्कन्दतो दृष्टश्रुतान्[2]-भूतरतिस्मरणतत्कथाश्रवणकामशरप्रवेशनिर्विवरहृदयस्य प्राणिषु सदा सदयस्यारतिपरिषहजयोऽवसेयः ।

एकान्तेष्वारामभवनादिप्रदेशेषु नवयौवनमदविभ्रममदिरापानप्रमत्तासु प्रमदासु बाधमानासु कूर्मवत्संवृ[3]तेन्द्रियहृदयविकारस्य ललितस्मितमृदुकथितसविलासवीक्षणप्रहसनमदमन्थर[4]गमनमन्मथशरव्यापारविफलीकरणस्य[5] स्त्रीबाधापरिषहसहनमवगन्तव्यम् ।

जाता है और निर्वाणकी प्राप्तिमात्र संकल्प ही जिसका ओढ़ना है उसके उनकी वेदनाको सह लेना दंशमशक परीषहजय कहा जाता है।

बालकके स्वरूपके समान जो निष्कलंक जातरूपको धारण करने रूप है, जिसका याचना करनेसे प्राप्त होना अशक्य है, जो याचना, रक्षा करना और हिंसा आदि दोषोंसे रहित है, जो निष्परिग्रहरूप होनेसे निर्वाण प्राप्तिका अनन्य साधन है और जो अन्य बाधाकर नहीं है ऐसे नाग्न्यको जो धारण करता है, जो मनके विक्रियारूप उपद्रवसे रहित होनेके कारण स्त्रियोंके रूपको अत्यन्त अपवित्र बदबूदार अनुभव करता है और जो दिन रात अखण्ड ब्रह्मचर्यको धारण करता है उसके निर्दोष अचेलव्रत धारण जानना चाहिए।

जो संयत इन्द्रियोंके इष्ट विषय सम्बन्धके प्रति निरुत्सुक है, जो गीत, नृत्य और वादित्र आदिसे रहित शून्यघर, देवकुल, तरुकोटर और शिलागुफा आदिमें स्वाध्याय, ध्यान और भावनामें लीन है, पहले देखे हुए, सुने हुए और अनुभव किये हुए विषय भोगके स्मरण, विषयभोग सम्बन्धी कथाके श्रवण और कामशर प्रवेश के लिए जिसका हृदय निश्छिद्र है और जो प्राणियोंके ऊपर सदाकाल सदय है उसके अरतिपरीषहजय जानना चाहिए।

एकान्त ऐसे बगीचा और भवन आदि स्थानों पर नवयौवन, मदविभ्रम और मदिरापानसे प्रमत्त हुई स्त्रियोंके द्वारा बाधा पहुँचाने पर कछुएके समान जिसने इन्द्रिय और हृदयके विकारको रोक लिया है तथा जिसने मन्द मुस्कान, कोमल सम्भाषण, तिरछी नजरोंसे देखना, हँसना, मदभरी धीमी चालसे चलना,

(१)–शक्यमप्रार्थ्यं–ता., ना., दि० २, आ० । (२) 'सुदपरिचिदाणुभूदा सव्वस्स वि कामभोगबंधकहा।' –समयप्रा. गा. ४। (३) संहृते–मु.। (४) पदमन्थर–मु० । (५)–करणचरणस्य आ., दि. १, दि. २ ।

दीर्घकालमुषितगुरुकुलब्रह्मचर्यस्याधिगतबन्धमोक्षपदार्थतत्त्वस्य संयमायतनभक्तिहेतोर्देशान्तरातिथेर्गुरुणाऽभ्यनुज्ञातस्य पवनवन्नि सङ्गतामङ्गीकुर्वतो बहुशोऽनशनावमौदर्यवृत्तिपरिसंख्यानरसपरित्यागादिबाधापरिक्लान्तकायस्य[1] देशकालप्रमाणापेतमध्वगमनं सयमविरोधि परिहरतो निराकृतपादावरणस्य परुषशर्कराकण्टकादिव्य[2]धनजातचरणखेदस्यापि सत. पूर्वोचितयानवाहनादिगमनमस्मरतो यथाकालमावश्यकापरिहाणिमास्कन्दतश्चर्यापरिषहसहनमवसेयम् ।   ५

स्मशानोद्यानशून्यायतनगिरिगुहागह्वरादिष्वनभ्यस्तपूर्वेषु निवसत आदित्यप्रकाश[3]स्वेन्द्रियज्ञानपरीक्षितप्रदेशे[4] कृतनियमक्रियस्य निषद्यां नियमितकालामास्थितवतः सिह्व्याघ्रादिविविधभीषणध्वनिश्रवणान्निवृत्तभयस्य चतुर्विधोपसर्गसहनादप्रच्युतमोक्षमार्गस्य वीरासनोत्कुटिकाद्यासनादविचलितविग्रहस्य तत्कृतबाधासहन निषद्यापरिषहविजय इति निश्चीयते ।   १०

स्वाध्यायध्यानाध्वश्रमपरिखेदितस्य मौहूर्तिकीं खरविषमप्रचुरशर्कराकपालसङ्कटा[5]-

और कामवाण मारना आदिको विफल कर दिया है उसके स्त्रीबाधापरीषहजय जानना चाहिए।

जिसने दीर्घकाल तक गुरुकुलमे रहकर ब्रह्मचर्यको धारण किया है, जिसने बन्ध-मोक्ष पदार्थोके स्वरूपको जान लिया है, सयमके आयतन शरीरको भोजन देनेके लिए जो देशान्तरका अतिथि बना है, गुरुके द्वारा जिसे स्वीकृति मिली है, जो वायुके समान नि सगताको स्वीकार करता है, बहुत बार अनशन, अवमौदर्य, वृत्तिपरिसख्यान और रसपरित्याग आदि जन्य बाधाके कारण जिसका शरीर परिक्लान्त है, देश और कालके प्रमाणसे रहित तथा सयमविरोधी मार्गगमनका जिसने परिहार कर दिया है, जिसने खड़ाऊँ आदिका त्याग कर दिया है, तीक्ष्ण ककड़ और काटे आदिके विधनेसे चरणमे खेदके उत्पन्न होने पर भी पहले योग्य यान और वाहन आदिसे गमन करने का जो स्मरण नही करता है तथा जो यथाकाल आवश्यकोका परिपूर्ण परिपालन करता है उसके चर्यापरीषहजय जानना चाहिए।   १५ २०

जिनमे पहले रहनेका अभ्यास नही किया है ऐसे श्मशान, उद्यान, शून्यघर, गिरिगुफा और गह्वर आदिमे जो निवास करता है, आदित्यके प्रकाश और स्वेन्द्रिय ज्ञानसे परीक्षित प्रदेशमे जिसने नियमक्रिया की है, जो नियतकाल निषद्या लगा कर बैठता है, सिह और व्याघ्र आदिकी नाना प्रकारकी भीषण ध्वनिके सुननेसे जिसे किसी प्रकारका भय नही होता, चार प्रकारके उपसर्गके सहन करनेसे जो मोक्षमार्गसे च्युत नही हुआ है तथा वीरासन और उत्कुटिका आदि आसनके लगानेसे जिसका शरीर चलायमान नही हुआ है उसके निषद्याकृत बाधाका सहन करना निषद्यापरीषहजय निश्चित होता है।   २५

जो स्वाध्याय, ध्यान और अध्वश्रमके कारण थककर जो कठोर, विषम तथा प्रचुरमात्रामे कङ्कड

(१)–परिक्रान्त–मु। (२)–व्यथन–मु., दि. १, दि. २। (३) प्रतिषु आदित्यस्वेन्द्रियज्ञानप्रकाशपरीक्षितप्रदेशे इति पाठ.। (४)–देशे प्रकृत–मु.। (५)–सकटादिशी–मु.।

तिशीतोष्णेषु भूमिप्रदेशेषु निद्रामनुभवतो यथाकृतैकपार्श्वदण्डायितादिशायिनः प्राणिबाधा-परिहाराय पतितदारुवद्[1] व्यपगतासुवद्[2]परिवर्तमानस्य ज्ञान[3]भावनावहितचेतसोऽनुष्ठित-व्यन्तरादिविविधोपसर्गादप्यचलितविग्रहस्यानियमितकालां तत्कृतबाधां क्षममाणस्य शय्या परिषहक्षमा कथ्यते ।

५ मिथ्यादर्शनोद्रिक्तामर्षपरुषावज्ञानिन्दासभ्यवचनानि क्रोधाग्निशिखाप्रवर्धनानि [4]निश्रृण्वतोऽपि तदर्थेष्वसमाहितचेतसः सहसा तत्प्रतीकारं कर्तुमपि शक्नुवतः पापकर्म-विपाकमभिचिन्तयतस्तान्याकर्ण्य तपश्चरणभावनापरस्य कषायविषलवमात्रस्याप्यनव-काशमात्महृदयं कुर्वत आक्रोशपरिषहसहनमवधार्यते ।

निशितविशसनमुशलमुद्गरादिप्रहरणताडनपीडनादिभिर्व्यापाद्यमानशरीरस्य व्या-
१० पादकेषु मनागपि मनोविकारमकुर्वतो मम पुराकृतदुष्कर्मफलमिदमिमे वराकाः किं कुर्वन्ति, शरीरमिदं जलबुद्बुदवद्विशरणस्वभावं व्यसनकारणमेतै[5]र्बाधते, संज्ञानदर्शनचारित्राणि मम न केनचिदुपहन्यन्ते इति चिन्तयतो वासितक्षणचन्दनानुलेपनसमदर्शिनो वधपरिषह-क्षमा मन्यते ।

और खपरोंके टुकड़ोंसे व्याप्त ऐसे अति शीत तथा अत्युष्ण भूमिप्रदेशोंमें एक मुहूर्तप्रमाण निद्राका
१५ अनुभव करता है, जो यथाकृत एक पार्श्व भागमें या दण्डायित आदि रूपसे शयन करता है, करवट लेनेसे प्राणियोंको होनेवाली बाधाका निवारण करनेके लिए जो गिरे हुए लकड़ीके कुन्देके समान या मुर्दाके समान करवट नहीं बदलता, जिसका चित्त ज्ञानभावनामें लगा हुआ है, व्यन्तरादिके द्वारा किये गये नानाप्रकारके उपसर्गोंसे भी जिसका शरीर चलायमान नहीं होता और जो अनियतकालिक तत्कृत बाधाको सहन करता है उसके शय्यापरीषहजय कही जाती है ।

२० मिथ्यादर्शनके उद्रेकसे कहे गये जो क्रोधाग्निकी शिखाको बढ़ाते हैं ऐसे क्रोधरूप, कठोर, अवज्ञाकर, निन्दारूप और असभ्य वचनोंको सुनते हुए भी जिसका उनके विषयमें चित्त नहीं जाता है, यद्यपि तत्काल उनका प्रतीकार करनेमें समर्थ है फिर भी यह सब पापकर्मका विपाक है इस तरह जो चिन्तवन करता है, जो उन शब्दोंको सुन कर तपश्चरण की भावनामें तत्पर रहता है और जो कषायविषके लेशमात्रको भी अपने हृदयमें अवकाश नहीं देता उसके आक्रोशपरीषहसहन निश्चित होता है ।

२५ तीक्ष्ण तलवार, मूसर और मुद्गर आदि अस्त्रोंके द्वारा ताड़न और पीड़न आदिसे जिसका शरीर तोड़ा-मरोड़ा जा रहा है तथापि मारनेवालोंपर जो लेशमात्र भी मनमें विकार नहीं लाता, यह मेरे पहले किये गये दुष्कर्मका फल है, ये बेचारे क्या कर सकते हैं, यह शरीर जलके बुलबुलेके समान विशरण-स्वभाव है, दुःखके कारणको ही ये अतिशय बाधा पहुँचाते हैं मेरे सम्यग्ज्ञान, सम्यग्दर्शन और सम्यक् चारित्रको कोई नष्ट नहीं कर सकता इस प्रकार जो विचार करता है वह वसूलासे छीलने और चन्दनसे
३० लेप करनेमें समदर्शी होता है इसलिए उसके वधपरीषहजय माना जाता है ।

---

(१)—पतिततरुदण्डव—ता.। (२)—तासुवदुपरि—मु.। (३) ज्ञानपरिभावना—मु.। (४)—नानि शृण्व—मु., दि. १। (५)—मैतैर्व्याबा —मु.।

बाह्याभ्यन्तरतपोऽनुष्ठानपरस्य तद्भावनावशेन निस्सारीकृतमूर्तेः पटुतपनतापनिष्पीतसारतरोरिव विरहितच्छायस्य त्वगस्थिशिराजालमात्रतनुयन्त्रस्य प्राणात्यये[1] सत्यप्याहारवसतिभेषजादीनि दीनाभिधानमुखवैवर्ण्याङ्गसञ्ज्ञादिभिरयाचमानस्य भिक्षाकालेऽपि विद्युदुद्योतवत् दुरुपलक्ष्यमूर्तेर्याचनापरिषहसहनमवसीयते ।

वायुवदसङ्गादनेकदेशचारिणोऽभ्युपगतैककालसम्भोजनस्य वाचयमस्य तत्समितस्य[2] वा सकृत्स्वतनुदर्शनमात्रतन्त्रस्य पाणिपुटमात्रपात्रस्य बहुषु दिवसेषु[3] बहुषु च गृहेषु भिक्षामनवाप्याप्यसंक्लिष्टचेतसो दातृविशेषपरीक्षानिरुत्सुकस्य लाभादप्यलाभो मे परम तप इति सन्तुष्टस्यालाभविजयोऽवसेयः । ५

सर्वाशुचिनिधानमिदमनित्यमपरित्राणमिति शरीरे निःशङ्कल्पत्वाद्विगतसंस्कारस्य गुणरत्नभाण्डसञ्चयप्रवर्धनसंरक्षण[4]सन्धारणकारणत्वादभ्युपगतस्थितिविधानस्याक्षम्रक्षणवद् व्रणानुलेपनवद्वा बहूपकारमाहारमभ्युपगच्छतो विरुद्धाहारपानसेवनवैषम्यजनितवातादिविकाररोगस्य युगपदनेकशतसंख्यव्याधिप्रकोपे सत्यपि तद्वशवर्तिता विजहतो जल्लौषधिप्राप्त्याद्यनेकतपोविशेषर्द्धियोगे सत्यपि शरीरनिस्स्पृहत्वात्तत्प्रतिकारानपेक्षिणो रोगपरिषहसहनमवगन्तव्यम् । १०

जो बाह्य और अभ्यन्तर तपके अनुष्ठान करनेमे तत्पर है, जिसने तपकी भावनाके कारण अपने शरीरको सुखा डाला है, जिसका तीक्ष्ण सूर्यके तापके कारण सार व छाया रहित वृक्षके समान त्वचा, अस्थि और शिराजालमात्रसे युक्त शरीरयन्त्र रह गया है, जो प्राणोका वियोग होने पर भी आहार वसति और दवाई आदिकी दीन शब्द कहकर, मुखकी विवर्णता दिखाकर व सज्ञा आदिके द्वारा याचना नही करता तथा भिक्षाके समय भी जिसकी मूर्ति बिजलीकी चमकके समान दुरुपलक्ष्य रहती है ऐसे साधुके याचना परिषहजय जानना चाहिए । १५ २०

वायुके समान निःसग होनेसे जो अनेक देशोमे विचरण करता है। जिसने दिनमे एक कालके भोजनको स्वीकार किया है, जो मौन रहता है या भाषासमितिका पालन करता है, एक बार अपने शरीरको दिखलानामात्र जिसका सिद्धान्त है, पाणिपुट ही जिसका पात्र है, बहुत दिन तक या बहुत घरोमे भिक्षाके नही प्राप्त होने पर भी जिसका चित्त सक्लेशसे रहित है, दाताविशेषकी परीक्षा करनेमे जो निरुत्सुक है तथा लाभसे भी अलाभ मेरे लिए परम तप है इस प्रकार जो सन्तुष्ट है उसके अलाभ परिषहजय जानना चाहिए। २५

यह सब प्रकारके अशुचि पदार्थोका आश्रय है, यह अनित्य है और परित्राणसे रहित है इस प्रकार इस शरीरमे संकल्परहित होनेसे जो विगतसस्कार है, गुणरूपी रत्नोके पात्रके सचय, वर्धन, सरक्षण और सन्धारणका कारण होनेसे जिसने शरीरकी स्थितिविधानको भले प्रकार स्वीकार किया है, धुरको ओंगन लगानेके समान या व्रण पर लेप करनेके समान जो बहुत उपकारवाले आहारको स्वीकार करता है, विरुद्ध आहार-पानके सेवनरूप विषमतासे जिसके वातादि विकार रोग उत्पन्न हुए हे, एकसाथ सैकडो ३०

---

(१) प्राणवियोगे सत्य-मु। (२) तत्समस्य वा आ., दि. १, दि-२। (३)-सेषु च मु.। (४)-रक्षणकार-आ., दि. २, ता.।

तृणग्रहणमुपलक्षणं कस्यचिद्व्यधनदुःखकारणस्य । तेन शुष्कतृणपरुषशर्कराकण्टक-निशितमृत्तिकाशूलादिव्य[1]धनकृतपादवेदनाप्राप्तौ सत्यां तत्राप्रणिहितचेतसश्चर्याशय्या-निषद्यासु प्राणिपीडापरिहारे नित्यमप्रमत्तचेतसस्तृणादिस्पर्शबाधापरिषहविजयो वेदितव्यः।

अप्कायिकजन्तुपीडापरिहारायामरणादस्नानव्रतधारिणः पटुरविकिरणप्रताप-जनितप्रस्वेदाक्त[2]पवनानीतपांसुनिचयस्य सिध्मकच्छूदद्रूदीर्णकण्डूयायामुत्पन्नायामपि कण्डू-यनविमर्दनसंघट्टनविवर्जितमूर्तेः स्वगतमलोपचय[3]परगतमलापचययोरसंकल्पितमनसः स[4]ज्ज्ञानचारित्रविमलसलिलप्रक्षालनेन कर्ममलपङ्क[5]निराकरणाय नित्यमुद्यतमतेर्मलपीडा-सहनमाख्यायते[6] ।

सत्कारः पूजाप्रशंसात्मकः । पुरस्कारो नाम क्रियारम्भादिष्वग्रतः करणमामन्त्रणं वा, तत्रानादरो[7] मयि क्रियते । चिरोषितब्रह्मचर्यस्य महातपस्विनः स्वपरसमयनिर्णयज्ञस्य बहुकृत्वः परवादिविजयिनः प्रणामभक्तिसम्भ्रमासनप्रदानादीनि मे न कश्चित्करोति । मिथ्यादृष्टय एवातीव भक्तिमन्तः किञ्चिदजानन्तमपि सर्वज्ञसम्भावनया सम्मान्य स्वस[8]-

व्याधियोंका प्रकोप होने पर भी जो उनके आधीन नहीं हुआ है तथा तपोविशेषसे जल्लौपधि और प्राप्ति आदि अनेक ऋद्धियोंका सम्बन्ध होने पर भी शरीरसे निस्पृह होनेके कारण जो उनके प्रतीकारकी अपेक्षा नहीं करता उसके रोगपरीषहसहन जानना चाहिए।

जो कोई विधनेरूप दुःखका कारण है उसका 'तृण' पदका ग्रहण उपलक्षण है। इसलिए सूखा तिनका, कठोर कङ्कड़, काँटा, तीक्ष्ण मिट्टी और शूल आदिके विधनेसे पैरोंमें वेदनाके होने पर उसमें जिसका चित्त उपयुक्त नहीं है तथा चर्या, शय्या और निषद्यामें प्राणिपीडाका परिहार करनेके लिए जिसका चित्त निरन्तर प्रमादरहित है उसके तृणस्पर्शादि बाधापरीषहजय जानना चाहिए।

अप्कायिक जीवोंकी पीडाका परिहार करनेके लिए जिसने मरणपर्यन्त अस्नानव्रत स्वीकार किया है, तीक्ष्ण सूर्यकी किरणोंके तापसे उत्पन्न हुए पसीनामें जिसके पवनके द्वारा लाया गया धूलिसंचय चिपक गया है, सिध्म, खाज और दादके होनेसे खुजलीके होने पर भी जो खुजलाने, मर्दन करने और दूसरे पदार्थसे घिसनेरूप क्रियासे रहित है, स्वगत मलका उपचय और परगत मलका अपचय होनेपर जिसके मनमें किसी प्रकार विकल्प नहीं होता तथा सम्यग्ज्ञान और सम्यक्चारित्ररूपी विमल जलके प्रक्षालन द्वारा जो कर्ममलपंकको दूर करनेके लिए निरन्तर उद्यतमति है उसके मलपीडासहन कहा गया है।

सत्कारका अर्थ पूजा-प्रशंसा है। तथा क्रिया-आरंभ आदिकमें आगे करना या आमंत्रण देना पुरस्कार है। इस विषयमें यह मेरा अनादर करता है। चिरकालसे मैंने ब्रह्मचर्यका पालन किया है, महातपस्वी हूं, स्वसमय और परसमयका निर्णयज्ञ हूँ, मैंने बहुत बार परवादियोंको जीता है तो भी कोई मुझे प्रणाम, और भक्ति नहीं करता और उत्साहसे आसन नहीं देता, मिथ्यादृष्टि ही अत्यन्त भक्तिवाले होते हैं, कुछ

(१)–व्यथन–मु.। (२)–स्वेदात्तपव–मु.। (३)–लोपचयगत–मु.। (४) सज्ञान–मु.। (५)–पंकजाल-निरा–मु.। (६)–ख्यायते । केशलुञ्चसंस्काराभ्यामुत्पन्नखेदसहनं मलसामान्यसहनेऽन्तर्भवतीति न पृथगुक्तम् । सत्कारः मु.। (७)–दरोऽपिक्रि–मु.। (८) स्वशासनप्रभा–ता.।

मयप्रभावनं कुर्वन्ति । व्यन्तरादयः पुरा अत्युग्रतपसां प्रत्यग्रपूजां निर्वर्तयन्तीति मिथ्या श्रुतिर्यदि न स्यादिदानीं कस्मान्मादृशां न कुर्वन्तीति दुष्प्रणिधानविरहितचित्तस्य सत्कार-पुरस्कारपरिषहविजय इति [1]विज्ञायते ।

अङ्गपूर्वप्रकीर्णकविशारदस्य शब्दन्यायाध्यात्मनिपुणस्य मम पुरस्तादितरे भास्कर-प्रभाभिभूतखद्योतोद्योतवन्नितरां नावभासन्त इति विज्ञानमदनिरासः प्रज्ञापरिषहजयः　५ प्रत्येतव्यः ।

अज्ञोऽयं न वेत्ति पशुसम इत्येवमाद्यधि[2]क्षेपवचन सहमानस्य परमदुश्चरतपोऽनुष्ठा-यिनो नित्यमप्रमत्तचेतसो मेऽद्या[3]पि ज्ञानातिशयो नोत्पद्यत इति अनभिसन्दधतोऽज्ञानपरि-षहजयोऽवगन्तव्य. ।

परमवैराग्यभावनाशुद्धहृदयस्य विदितसकलपदार्थतत्त्वस्यार्हदायतनसाधुधर्मपूजकस्य　१० चिरन्तनप्रव्रजितस्याद्यापि मे ज्ञानातिशयो नोत्पद्यते । महोपवासाद्यनुष्ठायिनां प्रातिहार्य-विशेषाः प्रादुरभूवन्निति प्रलापमात्रमनर्थिकेयं प्रव्रज्या । विफलं व्रतपरिपालनमित्येवमस-मादधानस्य दर्शनविशुद्धियोगाददर्शनपरिषहसहनमवसातव्यम् ।

नही जाननेवाले को भी सर्वज्ञ समझ कर आदर सत्कार करके अपने समयकी प्रभावना करते है, व्यन्तरा-दिक पहले अत्यन्त उग्र तप करनेवालोंकी प्रत्यग्र पूजा रचते थे यह यदि मिथ्या श्रुति नही है तो　१५ इस समय वे हमारे समान तपस्वियोंकी क्यों नही करते हैं इस प्रकार खोटे अभिप्रायसे जिसका चित्त रहित है उसके सत्कारपुरस्कारपरीषहजय जानना चाहिए।

मै अङ्ग, पूर्व और प्रकीर्णक शास्त्रोंमे विशारद हूँ तथा शब्दशास्त्र, न्यायशास्त्र और अध्यात्मशास्त्रमें निपुण हूँ। मेरे आगे दूसरे जन सूर्यकी प्रभासे अभिभूत हुए खद्योतके उद्योतके समान बिलकुल नही सुशोभित होते है इस प्रकार विज्ञानमदका निराश होना प्रज्ञापरिषहजय जानना चाहिए।　२०

यह मूर्ख है, कुछ नही जानता है, पशुके समान है इत्यादि तिरस्कारके वचनोको मै सहन करता हूँ, मने परम दुश्चर तपका अनुष्ठान किया है, मेरा चित्त निरन्तर अप्रमत्त रहता है, तो भी मेरे अभी तक भी ज्ञानका अतिशय नही उत्पन्न हुआ है इस प्रकार विचार नही करनेवालेके अज्ञानपरिषहजय जानना चाहिए।

परम वैराग्यकी भावनासे मेरा हृदय शुद्ध है, मैंने समस्त पदार्थोके रहस्यको जान लिया है, मै　२५ अरहन्त, आयतन, साधु और धर्मका उपासक हूँ, चिरकालसे मै प्रव्रजित हूँ तो भी मेरे अभी भी ज्ञानाति-शय नही उत्पन्न हुआ है। महोपवास आदिका अनुष्ठान करनेवालोके प्रातिहार्यविशेष उत्पन्न हुए यह प्रलापमात्र है, यह प्रव्रज्या अनर्थक है, व्रतोंका पालन करना निरर्थक है इत्यादि बातोका दर्शनविशुद्धि के योगसे मनमें नहीं विचार करनेवाले के अदर्शनपरिषहसहन जानना चाहिए।

(१)–जय प्रतिज्ञा–मु.। (२)–द्यवक्षेप–मु.।–द्यविक्षेप–दि. १, दि. २। (३) मेऽद्यत्वेऽपि विज्ञा–मु.।

एवं परिषहान् असंकल्पोपस्थितान् सहमानस्यासंक्लिष्टचेतसो रागादिपरिणामास्रवनिरोधान्महान्संवरो भवति ।

आह, किमिमे परिषहाः सर्वे संसारमहाटवीमतिक्रमितुमभ्युद्यतमभिद्रवन्ति उत कश्चित्प्रतिविशेष इत्यत्रोच्यते—अमी व्याख्यातलक्षणाः क्षुदादयश्चारित्रान्तराणि प्रति ५ भाज्याः । नियमेन पुनरनयोः प्रत्येतव्याः—

सूक्ष्मसाम्परायछद्मस्थवीतरागयोश्चतुर्दश ॥ १० ॥

क्षुत्पिपासाशीतोष्णदंशमशकचर्याशय्यावधालाभरोगतृणस्पर्शमलप्रज्ञाज्ञानानि । 'चतुर्दश' इति वचनादन्येषां परिषहाणामभावो वेदितव्यः । आह युक्तं तावद्वीतरागच्छद्मस्थे मोहनीयाभावात् तत्कृतवक्ष्यमाणाष्टपरिषहाभावाच्चतुर्दशनियमवचनम् । सूक्ष्म-१०. साम्पराये तु मोहोदयसद्भावात् 'चतुर्दश' इति नियमो नोपपद्यत इति ? तदयुक्तम् ; सन्मात्रत्वात् । तत्र हि केवलो लोभसञ्ज्वलनकषायोदयः सोऽप्यतिसूक्ष्मः । ततो वीतरागछद्मस्थकल्पत्वात् 'चतुर्दश' इति नियमस्तत्रापि युज्यते । ननु मोहोदयसहायाभावान्मन्दोद-

इस प्रकार जो संकल्पके बिना उपस्थित हुए परीषहोंको सहन करता है और जिसका चित्त संक्लेश रहित है उसके रागादि परिणामोंके आस्रवका निरोध होनेसे महान् संवर होता है ।

१५ संसाररूपी महा अटवीको उल्लंघन करनेके लिए उद्यत हुए पुरुषको क्या ये सब परीषह प्राप्त होती हैं या कोई विशेषता है इसलिए यहाँ कहते हैं—जिनके लक्षण कह आए हैं ऐसे ये क्षुधादिक परीषह अलग अलग चारित्रके प्रति विकल्पसे होते हैं । उसमें भी इन दोनोंमें नियमसे जानने योग्य—

सूक्ष्मसाम्पराय और छद्मस्थवीतरागके चौदह परीषह सम्भव हैं ॥ १० ॥

क्षुधा, पिपासा, शीत, उष्ण, दंशमशक, चर्या, शय्या, वध, अलाभ, रोग, तृणस्पर्श, मल, प्रज्ञा और २० अज्ञान ये चौदह परीषह हैं । सूत्रमें आए हुए 'चतुर्दश' इस वचनसे अन्य परीषहोंका अभाव जानना चाहिए ।

शंका—वीतरागछद्मस्थके मोहनीयके अभावसे तत्कृत आगे कहे जानेवाले आठ परीषहोंका अभाव होनेसे चौदह परीषहोंके नियमका वचन तो युक्त है, परन्तु सूक्ष्मसाम्पराय गुणस्थानमें मोहनीयका उदय होनेसे चौदह परीषह होते हैं यह नियम नहीं बनता ।

२५ समाधान—यह कहना अयुक्त है, क्योंकि वहाँ मोहनीयकी सत्तामात्र है । वहाँपर केवल लोभसञ्ज्वलन कषायका उदय होता है और वह भी अतिसूक्ष्म होता है इसलिए वीतराग छद्मस्थके समान होनेसे सूक्ष्मसाम्परायमें भी चौदह परीषह होते हैं यह नियम बन जाता है ।

(१)–षहान् सह–मु. । (२) 'वेयणीयभवाए ए पन्नानाणा उ आइमे । अट्ठमंमि अलाभोत्थो छउमत्थे चोद्दस ॥'–पञ्चसं० द्वा. ४, गा. २२।–(३) मुद्रितप्रतौ मोहनीयाभावाद्वक्ष्यमाणनाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनसत्कारपुरस्कारादर्शनानि तत्कृताष्ट–इति पाठ. । लिखितप्रतिषु च तथैव । परं नासौ सम्यक् प्रतिभाति। [illegible] तत्त्वार्थवार्तिकपाठानुसारी इति सोऽत्र योजितः । (४) केवललोभ–मु. ।

यत्वाच्च क्षुदादिवेदनाभावात्तत्सहनकृतपरिषहव्यपदेशो न युक्तिमवतरति ? तन्न । किं कारणम् ? शक्तिमात्रस्य विवक्षितत्वात् । सर्वार्थसिद्धिदेवस्य सप्तमपृथिवीगमनसामर्थ्यव्यपदेशवत् ।

आह, यदि शरीरवत्यात्मनि परिषहसन्निधानं प्रतिज्ञायते अथ भगवति उत्पन्नकेवलज्ञाने कर्मचतुष्टयफलानुभवनवशवर्तिनि कियन्त उपनिपतन्तीत्यत्रोच्यते । तस्मिन्पुनः— ५

एकादश जिने ॥ ११ ॥

निरस्तघातिकर्मचतुष्टये जिने वेदनीयसद्भावात्तदाश्रया एकादशपरिषहा[1] सन्ति । ननु च[2] मोहनीयोदयसहायाभावात्क्षुदादिवेदनाभावे परिषहव्यपदेशो न युक्त ? सत्यमेवमेतत्—वेदनाभावेऽपि द्रव्यकर्मसद्भावापेक्षया परिषहोपचार क्रियते, निरवशेषनिरस्तज्ञानातिशये चिन्तानिरोधाभावेऽपि तत्फलकर्मनिर्हरणफलापेक्षया ध्यानोपचारवत् । १० अथवा—एकादश जिने 'न सन्ति' इति वाक्यशेष कल्पनीयः, सोपस्कारत्वात्सूत्राणाम् ।

शंका—इन स्थानोमे मोहके उदयकी सहायता नही होनेसे और मन्द उदय होनेसे क्षुधादि वेदनाका अभाव है इसलिए इनके कार्यरूपसे 'परीषह' सज्ञा युक्तिको नही प्राप्त होती ।

समाधान—ऐसा नहीं ह, क्योकि यहाँ शक्तिमात्र विवक्षित है। जिस प्रकार सर्वार्थसिद्धिके देवके सातवी पृथ्वीके गमनके सामर्थ्यका निर्देश करते है उसी प्रकार यहाँ भी जानना चाहिए। १५

यदि शरीरवाले आत्मामे परीषहोके सन्निधानकी प्रतिज्ञा की जाती है तो केवलज्ञानको प्राप्त और चार कर्मोके फलके अनुभवनके वशवर्ती भगवान्के कितने परीषह प्राप्त होते है इसलिए यहाँ कहते है। उनम तो—

जिनमें ग्यारह परीषह सम्भव हैं ॥ ११ ॥

जिन्होंने चार घातिया कर्मोका नाश कर दिया है ऐसे जिन भगवान्मे वेदनीयकर्मका सद्भाव २० होनेसे तन्निमित्तक ग्यारह परीषह होते है।

शका—मोहनीयके उदयकी सहायता न होनेसे क्षुधादि वेदनाके न होनेपर परीषह संज्ञा युक्त नही है।

समाधान—यह कथन सत्य ही है तथापि वेदनाका अभाव होनेपर भी द्रव्यकर्मके सद्भावकी अपेक्षा से यहाँ परीषहोका उपचार किया जाता है। जिस प्रकार समस्त ज्ञानावरणके नाश हो जानेपर एक २५ साथ समस्त पदार्थोके रहस्यको प्रकाशित करनेवाले केवलज्ञानातिशयके होनेपर चिन्ता-निरोधका अभाव होनेपर भी कर्मोके नाश रूप उसके फलकी अपेक्षा ध्यानका उपचार किया जाता है उसी प्रकार यहाँ परीषहोंका उपचारसे कथन जानना चाहिए, अथवा जिन भगवान्मे ग्यारह परीषह 'नही है' इतना वाक्यशेष कल्पित कर लेना चाहिए क्योकि सूत्र उपस्कारसहित होते है। 'वाक्य शेषकी कल्पना

(१) 'खुप्पिवासुण्हसीयाणि सेज्जा रोगो वहो मलो। तणफासो चरीया य दसेक्कारस जोगिसु ॥'–पञ्चसं० द्वा. ४, गा. २२। (२) ननु मोह–मु.।

"कल्प्यो हि वाक्यशेषो वाक्यं च वक्तर्यधीनम्" इत्युपगमात् मोहोदयसहायीकृतक्षुदादि-वेदनाभावात् 'न सन्ति' इति वाक्यशेषः ।

करनी चाहिए और वाक्य वक्ताके अधीन होता है' ऐसा स्वीकार भी किया गया है। मोहके उदयकी सहायतासे होनेवाली क्षुधादि वेदनाओंका अभाव होनेसे 'नहीं है' यह वाक्यशेष उपन्यस्त किया गया है।

५ विशेषार्थ—जिन भगवान्के असाता वेदनीयका उदय होता है और यह क्षुधादि वेदनाका कारण है इसलिए यहां जिन भगवान्के कारणकी दृष्टिसे क्षुधादि ग्यारह परीषह कहे जाते हैं। पर क्या सच-मुचमें जिन भगवान्के क्षुधादि ग्यारह परीषह होते हैं यह एक प्रश्न है जिसका समाधान टीकामें दो प्रकारसे किया है। पहले तो जिन भगवान्के क्षुधादि परीषहोंके होनेके कारणके सद्भावकी अपेक्षा उनके अस्तित्वका निर्देश किया है पर कार्यरूपमें ये क्षुधादि ग्यारह परीषह जिन भगवान्के नहीं होते १० इसलिए इस दृष्टिसे 'न सन्ति' इस वाक्यशेषकी योजना कर वहां उनका निषेध किया है। अब यहां यह देखना है कि जिन भगवान्के क्षुधादि ग्यारह परीषह नहीं होते यह कैसे समझा जाय। वे इस कालमें पाये तो जाते नहीं, इसलिए प्रत्यक्ष देखकर तो यह जाना नहीं जा सकता। एक मात्र आगमको पुष्ट करनेवाली युक्तियां ही शेष रहती हैं जिनके अवलम्बनसे यह बात समझी जा सकती है, अतः यहां उन्हींका निर्देश करते हैं—

१५ १, केवली जिनके शरीरमें निगोद और त्रस जीव नहीं रहते। उनका क्षीणमोह गुणस्थानमें अभाव होकर वे परम औदारिक शरीरके धारी होते हैं। अतः भूख, प्यास और रोगादिकका कारण नहीं रहनेसे उन्हें भूख, प्यास और रोगादिककी बाधा नहीं होती। देवोंके शरीरमें इन जीवोंके न होनेसे जो विशेषता होती है उससे अनन्तगुणी विशेषता इनके शरीरमें उत्पन्न हो जाती है।

२, श्रेणि आरोहण करने पर प्रशस्त प्रकृतियोंका अनुभाग उत्तरोत्तर अनन्तगुणा बढ़ता जाता है २० और अप्रशस्त प्रकृतियोंका अनुभाग प्रति समय अनन्तगुणा हीन होता जाता है। इसलिए तेरहवें गुणस्थानमें होनेवाला असाता प्रकृतिका उदय इतना बलवान् नहीं होता जिससे उसे क्षुधादि कार्योंका सूचक माना जा सके।

३, असाताकी उदीरणा छठे गुणस्थान तक ही होती है, आगे नहीं होती, इसलिए उदीरणाके अभावमें वेदनीय कर्म क्षुधादिरूप कार्यका वेदन करानेमें असमर्थ है। जब कि केवली जिनके शरीरको २५ पानी और भोजनकी ही आवश्यकता नहीं रहती तब इनके न मिलनेसे जो क्षुधा और तृषा होती है वह उनके हो ही कैसे सकती है। वेदनीय कर्मका कार्य कुछ शरीरमें पानी तत्त्व और भोजन तत्त्वका अभाव करना नहीं है। वास्तवमें इनका अभाव अन्य कारणोंसे होता है। हाँ, इनका अभाव होनेपर इनकी पूर्तिके लिए जो वेदना होती है वह वेदनीय कर्मका काम है। सो जब कि केवली जिनके शरीरको उनकी आवश्यकता ही नहीं रहती, तब वेदनीयके निमित्तसे तज्जनित वेदना कैसे हो सकती है? अर्थात् ३० नहीं हो सकती।

(१) 'कल्प्यो हि वाक्यशेषो वाक्यं वक्तर्यधीनं हि ।'–पा. म. भा. १, १, ८। (२)–भावात् । आह मु.।

आह, यदि सूक्ष्मसाम्परायादिषु व्यस्ता परिषहाः अथ समस्ता[1] ताः क्वेति—

[2]बादरसाम्पराये सर्वे ॥ १२ ॥

साम्परायः कषायः। बादरः साम्परायो यस्य स बादरसाम्पराय इति। नेदं गुणस्थानविशेषग्रहणम्। कि तर्हि? अर्थनिर्देश.। तेन प्रमत्तादीनां सयतानां ग्रहणम्। तेषु हि अक्षीण[3]कषायदोषत्वात्सर्वे संभवन्ति। कस्मिन् पुनश्चारित्रे सर्वेषा सम्भवः? सामायिकच्छेदोपस्थापनपरिहारविशुद्धिसंयमेषु प्रत्येकं सर्वेषा सम्भवः। ५

४, केवली जिनके साताका आस्रव सदाकाल होनेसे उसकी निर्जरा भी सदाकाल होती रहती है, इसलिए जिस कालमे असाताका उदय होता है उस कालमे केवल उसका ही उदय नही होता किन्तु अनन्तगुणी शक्तिवाले साताके साथ वह उदयमे आता है। माना कि उस समय उसका स्वमुखेन उदय है पर वह प्रति समय बँधनेवाले साता कर्मपरमाणुओकी निर्जराके साथ ही होता है, इसलिए असाताका उदय वहा क्षुधादिरूप वेदनाका कारण नही हो सकता। १०

५, सुख दुखका वेदन वेदनीय कर्मका कार्य होने पर भी वह मोहनीयकी सहायतासे ही होता है। यत. केवली जिनके मोहनीयका अभाव होता है अत. वहा क्षुधादिरूप वेदनाओंका सद्भाव मानना युक्ति संगत प्रतीत नही होता। इन प्रमाणोसे निश्चित होता है कि केवली जिनके क्षुधादि ग्यारह परीषह नहीं होते। १५

कहते है—यदि सूक्ष्मसाम्पराय आदिमें अलग-अलग परीषह होते है तो मिलकर वे कहाँ होते है, यह बतलानेके लिए आगेका सूत्र कहते है—

बादरसाम्परायमें सब परीषह सम्भव हैं ॥ १२ ॥

साम्पराय कषायको कहते है। जिसके साम्पराय बादर होता है वह बादरसाम्पराय कहलाता है। यह गुणस्थान विशेषका ग्रहण नही है। तो क्या है? सार्थकनिर्देश है। इससे प्रमत्त आदिक संयतोका ग्रहण होता है। इनमे कषाय और दोषोके क्षीण न होनेसे सब परीषह सम्भव है। २०

शका—तो किस चारित्रमे सब परीषह सम्भव है?

समाधान—सामायिक, छेदोपस्थापना और परिहारविशुद्धिसयम इनमेसे प्रत्येकमें सब परीषह सम्भव है।

विशेषार्थ—बादरसाम्पराय अनिवृत्तिकरण नामक नौवे गुणस्थानका दूसरा नाम है। नौवे गुणस्थान तक स्थूल कषायका सद्भाव होता है, इसलिए अन्तदीपक न्यायसे इस गुणस्थानका नाम भी बादरसाम्पराय है। यहाँ 'बादरसाम्पराय' पदसे इस गुणस्थानका ग्रहण न हो इसीलिए टीकामे इसका निषेध किया है, क्यों कि बादरसाम्परायमे तो बाईस परीषह सम्भव है, बादरसाम्पराय नामक नौवे गुणस्थानमे नही। कारण कि इस गुणस्थानमे दर्शनमोहनीयका उदय नही होता। दर्शनमोहनीय- २५

(१) समस्ता क्वेति मु.। (२) 'निसेज्जा जायणाकोसो अरई इत्थिनग्गया। सक्कारो दसण मोहा बावीसा चेव रागिसु॥'—पञ्चसं० द्वा. ४, गा. २३। (३) अक्षीणाशयत्वात्सर्वे—आ., दि, १ दि. २, ता. (४)—सयमेष्वन्यतमे सर्वे—मु., ता.।

आह, गृहीतमेतत्परिषहाणां स्थानविशेषावधारणम्, इदं तु न विद्म. कस्याः प्रकृतेः कः कार्य इत्यत्रोच्यते—

ज्ञानावरणे प्रज्ञाऽज्ञाने ॥ १३ ॥

इदमयुक्तं वर्तते । किमत्रायुक्तम् ? ज्ञानावरणे सत्यज्ञानपरिषह उपपद्यते, प्रज्ञापरि-
५ षहः पुनस्तदपाये भवतीति कथं ज्ञानावरणे स्यात् ? इत्यत्रोच्यते—क्षायोपशमिकी प्रज्ञा अन्यस्मिन् ज्ञानावरणे सति मदं जनयति न सकलावरणक्षये इति ज्ञानावरणे सतीत्युपपद्यते ।

पुनरपरयोः परिषहयो. प्रकृतिविशेषनिर्देशार्थमाह—

के तीन भेद हैं। उनमेंसे सम्यक्त्वमोहनीयका उदय सातवें गुणस्थान तक ही सम्भव है, क्योंकि यही तक वेदक सम्यक्त्व होता है, इसलिए यहा पर बादरसाम्पराय अर्थात् स्थूल कषायमें सब परीषह सम्भव
१० है यही अर्थ लेना चाहिए।

कहते हैं—इन परीषहोके स्थानविशेषका अवधारण किया, किन्तु हम यह नहीं जानते कि किस प्रकृतिका क्या कार्य है इसलिए यहाँपर यह कहते हैं—

ज्ञानावरणके सद्भावमें प्रज्ञा और अज्ञान परीषह होते हैं ॥ १३ ॥

शंका—यह अयुक्त है ?

१५ प्रतिशंका—यहाँ क्या अयुक्त है ।

शंका—माना कि ज्ञानावरणके होनेपर अज्ञान परीषह उत्पन्न होता है परन्तु प्रज्ञा परीषह उसके अभावमें होता है इसलिए वह ज्ञानावरणके सद्भावमें कैसे हो सकता है ?

समाधान—यहाँ कहते हैं—क्षायोपशमिकी प्रज्ञा अन्य ज्ञानावरणके होनेपर मदको उत्पन्न करती है, समस्त ज्ञानावरणके क्षय होनेपर नहीं, इसलिए ज्ञानावरणके होनेपर प्रज्ञा परीषह होती है यह कथन
२० बन जाता है।

विशेषार्थ—विकल्पका अर्थ श्रुतज्ञान है, इसलिए जहाँ तक श्रुतज्ञान होता है वहाँ तक 'मैं अधिक जानता हूँ, यह कुछ भी नहीं जानता' ऐसा विकल्प देखा जाता है। यद्यपि इस प्रकारका विकल्प करनेवाले व्यक्तिको अधिक ज्ञानका लाभ ज्ञानावरण कर्मके प्रकृष्ट क्षयोपशमसे होता है तथापि जब-तक क्षायोपशमिक ज्ञान होता है तभी तक यह विकल्प होता है और क्षायोपशमिक ज्ञान उदयसापेक्ष
२५ होता है इसलिए यहां पर इस प्रकारके विकल्पका मुख्य कारण ज्ञानावरण कर्मका उदय कहा है। बहुतसे जीवोंको मोहका उदय रहते हुए भी ऐसा भाव होता है कि 'मैं महाप्राज्ञ हूँ, मेरी बराबरी करने-वाला अन्य कोई नहीं।' पर यहां मोहके उदयसे होनेवाले इस भावका ग्रहण नहीं किया है। यहां तो अपनी अज्ञानतावश जो अल्पज्ञानको महाज्ञान माननेका विकल्प होता है उसीका ग्रहण किया है। इस प्रकार ज्ञानावरणके सद्भावमें प्रज्ञा और अज्ञान दो परीषह होते हैं यह निश्चित होता है।

पुनः अन्य दो परीषहोंकी प्रकृति विशेषका ज्ञान करानेके लिए आगेका सूत्र कहते हैं—

दर्शनमोहान्तराययोरदर्शनालाभौ ॥ १४ ॥

यथासंख्यमभिसम्बन्धः। दर्शनमोहे अदर्शनपरिषहो, लाभान्तराये अलाभपरिषह इति। आह, यद्याद्ये मोहनीयभेदे एक परिषह, अथ द्वितीयस्मिन् कति भवन्तीत्यत्रोच्यते—

चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्काराः ॥ १५ ॥

दर्शनमोह और अन्तरायके सद्भावमें क्रमसे अदर्शन और अलाभ परीषह होते हैं ॥१४॥　५

इस सूत्रमे 'यथासख्य' पदका सम्बन्ध होता है। दर्शनमोहके सद्भावमे अदर्शन परीषह होता है और लाभान्तरायके सद्भावमे अलाभ परीषह होता है।

विशेषार्थ—दर्शनमोहसे यहां सम्यक्त्वमोहनीय प्रकृति ली गई है। इसका उदय रहते हुए चल, मल और अगाढ़ दोष उत्पन्न होते है। सम्यक्त्वके रहते हुए भी आप्त, आगम और पदार्थोके विषयमे नाना विकल्प होना चल दोष है। जिस प्रकार जलके स्वस्थ होते हुए भी उसमे वायुके निमित्तसे तरग- १० माला उठा करती है उसी प्रकार सम्यग्दृष्टि पुरुष यद्यपि अपने स्वरूपमे स्थित रहता है तथापि सम्यक्त्व मोहनीयके उदयसे आप्त, आगम और पदार्थोंके विषयमे उसकी बुद्धि चलायमान होती रहती है। यही चल दोष है। मलका अर्थ मैल है। शकादि दोषोके निमित्तसे सम्यग्दर्शनका मलिन होना मल दोष है। यह भी सम्यक्त्व मोहनीयके उदयमे होता है। तथा अगाढका अर्थ स्थिर न रहना है। सम्य-ग्दृष्टि जीव लौकिक प्रयोजनवश कदाचित् तत्त्वसे चलायमान होने लगता है। उदाहरणार्थ- १५ अन्य अन्यका कर्ता नही होता यह सिद्धान्त है और सम्यग्दृष्टि इसे भले प्रकार जानता है पर रागवश वह इस सिद्धान्त पर स्थिर नही रह पाता। वह पारमार्थिक कार्यको भी लौकिकप्रयोजनका प्रयोजक मान बैठता है। इस प्रकार सम्यक्त्व मोहनीयके उदयसे ये तीन दोष होते है। ये तीनो एक है फिर भी भिन्न भिन्न अभिप्रायकी दृष्टिसे यहां इन्हे पृथक् पृथक् रूपसे परिगणित किया है। प्रकृतमे इसी दोषको ध्यानमे रखकर अदर्शन परीषहका निर्देश किया है। यह दर्शनमोहनीयके उदयसे होता है इसलिए २० इसे दर्शनमोहनीय का कार्य कहा है। भोजनादि पदार्थोका न प्राप्त होना अन्य बात है पर भोजनादि पदार्थोंके न मिलने पर जिसके 'अलाभ' परिणाम होता है उसका वह परिणाम लाभान्तराय कर्मका कार्य होनेसे अलाभको लाभान्तराय कर्मका कार्य कहा है। परके लाभको स्वका लाभ मानना मिथ्यात्व दर्शनमोहनीयका कार्य है इसलिए यहा इसकी विवक्षा नही है। यहां तो अलाभ परिणाम किसके उदयमे होता है इतना ही विचार किया गया है। इस प्रकार अदर्शनभाव मोहनीय कर्मका और अलाभभाव २५ लाभान्तराय कर्मका कार्य है यह निश्चित होता है।

कहते है—यदि आदिके मोहनीयके भेदके होनेपर एक परीषह होता है तो दूसरे भेदके होनेपर कितने परीषह होते है इसलिए आगेका सूत्र कहते है—

चारित्रमोहके सद्भावमें नाग्न्य, अरति, स्त्री, निषद्या, आक्रोश, याचना और सत्कारपुरस्कार परीषह होते हैं ॥ १५ ॥　३०

पुंवेदोदयादिनिमित्तत्वान्नाग्न्यादिपरिषहाणां मोहोदयनिमित्तत्वं प्रतिपद्यामहे। निषद्यापरिषहस्य कथम्? तत्रापि प्रणिपीडापरिहारार्थत्वात्। मोहोदये सति प्राणिपीडापरिणामः संजायत इति।

अवशिष्टपरिषहप्रकृतिविशेषप्रतिपादनार्थमाह—

५ **वेदनीये शेषाः ॥ १६ ॥**

उक्ता एकादश परिषहाः। तेभ्योऽन्ये शेषाः वेदनीये सति 'भवन्ति' इति वाक्यशेषः। के पुनस्ते? क्षुत्पिपासाशीतोष्णदंशमशकचर्याशय्यावधरोगतृणस्पर्शमलपरिषहाः।

शंका—नाग्न्यादि परीषह पुंवेदोदय आदिके निमित्तसे होते हैं इसलिए मोहोदयको उनका निमित्त कहते हैं पर निषद्यापरीषह मोहोदयके निमित्तसे कैसे होता है?

१० समाधान—उसमें भी प्राणिपीड़ाके परिहारकी मुख्यता होनेसे वह मोहोदय निमित्तक माना गया है, क्योंकि मोहोदयके होने पर प्राणिपीडारूप परिणाम होता है।

विशेषार्थ—आगे चर्या और शय्याको वेदनीयनिमित्तक कहा है और यहाँ निषद्याको मोहनीयनिमित्तक। ये तीनों परीषह एक श्रेणिके हैं। फिर क्या कारण है कि इनमेंसे निषद्याको मोहोदय निमित्तक कहा है। यदि चर्या और शय्या परीषह वेदनीयनिमित्तक होते हैं तो इसे वेदनीयनिमित्तक क्यों १५ नहीं माना जाता। यह एक प्रश्न है जिसका उत्तर टीकामें दिया है। वहाँ बतलाया है कि प्राणिपीडारूप परिणाम मोहोदयसे होता है और निषद्यापरीषहजयमें इस प्रकारके परिणामपर विजय पानेकी मुख्यता है। यही कारण है कि निषद्याको चारित्रमोहनिमित्तक माना है। माना कि इस विवक्षासे चर्या और शय्या परीषहको भी मोहोदयनिमित्तक मान सकते थे पर वहाँ कण्टकादिकके निमित्तसे होनेवाली वेदनाकी मुख्यता करके उक्त दोनों परीषह वेदनीयनिमित्तक कहे हैं। तात्पर्य यह है कि २० चर्या, शय्या और निषद्या इनमें प्राणिपीडा और कण्टकादिनिमित्तक वेदना ये दोनों कार्य सम्भव हैं। इसलिए इन दोनों कार्योंका परिज्ञान करानेके लिए निषद्याको मोहनिमित्तक और शेष दोको वेदनीयनिमित्तक कहा है।

अब अवशिष्ट परीषहोंकी प्रकृति विशेषका कथन करनेके लिए आगेका सूत्र कहते हैं—

बाकीके सब परीषह वेदनीयके सद्भावमें होते हैं ॥ १६ ॥

२५ ग्यारह परीषह पहले कह आये हैं। उनसे अन्य शेष परीषह हैं। वे वेदनीयके सद्भावमें होते हैं। यहाँ 'भवन्ति' यह वाक्यशेष है।

शंका—वे कौन कौन हैं?

समाधान—क्षुधा, पिपासा, शीत, उष्ण, दंशमशक, चर्या, शय्या, वध, रोग, तृणस्पर्श और मलपरीषह।

३० विशेषार्थ—शरीरमें भोजनका कम होना, पानीका कम होना, कण्ठका सूखना, ऋतुमें ठण्डी या गरमीका होना, डांस-मच्छरका काटना, गमन व शयन करते समय कण्टक आदिका चुभना, किसीके

आह, व्याख्यातनिमित्तलक्षणविकल्पाः प्रत्यात्मनि प्रादुर्भवन्तः कति युगपदवतिष्ठन्त इत्यत्रोच्यते—

एकादयो भाज्या युगपदेकस्मिन्नैकान्नविंशतेः ॥ १७ ॥

आङभिविध्यर्थः । तेन एकोनविंशतिरपि क्वचित् युगपत्सम्भवतीत्यवगम्यते । तत्कथमिति चेदुच्यते—शीतोष्णपरिषहयोरेकः शय्यानिषद्याचर्याणां [1]चान्यतम एव भवति एकस्मिन्नात्मनि । कुतः ? विरोधात् । तत्त्रयाणामपगमे युगपदेकात्मनीतरेषां सम्भवादेकोनविंशतिविकल्पा[2] बोद्धव्याः । ननु प्रज्ञाज्ञानयोरपि विरोधाद्युगपदसम्भवः ? श्रुतज्ञानापेक्षया प्रज्ञापरिषहः अवधिज्ञाना[3]द्यभावापेक्षया अज्ञानपरिषह इति नास्ति विरोधः । ५

आह, उक्ता गुप्तिसमितिधर्मानुप्रेक्षापरिषहजयाः संवरहेतवः पञ्च । संवरहेतुश्चारित्रसञ्ज्ञो वक्तव्य इति तद्भेदप्रदर्शनार्थमुच्यते— १०

द्वारा, मारना, गाली-गलौज करना, शरीरमे रोगका होना, तिनका आदिका चुभना और शरीरमे मलका जमा होना आदि अपने अपने कारणोंसे होते हैं। इनका कारण वेदनीय कर्मका उदय नहीं है पर इन कामोंके होने पर भूखकी वेदना होती है, प्यास लगती है आदि वह वेदनीय कर्मका कार्य है। ऐसा यहां अभिप्राय समझना चाहिए।

कहते हैं, परीषहोंके निमित्त, लक्षण और भेद कहे। प्रत्येक आत्मामे उत्पन्न होते हुए वे एक साथ कितने हो सकते हैं, इस बातको बतलानेके लिए आगेका सूत्र कहते हैं— १५

एक साथ एक आत्मामें एकसे लेकर उन्नीस तक परीषह विकल्पसे हो सकते हैं ॥ १७ ॥

यहां 'आङ्' अभिविधि अर्थमे आया है। इससे किसी एक आत्मामें एक साथ उन्नीस भी सम्भव हैं यह ज्ञात होता है।

शंका—यह कैसे ? २०

समाधान—एक आत्मामे शीत और उष्ण परीषहोंमेंसे कोई एक तथा शय्या, निषद्या और चर्या इनमेसे कोई एक परीषह ही होते हैं, क्योकि शीत और उष्ण इन दोनो के तथा शय्या, निषद्या और चर्या इन तीनोंके एक साथ होनेमे विरोध आता है।

इन तीनोके निकाल देने पर एक साथ एक आत्मामे इतर परीषह सम्भव होनेसे वे सब मिलकर उन्नीस परीषह जानना चाहिए। २५

शंका—प्रज्ञा और अज्ञान परीषहमें भी विरोध है, इसलिए इन दोनोका एक साथ होना असम्भव है ?

समाधान—एक साथ एक आत्मामें श्रुतज्ञानकी अपेक्षा प्रज्ञा परीषह और अवधिज्ञान आदिके अभावकी अपेक्षा अज्ञान परीषह रह सकते हैं इसलिए कोई विरोध नहीं है।

कहते हैं, गुप्ति, समिति, धर्म, अनुप्रेक्षा और परीषहजय ये पांच संवरके हेतु कहे। अब चारित्र- ३०

---

(१)–चर्याणामन्यतम मु.। (२)–कल्पो बोद्धव्यो। ननु आ., दि. १, दि. २। (३)–ज्ञानापेक्षया मु.।

सामायिकच्छेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसाम्परायथाख्यातमिति चारित्रम् ॥ १८ ॥

अत्र चोद्यते—दशविधे धर्मे संयम उक्तः स एव चारित्रमिति पुनर्ग्रहणमनर्थकमिति ? नानर्थकम्, धर्मेऽन्तर्भूतमपि चारित्रमन्ते गृह्यते मोक्षप्राप्तेः साक्षात्कारणमिति ज्ञापनार्थम्।
५ सामायिकमुक्तम्। क्व ? 'दिग्देशानर्थदण्डविरतिसामायिक-' इत्यत्र। तद् द्विविधं नियतकालमनियतकालञ्च। स्वाध्यायादि नियतकालम्। ईर्यापथाद्यनियतकालम्। प्रमादकृतानर्थप्रबन्धविलोपे सम्यक्प्रतिक्रिया छेदोपस्थापना विकल्पनिवृत्तिर्वा। परिहरणं परिहारः प्राणिवधान्निवृत्तिः। तेन विशिष्टा शुद्धिर्यस्मिंस्तत्परिहारविशुद्धिचारित्रम्। अतिसूक्ष्मकषायत्वात्सूक्ष्मसाम्परायचारित्रम्। मोहनीयस्य निरवशेषस्योपशमात्क्षयाच्च
१० आत्मस्वभावावस्थापेक्षालक्षणं अथाख्यातचारित्रमित्याख्यायते। पूर्वचारित्रानुष्ठायिभिराख्यातं न तत्प्राप्तं प्राङ्मोहक्षयोपशमाभ्यामित्यथाख्यातम्। अथशब्दस्यानन्तर्यार्थवृत्तित्वा-

संज्ञक संवरका हेतु कहना चाहिए इसलिए उसके भेद दिखलानेके लिए आगेका सूत्र कहते हैं—

सामायिक, छेदोपस्थापना, परिहारविशुद्धि, सूक्ष्मसाम्पराय और यथाख्यात यह पाँच प्रकारका चारित्र है ॥ १८ ॥

१५ शंका—दश प्रकारके धर्ममें संयमका कथन कर आये हैं और वह ही चारित्र है इसलिए उसका फिरसे ग्रहण करना निरर्थक है ?

समाधान—निरर्थक नहीं है, क्योंकि धर्ममें अन्तर्भाव होनेपर भी चारित्र मोक्ष-प्राप्तिका साक्षात् कारण है यह दिखलानेके लिए उसका अन्तमें ग्रहण किया है।

समायिकका कथन पहले कर आये हैं।

२० शंका—कहाँ पर ?

समाधान—'दिग्देशानर्थदण्डविरतिसामायिक'—इस सूत्रका व्याख्यान करते समय।

वह दो प्रकारका है—नियतकाल और अनियतकाल। स्वाध्याय आदि नियतकाल सामायिक है और ईर्यापथ आदि अनियतकाल सामायिक है। प्रमादकृत अनर्थप्रबन्धका अर्थात् हिंसादि अव्रतोंके अनुष्ठानका विलोप अर्थात् सर्वथा त्याग करने पर जो भले प्रकार प्रतिक्रिया अर्थात् पुनः व्रतोंका ग्रहण
२५ होता है वह छेदोपस्थापना चारित्र है। अथवा विकल्पोंकी निवृत्तिका नाम छेदोस्थापनाचारित्र है। प्राणिवधसे निवृत्तिको परिहार कहते हैं। इस युक्त शुद्धि जिस चारित्रमें होती है वह परिहारविशुद्धि चारित्र है। जिस चारित्रमें कषाय अतिसूक्ष्म हो जाता है वह सूक्ष्मसाम्परायचारित्र है। समस्त मोहनीय कर्मके उपशम या क्षयसे जैसा आत्माका स्वभाव है उस अवस्था रूप जो चारित्र होता है वह अथाख्यातचारित्र कहा जाता है। पूर्व चारित्रका अनुष्ठान करनेवालोंने जिसका कथन किया है पर मोहनीय-
३० के क्षय या उपशम होनेके पहले जिसे प्राप्त नहीं किया इसलिए उसे अथाख्यात कहते हैं। 'अथ' शब्द

(१)—कालञ्च। प्रमा—ता.। (२) -नन्तरार्थवर्ति—मु., ता.

न्निरवशेषमोहक्षयोपशमानन्तरमाविर्भवतीत्यर्थः[1]। 'यथाऽऽख्यातम्' इति वा; यथाऽऽत्मस्वभावोऽवस्थितस्तथैवाख्यातत्वात्। 'इति' शब्दः परिसमाप्तौ द्रष्टव्यः। ततो यथाख्यातचारित्रात्सकलकर्मक्षयपरिसमाप्तिर्भवतीति ज्ञाप्यते। सामायिकादीनामानुपूर्व्यवचनमुत्तरोत्तरगुणप्रकर्ष[2]ख्यापनार्थं क्रियते।

'अनन्तर' अर्थवर्ती होनेसे समस्त मोहनीय कर्मके क्षय या उपशमके अनन्तर वह आविर्भूत होता है यह उक्त कथनका तात्पर्य है। अथवा इस चारित्रका एक नाम यथाख्यात भी है। जिस प्रकार आत्माका स्वभाव अवस्थित है उसी प्रकार यह कहा गया है, इसलिए इसे यथाख्यात कहते हैं। ५

सूत्रमे आया हुआ 'इति' शब्द परिसमाप्ति अर्थमें जानना चाहिए। इसलिए इससे यथाख्यात चारित्रसे समस्त कर्मोंके क्षयकी परिसमाप्ति होती है यह जाना जाता है। उत्तरोत्तर गुणोके प्रकर्षका ख्यापन करने के लिए सामायिक, छेदोपस्थापना इत्यादि क्रमसे इनका नामनिर्देश किया है। १०

विशेषार्थ—चारित्र यह एक प्रकारका होकर भी उसके पांच भेद विवक्षाविशेषसे किये गये हैं। सामायिकमें सर्वसावद्यकी निवृत्तिरूप सकल्पकी मुख्यता है। छेदोपस्थापनामे चारित्रमें लगनेवाले दोषोंके परिमार्जनकी मुख्यता है। परिहारविशुद्धि चारित्र ऐसे संयतके होता है जो तीस वर्षतक गृहस्थ अवस्थामे सुखपूर्वक बिता कर संयत होने पर तीर्थंकरके पादमूलकी परिचर्या करते हुए आठ वर्ष तक प्रत्याख्यानपूर्वका अध्ययन करता है। यह जन्तुओंकी रक्षा कैसे करनी चाहिए, वे किस द्रव्यके निमित्तसे किस क्षेत्र और किस कालमें विशेषतः उत्पन्न होते है, जीवोकी योनि और जन्म कितने प्रकारके होते है इत्यादि बातोको भले प्रकार जानता है। यह प्रमादरहित, महाबलशाली, कर्मोंकी महानिर्जरा करनेवाला और अति दुष्कर चर्याका अनुष्ठान करनेवाला होता है। तथा यह तीनो सध्याकालोको छोड़कर दो कोस गमन करनेवाला होता है। इन सब कारणोंसे इस सयतके ऐसी सामर्थ्य उत्पन्न होती है जिस के बलसे यह अन्य जीवोको बाधा पहुँचाये बिना चर्या करनेमे समर्थ होता है। सूक्ष्मसापराय और यथाख्यात चारित्रका अर्थ स्पष्ट ही है। इस प्रकार विवक्षाभेदसे एक चारित्र पाच प्रकारका कहा गया है। १५ २०

इनमेंसे सामायिक और छेदोपस्थापना की जघन्य विशुद्धिलब्धि सबसे अल्प होती है। इससे परिहारविशुद्धि चारित्रकी जघन्य विशुद्धिलब्धि अनन्तगुणी होती है। इससे इसीकी उत्कृष्ट विशुद्धिलब्धि अनन्तगुणी होती है। इससे सामायिक और छेदोपस्थापनाकी उत्कृष्ट विशुद्धिलब्धि अनन्तगुणी होती है। इससे सूक्ष्मसाम्पराय चारित्रकी जघन्य विशुद्धिलब्धि अनन्तगुणी होती है। इससे इसीकी उत्कृष्ट विशुद्धिलब्धि अनन्तगुणी होती है। इससे यथाख्यात चारित्रकी विशुद्धिलब्धि एक प्रकारकी होकर भी अनन्तगुणी होती है। यही कारण है कि सूत्रमें सामायिक, छेदोपस्थापना इत्यादि क्रमसे इन पांचोंका नाम निर्देश किया है। २५

पहले दस प्रकारके धर्मका निर्देश करते समय सयमधर्म कह आये है, इसलिए चारित्रका अन्तर्भाव उसमे हो जानेके कारण यहा इसका अलगसे कथन करनेकी आवश्यकता नही है ऐसा प्रश्न होता है, ३०

(१)–त्यर्थः। तथा–मु., ता., ना.। (२) -कर्षज्ञापनार्थम् मु.।

आह, उक्तं चारित्रम् । तदनन्तरमुद्दिष्टं यत् 'तपसा निर्जरा च' इति तस्येदानीं तपसो विधानं कर्तव्यमित्यत्रोच्यते । तद् द्विविधं बाह्यमाभ्यन्तरं च । तत्प्रत्येकं षड्विधम् । तत्र बाह्यभेदप्रतिपत्त्यर्थमाह

अनशनावमौदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशा बाह्यं तपः ॥ १९ ॥

दृष्टफलानपेक्षं , संयमप्रसिद्धिरागोच्छेदकर्मविनाशध्यानागमावाप्त्यर्थमनशनम् । संयमप्रजागर[1]दोषप्रशमसन्तोषस्वाध्यायादिसुखसिद्ध्यर्थमवमौदर्यम् । भिक्षार्थिनो मुनेरेकागारादिविषयः[2] सङ्कल्पः चिन्तावरोधो वृत्तिपरिसंख्यानमाशानिवृत्त्यर्थमवगन्तव्यम् । इन्द्रियदर्पनिग्रहनिद्राविजयस्वाध्यायसुखसिद्ध्या[3]द्यर्थो घृतादिवृष्यरसपरित्यागश्चतुर्थं तपः । शून्यागारादिषु विविक्तेषु जन्तुपीडाविरहितेषु संयतस्य शय्यासनमाबाधात्ययब्रह्मचर्यस्वाध्यायध्यानादिप्रसिद्ध्यर्थं कर्तव्यमिति पञ्चमं तपः । आतपस्थानं वृक्षमूलनिवासो निरावरणशयनं बहुविधप्रतिमास्थानमित्येवमादिः कायक्लेशः[4] तत् षष्ठं तपः ।

फिर भी समस्त कर्मका क्षय चारित्रसे होता है यह दिखलानेके लिए यहां चारित्रका पृथक् रूपसे व्याख्यान किया है ।

कहते हैं, चारित्रका कथन किया । संवरके हेतुओंका निर्देश करनेके बाद 'तपसा निर्जरा च' यह सूत्र कहा है, इसलिए यहां पर तपका विधान करना चाहिए, अतः यहा कहते हैं—वह दो प्रकारका है—बाह्य और अभ्यन्तर । उसमें भी यह प्रत्येक छह प्रकारका है । उनमेंसे पहले बाह्य तपके भेदोंका कथन करनेके लिए आगेका सूत्र कहते हैं—

अनशन, अवमौदर्य, वृत्तिपरिसंख्यान, रसपरित्याग, विविक्तशय्यासन और कायक्लेश यह छह प्रकारका बाह्य तप है ॥ १९ ॥

दृष्टफल मंत्र साधना आदिकी अपेक्षा किये बिना संयमकी सिद्धि, रागका उच्छेद, कर्मोंका विनाश, ध्यान और आगमकी प्राप्तिके लिए अनशन तप किया जाता है । संयमको जागृत रखने, दोषोंके प्रशम करने, सन्तोष और स्वाध्याय आदिकी सुखपूर्वक सिद्धिके लिए अवमौदर्य तप किया जाता है । भिक्षाके इच्छुक मुनिका एक घर आदि विषयक संकल्प अर्थात् चिन्ताका अवरोध करना वृत्तिपरिसंख्यान तप है । आशाकी निवृत्ति इसका फल जानना चाहिए । इन्द्रियोंके दर्पका निग्रह करनेके लिए, निद्रापर विजय पानेके लिए और सुखपूर्वक स्वाध्यायकी सिद्धिके लिए घृतादि गरिष्ठ रसका त्याग करना चौथा तप है । एकान्त जन्तुओंकी पीड़ासे रहित शून्य घर आदिमें निर्बाध ब्रह्मचर्य, स्वाध्याय और ध्यान आदिकी प्रसिद्धिके लिए संयतको शय्यासन लगाना चाहिए । यह पाचवाँ तप है । आतापनयोग, वृक्षके मूलमें निवास, निरावरण शयन और नाना प्रकारके प्रतिमास्थान इत्यादि करना कायक्लेश है,

---

(१)-गरणदोष-आ., दि. १, दि. २, ता. । (२)-विषयसंकल्पचित्ताव-ता., मु. ।-विषयः संकल्पचिन्तवि-दि. १, दि. २ । (३) -सिद्धचर्थो मु., दि. २ । (४)-क्लेशः षष्ठं मु. ता. ।

तत्किमर्थम् ? देहदुःखतितिक्षासुखानभिष्वङ्गप्रवचनप्रभावनाद्यर्थम् । परिषहस्यास्य च को विशेष ? यदृच्छयोपनिपतित. परिषहः । स्वयंकृत कायक्लेशः । बाह्यत्व-मस्य कुतः ? बाह्यद्रव्यापेक्षत्वात्परप्रत्यक्षत्वाच्च बाह्यत्वम् ।

अभ्यन्तरतपोभेदप्रदर्शनार्थमाह—

प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरम् ॥ २० ॥　　५

कथमस्याभ्यन्तरत्वम् ? मनोनियमनार्थत्वात् । प्रमाददोषपरिहारः प्रायश्चित्तम् । पूज्येष्वादरो विनयः । कायचेष्टया द्रव्यान्तरेण चोपासनं[1] वैयावृत्त्यम् । ज्ञानभावनाऽऽल-स्यत्यागः स्वाध्यायः । आत्माऽऽत्मीयसङ्कल्पत्यागो व्युत्सर्गः । चित्तविक्षेपत्यागो ध्यानम् ।

तद्भेदप्रतिपादनार्थमाह—

नवचतुर्दशपञ्चद्विभेदा यथाक्रमं प्राग्ध्यानात् ॥ २१ ॥　　१०

यह छठवाँ तप है। यह किसलिए किया जाता है ? यह देह-दुखको सहन करनेके लिए, सुखविषयक आसक्तिको कम करनेके लिए और प्रवचनकी प्रभावना करनेके लिए किया जाता है।

शका—परीषह और कायक्लेशमे क्या अन्तर है ?

समाधान—अपन आप प्राप्त हुआ परीषह और स्वय किया गया कायक्लेश है, यही इन दोनोमे अन्तर है।　　१५

शंका—इस तपको बाह्य क्यो कहते है ?

समाधान—यह बाह्य-द्रव्यके आलम्बनसे होता है और दूसरोंके देखनेमे आता है इसलिए इसे बाह्य तप कहते है।

अब आभ्यन्तर तपके भेदोको दिखलानेके लिए आगेका सूत्र कहते है—

प्रायश्चित्त, विनय, वयावृत्य, स्वाध्याय, व्युत्सर्ग और ध्यान यह छह प्रकारका आभ्यन्तर तप है ॥ २० ॥　　२०

शंका—इसे आभ्यन्तर तप क्यो कहते है ?

समाधान—मनका नियम करनेवाला होनेसे इसे आभ्यन्तर तप कहते है।

प्रमादजन्य दोषका परिहार करना प्रायश्चित्त तप है। पूज्य पुरुषोंका आदर करना विनय तप है। शरीर की चेष्टा या दूसरे द्रव्यद्वारा उपासना करना वैयावृत्त्य तप है। आलस्यका त्यागकर ज्ञानकी आराधना करना स्वाध्याय तप है। अहंकार और ममकाररूप संकल्प का त्याग करना व्युत्सर्ग तप है, तथा चित्तके विक्षेपका त्याग करना ध्यान तप है।　　२५

अब इनके भेदोंको दिखलानेके लिए आगेका सूत्र कहते है—

ध्यानसे पूर्वके आभ्यन्तर तपोंके अनुक्रमसे नौ, चार, दश, पाँच और दो भेद हैं ॥ २१ ॥

---

(१)–रेण वोप–ता.।

'यथाक्रमम्' इति वचनान्नवभेदं प्रायश्चित्तम्, विनयश्चतुर्विध , वैयावृत्त्यं दशविधम्, स्वाध्यायः पञ्चविधः, द्विभेदो व्युत्सर्ग इत्यभिसंबध्यते । 'प्राग्ध्यानात्' इति वचनं ध्यानस्य बहुवक्तव्यत्वात्पश्चाद्वक्ष्यत इति ।

आद्यस्य भेदस्वरूपनिर्ज्ञानार्थमाह—

५ **आलोचनप्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारोपस्थापनाः ॥ २२ ॥**

तत्र गुरवे प्रमादनिवेदनं दशदोषविवर्जितमालोचनम् । मिथ्यादुष्कृताभिधानादभिव्यक्तप्रतिक्रियं प्रतिक्रमणम् । [तदुभय-] संसर्गे सति विशोधनात्तदुभयम् । संसक्तान्नपानोपकरणादिविभजनं विवेकः । कायोत्सर्गादिकरणं व्युत्सर्गः । अनशनावमोदर्यादिलक्षणं तपः । दिवसपक्षमासादिना प्रव्रज्याहापनं छेदः । पक्षमासादिविभागेन दूरतः परिवर्जनं परिहारः । पुनर्दीक्षाप्रापणमुपस्थापना ।

सूत्रमें 'यथाक्रमम्' यह वचन दिया है। इससे प्रायश्चित्त नौ प्रकारका है, विनय चार प्रकारका है, वैयावृत्त्य दश प्रकारका है, स्वाध्याय पांच प्रकारका है और व्युत्सर्ग दो प्रकारका है ऐसा सम्बन्ध होता है। सूत्रमें—'प्राग्ध्यानात्' यह वचन दिया है, क्योंकि ध्यानके विषयमें बहुत कुछ कहना है, इसलिए उसका आगे कथन करेंगे।

१५ अब पहले आभ्यन्तर तपके भेदोंके स्वरूपका ज्ञान करानेके लिए आगेका सूत्र कहते हैं—

आलोचना, प्रतिक्रमण, तदुभय, विवेक, व्युत्सर्ग, तप, छेद, परिहार और उपस्थापना यह नव प्रकारका प्रायश्चित्त है ॥ २२ ॥

गुरुके समक्ष दश दोषोंको टालकर अपने प्रमादका निवेदन करना आलोचना है। 'मेरा दोष मिथ्या हो' गुरुसे ऐसा निवेदन करके अपनी प्रतिक्रिया व्यक्त करना प्रतिक्रमण है। आलोचना और प्रतिक्रमण इन दोनोंका संसर्ग होनेपर दोषोंका शोधन होनेसे तदुभय प्रायश्चित्त है। संसक्त हुए अन्न, पान और उपकरण आदिका विभाग करना विवेक प्रायश्चित्त है। कायोत्सर्ग आदि करना व्युत्सर्ग प्रायश्चित्त है। अनशन, अवमौदर्य आदि करना तप प्रायश्चित्त है। दिवस, पक्ष और महीना आदिकी प्रव्रज्याका छेद करना छेदप्रायश्चित्त है। पक्ष, महीना आदिके विभागसे संघसे दूर रखकर त्याग करना परिहार प्रायश्चित्त है। पुनः दीक्षा देना उपस्थापना प्रायश्चित्त है।

२५ विशेषार्थ—यहां प्रायश्चित्तके नौ भेद गिनाये हैं। प्राय शब्दका अर्थ साधुलोक है। उसका जिस कर्ममें चित्त होता है वह प्रायश्चित्त कहलाता है। अथवा प्राय शब्दका अर्थ अपराध है और चित्त शब्दका अर्थ शुद्धि है, इसलिये प्रायश्चित्तका अर्थ अपराधोंका शोधन करना होता है। ये ही वे नौ भेद हैं जिनके द्वारा साधु दोषोंका परिमार्जन करता है। पहला भेद आलोचना है। आलोचना इन दश दोषोंसे

(१) द्विविधो व्युत्स-मु.। (२)-लोचनम्। आकंपिय अणुमाणिय जं दिट्ठं बादरं च सुहुमं च। छण्णं सद्दाउलियं बहुजण अव्वत्त तस्सेवि ॥ इति दश दोषाः। मिथ्या-मु.। (३)-मासादीनां प्रव्र-मु.। (४) परिवर्जनीयं परि-आ.।

विनयविकल्पप्रतिपत्त्यर्थमाह—

ज्ञानदर्शनचारित्रोपचाराः ॥ २३ ॥

'विनय' इत्यधिकारेणऽभिसम्बन्धः क्रियते। ज्ञानविनयो दर्शनविनयश्चारित्रविनय उपचारविनयश्चेति। सबहुमानं मोक्षार्थं ज्ञानग्रहणाभ्यासस्मरणादिर्ज्ञान-

---

त एते पुलाकादय. संयमादिभिरष्टभिरनुयोगैः साध्या व्याख्येयाः । तद्यथा--पुलाकबकुशप्रतिसेवनाकुशीला द्वयोः संयमयो • सामायिकच्छेदोपस्थापनयोर्वर्तन्ते । कषायकुशीला द्वयोः संयमयोः परिहारविशुद्धिसूक्ष्मसाम्परायययोः पूर्वयोश्च । निर्ग्रन्थस्नातका एकस्मिन्नेव यथाख्यातसंयमे सन्ति । ५

श्रुतं--पुलाकबकुशप्रतिसेवनाकुशीला उत्कर्षेणाभिन्नाक्षरदशपूर्वधराः । कषायकुशीला निर्ग्रन्थाश्चतुर्दशपूर्वधरा । जघन्येन पुलाकस्य श्रुतमाचारवस्तु । बकुशकुशीलनिर्ग्रन्थानां श्रुतमष्टौ प्रवचनमातर । स्नातका अपगतश्रुता. केवलिन । १०

प्रतिसेवना--पञ्चानां मूलगुणानां रात्रिभोजनवर्जनस्य च पराभियोगाद् बलादन्यतमं प्रतिसेवमान. पुलाको भवति । बकुशो द्विविध.--उपकरणबकुश शरीरबकुशश्चेति । तत्रोपकरणबकुशो बहुविशेषयुक्तोपकरणाकांक्षी । शरीरसंस्कारसेवी शरीरबकुशः । प्रतिसेवनाकुशीलो मूलगुणानविराधयन्नुत्तरगुणेषु काञ्चिद्विराधनां प्रतिसेवते ।

कारण भेद होनेपर भी नैगम और सग्रह आदि नयोंकी अपेक्षा वे सब निर्ग्रन्थ कहलाते हैं। १५

अब उन पुलाक आदिके सम्बन्धमें पुनरपि ज्ञान प्राप्त करानेके लिए आगेका सूत्र कहते हैं--

संयम, श्रुत, प्रतिसेवना, तीर्थ, लिङ्ग, लेश्या, उपपाद और स्थानके भेदसे इन निर्ग्रन्थोंका व्याख्यान करना चाहिए ॥ ४७ ॥

ये पुलाक आदि सयम आदि आठ अनुयोगोंके द्वारा साध्य हैं अर्थात् व्याख्यान करने योग्य हैं। यथा--पुलाक, बकुश और प्रतिसेवना कुशील सामायिक और छेदोपस्थापना इन दो सयमोमे रहते हैं। २० कषायकुशील पूर्वोक्त दो सयमोके साथ परिहारविशुद्धि और सूक्ष्मसाम्पराय इन संयमोंमे रहते हैं। निर्ग्रन्थ और स्नातक एक मात्र यथाख्यात सयममे रहते हैं।

श्रुत--पुलाक, बकुश और प्रतिसेवनाकुशील उत्कृष्ट रूपसे अभिन्नाक्षर दश पूर्वधर होते हैं। कपायकुशील और निर्ग्रन्थ चौदह पूर्वधर होते हैं। जघन्य रूपसे पुलाकका श्रुत आचार वस्तुप्रमाण होता है। बकुश, कुशील और निर्ग्रंथोका श्रुत आठ प्रवचनमातृका प्रमाण होता है। स्नातक श्रुतज्ञानसे २५ रहित केवली होते हैं।

प्रतिसेवना--दूसरोंके दबाववश जबरदस्तीसे पॉच मूलगुण और रात्रिभोजन वर्जन व्रतमें से किसी एकको प्रतिसेवना करनेवाला पुलाक होता है। बकुश दो प्रकारके होते है, उपकरणबकुश और शरीरबकुश। उनमेसे अनेक प्रकारकी विशेषताओको लिए हुए उपकरणोको चाहनेवाला उपकरणबकुश होता है तथा शरीरका संस्कार करनेवाला शरीरबकुश होता है। प्रतिसेवना कुशील मूलगुणोंकी ३०

कषायकुशीलनिर्ग्रन्थस्नातकानां प्रतिसेवना नास्ति ।

तीर्थमिति सर्वे सर्वेषां तीर्थकराणां तीर्थेषु भवन्ति ।

लिङ्गं द्विविधं—द्रव्यलिङ्गं भावलिङ्गं चेति । भावलिङ्गं प्रतीत्य सर्वे पञ्च निर्ग्रन्था लिङ्गिनो भवन्ति । द्रव्यलिङ्गं प्रतीत्य भाज्याः ।

५ लेश्याः—पुलाकस्योत्तरास्तिस्र. । बकुशप्रतिसेवनाकुशीलयोः षडपि[1] । कषायकुशीलस्य चतस्र उत्तराः । सूक्ष्मसाम्परायस्य निर्ग्रन्थस्नातकयोश्च शुक्लैव केवला । अयोगा अलेश्याः ।

उपपादः—पुलाकस्योत्कृष्ट उपपाद उत्कृष्टस्थितिदेवेषु सहस्रारे । बकुशप्रतिसेवनाकुशीलयोर्द्वाविंशतिसागरोपमस्थितिषु आरणाच्युतकल्पयोः । कषायकुशीलनिर्ग्र-
१० न्थयोस्त्रयस्त्रिंशत्सागरोपमस्थितिषु सर्वार्थसिद्धौ । सर्वेषामपि जघन्यः सौधर्मकल्पे द्विसागरोपमस्थितिषु । स्नातकस्य निर्वाणमिति ।

स्थानम्—असंख्येयानि संयमस्थानानि कषायनिमित्तानि भवन्ति । तत्र सर्वजघन्यानि लब्धिस्थानानि पुलाककषायकुशीलयो. । तौ युगपदसंख्येयानि स्थानानि गच्छतः । ततः पुलाको व्युच्छिद्यते । कषायकुशीलस्ततोऽसंख्येयानि स्थानानि गच्छत्येकाकी ।

---

१५ विराधना न करता हुआ उत्तरगुणोंकी विराधनाकी प्रतिसेवना करनेवाला होता है । कषायकुशील, निर्ग्रन्थ और स्नातकोंके प्रतिसेवना नहीं होती ।

तीर्थ—ये सब निर्ग्रन्थ सब तीर्थङ्करोंके तीर्थोंमें होते हैं ।

लिङ्ग—लिङ्ग दो प्रकारका है, द्रव्यलिङ्ग और भावलिङ्ग । भावलिङ्गकी अपेक्षा पाँचों ही साधु निर्ग्रन्थ लिङ्गवाले होते हैं । द्रव्यलिङ्ग अर्थात् शरीरका ऊँचाई, रंग व पीछी आदिकी अपेक्षा
२० उनमें भेद है ।

लेश्या—पुलाकके आगेकी तीन लेश्याएँ होती हैं । बकुश और प्रतिसेवना कुशीलके छहों लेश्याएँ होती हैं । कषायकुशीलके अन्तकी चार लेश्याएँ होती हैं । सूक्ष्मसाम्पराय कषायकुशीलके तथा निर्ग्रन्थ और स्नातकके केवल शुक्ल लेश्या होती है और अयोगी लेश्यारहित होते हैं ।

उपपाद—पुलाकका उत्कृष्ट उपपाद सहस्रार कल्पके उत्कृष्ट स्थितिवाले देवोंमें होना है । बकुश
२५ और प्रतिसेवना कुशीलका उत्कृष्ट उपपाद आरण और अच्युत कल्पमें बाईस सागरके स्थितिवाले देवोंमें होता है । कषायकुशील और निर्ग्रन्थका उत्कृष्ट उपपाद सर्वार्थसिद्धिमें तैंतीस सागरकी स्थितिवाले देवोंमें होता है । इन सभीका जघन्य उपपाद सौधर्म कल्पमें दो सागरकी स्थितिवाले देवोंमें होना है । तथा स्नातक मोक्ष जाते हैं ।

स्थान—कषायनिमित्तक असंख्यात संयमस्थान होते हैं । पुलाक और कषायकुशीलके सबसे
३० जघन्य लब्धिस्थान होते हैं । वे दोनों असंख्यात स्थानोंतक एक साथ जाते हैं । इसके बाद पुलाककी

---

(१) षडपि । कृष्णलेश्यादित्रितयं तयोः कथमिति चेदुच्यते—तयोरुपकरणासक्तिसंभवादार्तध्यानं कदाचित्संभवति, आर्तध्यानेन च कृष्णादिलेश्यात्रितयं सम्भवतीति । कषाय—मु. ।

तत कषायकुशीलप्रतिसेवनाकुशीलबकुशा युगपदसंख्येयानि स्थानानि गच्छन्ति। ततो बकुशो व्युच्छिद्यते। ततोऽप्यसंख्येयानि स्थानानि गत्वा प्रतिसेवनाकुशीलो व्युच्छिद्यते। ततोऽप्यसंख्येयानि स्थानानि गत्वा कषायकुशीलो व्युच्छिद्यत। अत ऊर्ध्वमकषायस्थानानि निर्ग्रन्थ. प्रतिपद्यते। सोऽप्यसंख्येयानि स्थानानि गत्वा व्युच्छिद्यते। अत ऊर्ध्वमेकं स्थानं गत्वा स्नातको निर्वाणं प्राप्नोती[1]त्येतेषां सयमलब्धिरनन्तगुणा भवति। ५

इति तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसञ्ज्ञिकायां नवमोऽध्याय. समाप्तः।

व्युच्छित्ति हो जाती है। आगे कषायकुशील असंख्यात स्थानोतक अकेला जाता है। इससे आगे कषायकुशील, प्रतिसेवना कुशील और बकुश असख्यात स्थानोंतक एक साथ जाते है। यहाँ बकुशकी व्युच्छित्ति हो जाती है। इससे भी असख्यात स्थान आगे जाकर प्रतिसेवना कुशीलकी व्युच्छित्ति हो जाती है। पुन. इससे भी असंख्यात स्थान आगे जाकर कषाय कुशीलकी व्युच्छित्ति हो जाती है। इससे आगे अकषाय स्थान है जिन्हे निर्ग्रन्थ प्राप्त होता है। उसकी भी असंख्यातस्थान आगे जाकर व्युच्छित्ति हो जाती है। इससे आगे एक स्थान जाकर स्नातक निर्वाणको प्राप्त होता है। इनकी सयमलब्धि अनन्तगुणी होती है। १०

इस प्रकार सर्वार्थसिद्धिनामक तत्त्वार्थवृत्तिमे नौवाँ अध्याय समाप्त हुआ।

---

(१) प्राप्नोति तेषा मु.।

अथ दशमोऽध्यायः

आह, अन्ते निर्दिष्टस्य मोक्षस्येदानीं स्वरूपाभिधानं प्राप्तकालमिति ? सत्यमेवम्। मोक्षप्राप्तिः केवलज्ञानावाप्तिपूर्विकेति केवलज्ञानोत्पत्तिकारणमुच्यते—

मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम् ॥ १ ॥

५ इह वृत्तिकरणं न्याय्यम्। कुतः ? लघुत्वात्। कथम् ? एकस्य 'क्षय'शब्दस्याकरणाद् विभक्त्यन्तरनिर्देशस्य चाभावात् 'च'शब्दस्य चाप्रयोगाल्लघु सूत्रं भवति 'मोहज्ञानदर्शनावरणान्तरायक्षयात्केवलम्' इति ? सत्यमेतत्, क्षयक्रमप्रतिपादनार्थो वाक्यभेदेन निर्देशः क्रियते। प्रागेव मोहं क्षयमुपनीयान्तर्मुहूर्तं क्षीणकषायव्यपदेशमवाप्य ततो युगपज्ज्ञानदर्शनावरणान्तरायाणां क्षयं कृत्वा केवलमवाप्नोति इति। तत्क्षयो हेतुः केवलोत्पत्तेरिति हेतुलक्षणो विभक्तिनिर्देशः कृतः। कथं प्रागेव मोहः क्षयमुपनीयते इति चेदुच्यते—भव्यः

१०

दशवाँ अध्याय

कहते हैं कि अन्तमें कहे गये मोक्षके स्वरूपके कथनका अब समय आ गया है। यह कहना सही है तथापि केवलज्ञानकी उत्पत्ति होनेपर ही मोक्षकी प्राप्ति होती है इसलिए पहले केवलज्ञानकी उत्पत्तिके कारणोंका निर्देश करनेके लिए आगेका सूत्र कहते हैं—

मोहका क्षय होनेसे तथा ज्ञानावरण, दर्शनावरण और अन्तराय कर्मका
१५ **क्षय होनेसे केवलज्ञान प्रकट होता है ॥ १ ॥**

इस सूत्रमें समास करना उचित है क्योंकि इससे सूत्र लघु हो जाता है।

शंका—कैसे ?

प्रतिशंका—क्योंकि ऐसा करनेसे एक क्षयशब्द नहीं देना पड़ता है और दूसरी विभक्तिके निर्देशका अभाव हो जानेसे 'च' शब्दका प्रयोग नहीं करना पड़ता है इसलिए सूत्र लघु हो जाता है।
२० यथा—'मोहज्ञानदर्शनावरणान्तरायक्षयात्केवलम्'।

समाधान—यह कहना सही है तथापि क्षयके क्रमका कथन करनेके लिए वाक्योंका भेद करके निर्देश किया है। पहिले ही मोहका क्षय करके और अन्तर्मुहूर्त कालतक क्षीणकषाय संज्ञाको प्राप्त होकर अनन्तर ज्ञानावरण, दर्शनावरण और अन्तराय कर्मका एक साथ क्षय करके केवलज्ञानको प्राप्त होता है। इन कर्मोंका क्षय केवलज्ञानकी उत्पत्तिका हेतु है ऐसा जानकर 'हेतुरूप' विभक्तिका
२५ निर्देश किया है।

शंका—पहिले ही मोहके क्षयको कैसे प्राप्त होता है ?

(१) –ज्ञानाप्ति–आ.। (२) कथम् ? क्षय–मु.। (३) तत्क्षयहेतुः केवलोत्पत्तिरिति मु., ता.।

सम्यग्दृष्टि परिणामविशुद्धया वर्धमानोऽसंयतसम्यग्दृष्टिसंयतासंयतप्रमत्ताप्रमत्तगुणस्थानेषु कस्मिंश्चिन्मोहस्य सप्त प्रकृतीः क्षयमुपनीय क्षायिकसम्यग्दृष्टिर्भूत्वा क्षपकश्रेण्यारोहणाभिमुखोऽध प्रवृत्तकरणमप्रमत्तस्थाने प्रतिपद्यापूर्वकरणप्रयोगेणापूर्वकरणक्षपकगुणस्थानव्यपदेशमनुभूय तत्राभिनवशुभाभिसन्धितनूकृतपापप्रकृतिस्थित्यनुभागो विवर्धितशुभकर्मानुभवोऽनिवृत्तिकरणप्राप्त्यानिवृत्तिबादरसाम्परायक्षपकगुणस्थानमधिरुह्य तत्र ५ कषायाष्टकं नष्टं कृत्वा नपुंसकवेदनाशं समापाद्य स्त्रीवेदमुन्मूल्य नोकषायषट्कं पुंवेदे प्रक्षिप्य क्षपयित्वा पुंवेदं क्रोधसंज्वलने, क्रोधसञ्ज्वलनं मानसंज्वलने, मानसंज्वलनं मायासंज्वलने, मायासंज्वलनं[1] च लोभसंज्वलने क्रमेण बादरकृष्टिविभागेन विलयमुपनीय लोभमज्वलनं तनूकृत्य सूक्ष्मसाम्परायक्षपकत्वमनुभूय निरवशेषं मोहनीयं निर्मूलकाषं कषित्वा क्षीणकषायतामधिरुह्यावतारितमोहनीयभार उपान्त्यप्रथमे समये निद्रा- १० प्रचले प्रलयमुपनीय पञ्चानां ज्ञानावरणानां चतुर्णां दर्शनावरणाना पञ्चानामन्तरायाणां[2] चान्तमन्ते समुपनीय[3] तदनन्तरं ज्ञानदर्शनस्वभावं केवलपर्यायमप्रतर्क्यविभूतिविशेषमवाप्नोति ।

आह कस्माद्धेतोर्मोक्षः किंलक्षणश्चेत्यत्रोच्यते—

समाधान—सम्यग्दृष्टि भव्य परिणामोंकी विशुद्धिसे वृद्धिको प्राप्त होता हुआ असंयत सम्यग्दृष्टि, १५ संयतासंयत, प्रमत्तसंयत और अप्रमत्तसंयत इन चार गुणस्थानोंमेसे किसी एक गुणस्थानमे मोहनीयकी सात प्रकृतियोंका क्षय करके क्षायिक सम्यग्दृष्टि होकर क्षपकश्रेणिपर आरोहण करनेके लिए सम्मुख होता हुआ अप्रमत्तसंयत गुणस्थानमे अध.प्रवृत्तकरणको प्राप्त होकर अपूर्वकरणके प्रयोग द्वारा अपूर्वकरण क्षपक गुणस्थान संज्ञाका अनुभव करके और वहाँ पर नूतन-परिणामोकी विशुद्धिवश पापप्रकृतियोंकी स्थिति और अनुभागको कृश करके तथा शुभकर्मोके अनुभागकी वृद्धि करके अनिवृत्तिकरणकी २० प्राप्ति द्वारा अनिवृत्तिबादरसाम्पराय क्षपकगुणस्थान पर आरोहण करके तथा वहाँ आठ कषायोंका नाश करके तथा नपुँसकवेद और स्त्रीवेदका क्रमसे नाश करके, छह नोकषायका पुरुषवेदमे संक्रमण द्वारा नाश करके तथा पुरुषवेदका क्रोध संज्वलनमे, क्रोध संज्वलनका मानसंज्वलनमे, मानसंज्वलनका मायासंज्वलनमें और मायासंज्वलनका लोभसंज्वलनमें क्रमसे बादरकृष्टिविभागके द्वारा संक्रमण करके तथा लोभसंज्वलनको कृश करके, सूक्ष्मसाम्पराय क्षपकत्वका अनुभव करके, समस्त मोहनीयका २५ निर्मूल नाश करके, क्षीणकषाय गुणस्थानपर आरोहण करके, मोहनीयके भारको उतारकर क्षीणकषाय गुणस्थानके उपान्त्य समयमे निद्रा और प्रचलाका नाश करके तथा अन्तिम समयमे पाँच ज्ञानावरण, चार दर्शनावरण और पाँच अन्तराय कर्मोका अन्त करके तदनन्तर ज्ञानदर्शनस्वभावरूप केवल पर्यायको प्राप्त होता है।

कहते हैं कि किस कारणसे मोक्ष प्राप्त होता है और उसका लक्षण क्या है यह बतलानेके लिए ३० आगेका सूत्र कहते हैं—

(१)-लनं लोभ-मु.। (२)-याणामन्त-मु.। (३) समुपगमय्य तद-मु., ता.।

बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः ॥ २ ॥

मिथ्यादर्शनादिहेत्वभावादभिनवकर्माभावः पूर्वोदितनिर्जराहेतुसन्निधाने चार्जितकर्मनिरासः । ताभ्यां बन्धहेत्वभावनिर्जराभ्यामिति हेतुलक्षणविभक्तिनिर्देशः । ततो भवस्थितिहेतुसमीकृतशेषकर्मावस्थस्य युगपदात्यन्तिकः कृत्स्नकर्मविप्रमोक्षो मोक्षः प्रत्येतव्यः । कर्माभावो द्विविधः—यत्नसाध्योऽयत्नसाध्यश्चेति । तत्र चरमदेहस्य नारकतिर्यग्देवायुषामभावो न यत्नसाध्यः असत्त्वात् । यत्नसाध्य इत ऊर्ध्वमुच्यते—असंयतसम्यग्दृष्ट्यादिषु चतुर्षु गुणस्थानेषु कस्मिंश्चित्सप्तप्रकृतिक्षयः क्रियते । निद्रानिद्राप्रचलाप्रचलास्त्यानगृद्धिनरकगतितिर्यग्गत्येकद्वित्रिचतुरिन्द्रियजातिनरकगतितिर्यग्गतिप्रायोग्यानुपूर्व्यातपोद्योतस्थावरसूक्ष्मसाधारणसञ्ज्ञिकानां षोडशानां कर्मप्रकृतीनामनिवृत्तिबादरसाम्परायस्थाने युगपत्क्षयः क्रियते । ततः परं तत्रैव कषायाष्टकं नष्टं क्रियते । नपुंसकवेद स्त्रीवेदश्च क्रमेण तत्रैव क्षयमुपयाति । नोकषायषट्कं च सहैकेनैव प्रहारेण विनिपातयति । ततः पुंवेदसंज्वलनक्रोधमानमायाः क्रमेण तत्रैवात्यन्तिकं ध्वंसमास्कन्दन्ति । लोभसंज्वलनः सूक्ष्मसाम्परायान्ते यात्यन्तम् । निद्राप्रचले क्षीणकषायवीतरागच्छद्मस्थस्योपान्त्य-

बन्ध-हेतुओंके अभाव और निर्जरासे सब कर्मोंका आत्यन्तिक क्षय होना ही मोक्ष है ॥२॥

मिथ्यादर्शनादिक हेतुओंका अभाव होनेसे नूतन कर्मोंका अभाव होता है और पहिले कही गई निर्जरारूप हेतुके मिलनेपर अर्जित कर्मोंका नाश होता है। इन दोनोंसे 'बन्धहेत्वभावनिर्जराभ्याम्' यह हेतुपरक विभक्तिका निर्देश है। जिसने भवस्थितिके हेतुभूत आयुकर्मके बराबर शेष कर्मोंकी स्थितिको कर लिया है उसके उक्त कारणोंसे एक साथ समस्त कर्मोंका आत्यन्तिक वियोग होना मोक्ष है ऐसा जानना चाहिए।

कर्मका अभाव दो प्रकारका है—यत्नसाध्य और अयत्नसाध्य। इनमेंसे चरम देहवालेके नरकायु, तिर्यञ्चायु और देवायुका अभाव यत्नसाध्य नहीं होता, क्योंकि उसके उनका सत्त्व नहीं उपलब्ध होता। यत्नसाध्य अभाव इससे आगे कहते हैं—असंयतसम्यग्दृष्टि आदि चार गुणस्थानोंमेंसे किसी एक गुणस्थानमें सात प्रकृतियोंका क्षय करता है। पुनः निद्रानिद्रा, प्रचलाप्रचला, स्त्यानगृद्धि, नरकगति, तिर्यञ्चगति, एकेन्द्रियजाति, द्वीन्द्रियजाति, त्रीन्द्रियजाति, चतुरिन्द्रियजाति, नरकगति-प्रायोग्यानुपूर्वी, तिर्यञ्चगतिप्रायोग्यानुपूर्वी, आतप, उद्योत, स्थावर, सूक्ष्म और साधारण नामवाली सोलह कर्मप्रकृतियोंका अनिवृत्तिबादरसाम्पराय गुणस्थानमें एक साथ क्षय करता है। इसके बाद उसी गुणस्थानमें आठ कषायोंका नाश करता है। पुनः वहीं पर नपुंसकवेद और स्त्रीवेदका क्रमसे क्षय करता है। तथा छह नोकषायोंको एक ही प्रहारके द्वारा गिरा देता है। तदनन्तर पुरुषवेद संज्वलनक्रोध, संज्वलनमान और संज्वलनमाया वहां पर क्रमसे अत्यन्त क्षयको प्राप्त होते हैं। तथा लोभ संज्वलन सूक्ष्मसाम्पराय गुणस्थानके अन्तमें विनाशको प्राप्त होता है। निद्रा और प्रचला क्षीणकषाय वीत-

(१)–वस्थितस्य मु., ता.। (२)–दात्यतीकृतक–मु.। (३)–वेदश्च तत्रैव मु.। (४) नोकषायाष्टकं च सहै–मु.।

समये प्रलयमुपव्रजत.। पञ्चानां ज्ञानावरणानां चतुर्णां दर्शनावरणानां पञ्चानामन्तरायाणां च तस्यैवान्त्यसमये प्रक्षयो भवति। अन्यतरवेदनीयदेवगत्यौदारिकवैक्रियिकाहारकतैजसकार्मणशरीरपञ्चबन्धनपञ्चसंघातसंस्थानषट्कौदारिकवैक्रियिकाहारकशरीराङ्गोपाङ्गषट्संहननपञ्चप्रशस्तवर्णपञ्चाप्रशस्तवर्णगन्धद्वयपञ्चप्रशस्तरसपञ्चाप्रशस्तरसस्पर्शाष्टकदेवगतिप्रायोग्यानुपूर्व्यागुरुलघूपघातपरघातोच्छ्वासप्रशस्ताप्रशस्तविहायोगत्यपर्याप्तकप्रत्येकशरीरस्थिरास्थिरशुभाशुभदुर्भगसुस्वरदु स्वरानादेयायश.कीर्तिनिर्माणनामनीचैर्गोत्राख्या द्वासप्ततिप्रकृतयोऽयोगकेवलिन उपान्त्यसमये विनाशमुपयान्ति। अन्यतरवेदनीयमनुष्यायुर्मनुष्यगतिपञ्चेन्द्रियजातिमनुष्यगतिप्रायोग्यानुपूर्व्यत्रसबादरपर्याप्तकसुभगादेययशःकीर्तितीर्थकरनामोच्चैर्गोत्रसंज्ञिकानां त्रयोदशाना प्रकृतीनामयोगकेवलिनश्चरमसमये व्युच्छेदो भवति। १०

रागछद्मस्थ गुणस्थानके उपान्त्य समयमे प्रलयको प्राप्त होते है। पॉच ज्ञानावरण, चार दर्शनावरण और पॉच अन्तराय कर्मोका उसी गुणस्थानके अन्तिम समयमे क्षय होता है। कोई एक वेदनीय, देवगति, औदारिक शरीर, वैक्रियिक शरीर, आहारक शरीर, तेजसशरीर, कार्मण शरीर, पॉच बन्धन, पंच सघात, छह सस्थान, औदारिक शरीर आङ्गोपाङ्ग, वैक्रियिकशरीर आङ्गोपाङ्ग, आहारक शरीर आङ्गोपाङ्ग, छह सहनन, पॉच प्रशस्तवर्ण, पांच अप्रशस्तवर्ण, दो गन्ध, पांच प्रशस्तरस, पाच अप्रशस्तरस, १५ आठ स्पर्श, देवगति प्रायोग्यानुपूर्वी, अगुरुलघु, उपघात, परघात, उच्छ्वास, प्रशस्तविहायोगति, अप्रशस्तविहायोगति, अपर्याप्त, प्रत्येक शरीर, स्थिर, अस्थिर, शुभ, अशुभ, दुर्भग, सुस्वर, दु स्वर, अनादेय, अयशःकीर्ति, निर्माण और नीचगोत्र नामवाली बहत्तर प्रकृतियोंको अयोगकेवली गुणस्थानके उपान्त्य समयमे विनष्ट करता है तथा कोई एक वेदनीय, मनुष्य आयु, मनुष्यगति, पञ्चेन्द्रियजाति, मनुष्यगतिप्रायोग्यानुपूर्वी, त्रस, बादर, पर्याप्त, सुभग, आदेय, यश कीर्ति, तीर्थंकर और उच्चगोत्र नामवाली २० तेरह प्रकृतियोंका अयोगकेवली गुणस्थानके अन्तिम समयमे वियोग होता है।

विशेषार्थ—कुल उत्तर प्रकृतियॉ १४८ है। उनमेसे चरमशरीरी जीवके नरकायु, तिर्यञ्चायु और मनुष्यायुका सत्त्व होता ही नही। आहारकचतुष्क और तीर्थङ्करका सत्त्व किसीके होता है और किसीके नहीं होता। इनके सिवा शेष प्रकृतियोका सत्त्व नियमसे होता है। यह जीव गुणस्थान क्रमसे बन्धहेतुओंका अभाव करता है इसलिए क्रमसे नूतन बन्धका अभाव होता जाता है और सत्तामे स्थित २५ प्राचीन प्रकृतियोका परिणाम-विशेषसे क्षय करता जाता है इसलिए सत्तामे स्थित कर्मोका भी अभाव होता जाता है और इस प्रकार अन्तमे सब कर्मोका वियोग हो जानेसे यह जीव मुक्त होता है। यहां मोक्ष शब्दका प्रयोग कर्म, नोकर्म और भावकर्मके वियोग अर्थमे किया गया है। संसारी जीव बद्ध है अतएव वह परतन्त्र है। उसके बन्धनके टूट जाने पर वह मुक्त होता है अर्थात् अपनी स्वतन्त्रताको प्राप्त करता है। इस प्रकार मोक्ष क्या है इसका निर्देश किया। ३०

आह, किमासां पौद्गलिकीनामेव द्रव्यकर्मप्रकृतीनां निरासान्मोक्षो [illegible] भावकर्मणोऽपीत्यत्रोच्यते—

औपशमिकादिभव्यत्वानां च ॥ ३ ॥

किम् ? 'मोक्षः' इत्यनुवर्तते । भव्यत्वग्रहणमन्यपारिणामिकनिवृत्त्यर्थम् । तेन पारि-
५ णामिकेषु भव्यत्वस्यौपशमिकादीनां च भावानामभावान्मोक्षो भवतीत्यवगम्यते ।

आह, यद्यपवर्गो भावोपरतेः प्रतिज्ञायते[1] ननु औपशमिकादिभावनिवृत्तिवत्सर्वक्षायिकभावनिवृत्तिव्यपदेशो मुक्तस्य प्राप्नोतीति ? स्यादेतदेवं यदि विशेषो नोच्येत । अस्त्यत्र विशेष इत्यपवादविधानार्थमिदमुच्यते—

अन्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः ॥ ४ ॥

१० अन्यत्रशब्दापेक्षया 'का' निर्देशः[2] । केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यो अन्यस्मिन्नयं विधिरिति । यदि चत्वार एवावशिष्यन्ते, अनन्तवीर्यादीनां निवृत्तिः प्राप्नोति ? नैष दोषः, ज्ञानदर्शनाविनाभावित्वादनन्तवीर्यादीनामविशेषः; अनन्तसामर्थ्यहीनस्यानन्तावबोधवृत्त्यभावाज्ज्ञानमयत्वाच्च सुखस्येति । अनाकारत्वान्मुक्तानामभाव इति चेन्न;

कहते हैं कि क्या इन पौद्गलिक द्रव्यकर्म प्रकृतियोंके वियोगसे ही मोक्ष मिलता है या भावकर्मोंके
१५ भी अभावसे मोक्ष मिलता है इस बातको बतलानेके लिए आगेका सूत्र कहते हैं—

तथा औपशमिक आदि भावों और भव्यत्व भावके अभाव होनेसे मोक्ष होता है ॥ ३ ॥

क्या होता है ? मोक्ष होता है । यहाँ पर 'मोक्ष' इस पदकी अनिवृत्ति होती है । अन्य पारिणामिक भावोंकी निवृत्ति करनेके लिए सूत्रमें भव्यत्व पदका ग्रहण किया है । इससे पारिणामिक भावोंमें भव्यत्व-का और औपशमिक आदि भावोंका अभाव होनेसे मोक्ष होता है यह ज्ञात होता है ।

२० कहते हैं, यदि भावोंके अभाव होनेसे मोक्षकी प्रतिज्ञा करते हो तो औपशमिक आदि भावोंको निवृत्तिके समान समस्त क्षायिक भावोंकी निवृत्ति मुक्त जीवके प्राप्त होती है ? यह ऐसा होवे यदि इसके सम्बन्धमें कोई विशेष बात न कही जावे तो । किन्तु इस सम्बन्धमें विशेपता है इसलिए अपवाद-का विधान करनेके लिए यह आगेका सूत्र कहते हैं—

पर केवल सम्यक्त्व, केवलज्ञान, केवलदर्शन और सिद्धत्व भावका अभाव नहीं होता ॥ ४ ॥

२५ यहाँ पर अन्यत्र शब्दकी अपेक्षा पञ्चमी विभक्तिका निर्देश किया है । केवल सम्यक्त्व, केवल-ज्ञान, केवलदर्शन और सिद्धत्व इनके सिवा अन्य भावोंमें यह विधि होती है ।

शंका—सिद्धोंके यदि चार ही भाव शेष रहते हैं तो अनन्तवीर्य आदिकी निवृत्ति प्राप्त होती है ।

समाधान—यह कोई दोष नहीं है क्योंकि ज्ञानदर्शनके अविनाभावी [illegible] भी सिद्धोंमें अवशिष्ट रहते हैं । क्योंकि अनन्त सामर्थ्यसे हीन व्यक्तिके अनन्तज्ञान[illegible] नहीं हो सकती
३० और सुख ज्ञानमय होता है ।

---

(१)—यते नत्वौप—मु. ।—यतेतदौप—ता. । (२) 'का पञ्चमी'—जैनेन्द्र. [illegible] कारके का विभक्तिर्भवति ।'—वृत्तिः । प्रतिषु 'को निर्देशः' इति पाठः । (३)—[illegible] मु., ता. ।

तीतानन्तरशरीराकारत्वात् ।

स्यान्मतं, यदि शरीरानुविधायी जीवः, तदभावात्स्वाभाविकलोकाकाशप्रदेशपरिमाण-त्वात्तावद्विसर्पणं प्राप्नोतीति ? नैष दोषः । कुतः ? कारणाभावात् । नामकर्मसम्बन्धो हि संहरणविसर्पणकारणम् । तदभावात्पुनः संहरणविसर्पणाभावः ।

यदि कारणाभावान्न संहरणं न विसर्पणं तर्हि गमनकारणाभावादूर्ध्वगमनमपि न प्राप्नोति अधस्तिर्यग्गमनाभाववत्, ततो यत्र मुक्तस्तत्रैवावस्थानं प्राप्नोतीति ? अत्रोच्यते—— ५

तदनन्तरमूर्ध्वं गच्छत्या लोकान्तात् ॥ ५ ॥

तस्यानन्तरम् । कस्य ? सर्वकर्मविप्रमोक्षस्य । आङभिविध्यर्थः । ऊर्ध्वं गच्छत्या लोकान्तात् । १०

अनपदिष्टहेतुकमिदमूर्ध्वगमनं कथमध्यवसातुं शक्यमित्यत्रोच्यते——

पूर्वप्रयोगादसङ्गत्वाद् बन्धच्छेदात्तथागतिपरिणामाच्च ॥ ६ ॥

...कार होनेसे मुक्त जीवोका अभाव प्राप्त होता है।

समाधान——नही। क्योंकि उनके अतीत अनन्तर शरीरका आकार उपलब्ध होता है।

शंका——यदि जीव शरीरके आकारका अनुकरण करता है तो शरीरका अभाव होनेसे उसके स्वाभा-विक लोकाकाशके प्रदेशोंके बराबर होनेके कारण जीव तत्प्रमाण प्राप्त होता है। १५

समाधान——यह कोई दोष नही है, क्योंकि जीवके तत्प्रमाण होनेका कोई प्रमाण नही उपलब्ध होता। नामकर्मका सम्बन्ध जीवके संकोच और विस्तारका कारण है किन्तु उसका अभाव हो जानेसे जीवके प्रदेशोंका संकोच और विस्तार नही होता।

यदि कारणका अभाव हो जानेसे जीवके प्रदेशोका सकोच और विस्तार नही होता तो गमनके कारणका अभाव हो जानेसे जिस प्रकार यह जीव तिरछा और नीचेकी ओर गमन नही करता है उसी प्रकार उसका ऊर्ध्वगमन भी नही प्राप्त होता है। इसलिए जिस स्थानपर मुक्त होता है उसी स्थानपर उसका अवस्थान प्राप्त होता है, ऐसी शकाके होनेपर आगेके सूत्र द्वारा उसका समाधान करते है। २०

तदनन्तर मुक्त जीव लोकके अन्त तक ऊपर जाता है ॥ ५ ॥

उसके अनन्तर। २५

शंका——किसके ?

समाधान——सब कर्मोके वियोग होनेके।

सूत्रमें 'आङ्' पद अभिविधि अर्थमे आया है। लोकके अन्त तक ऊपर जाता है।

जीव ऊर्ध्वगमन क्यों करता है इसका कोई हेतु नहीं बतलाया, इसलिए इसका निश्चय कैसे होता है अतः इसी बातका निश्चय करनेके लिए आगेका सूत्र कहते है——

पूर्वप्रयोगसे, संगका अभाव होनेसे, बन्धनके टूटनेसे और वैसा गमन करना स्वभाव होनेसे मुक्त जीव ऊर्ध्वगमन करता है ॥ ६ ॥ ३०

(१) अनीतानन्तशरी–मु.। (२)–कर्मससर्गो हि ता.।

आह, हेत्वर्थः पुष्कलोऽपि दृष्टान्तसमर्थनमन्तरेणाभिप्रेतार्थसाधनाय नालमित्यत्रोच्यते—

आविद्धकुलालचक्रवद्व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्च ॥ ७ ॥

पूर्वसूत्रे[1] विहितानां हेतूनामत्रोक्तानां दृष्टान्तानां च यथासंख्यमभिसंबन्धो भवति। ५ तद्यथा—कुलालप्रयोगापादितहस्तदण्डचक्रसंयोगपूर्वकं भ्रमणम्। उपरतेऽपि तस्मिन्पूर्वप्रयोगादा संस्कारक्षयाद् भ्रमति। एवं भवस्थेनात्मनापवर्गप्राप्तये बहुशो यत्प्रणिधानं तदभावेऽपि तदावेशपूर्वकं मुक्तस्य गमनमवसीयते। किं च, असङ्गत्वात्। यथा मृत्तिकालेपजनितगौरवमलाबुद्रव्यं जलेऽधःपतितं जलक्लेदविश्लिष्टमृत्तिकाबन्धनं लघु सदूर्ध्वमेव गच्छति तथा कर्मभाराक्रान्तिवशीकृत आत्मा तदावेशवशात्संसारे अनियमेन गच्छति। १० तत्सङ्गविमुक्तो[2] तूपर्येवोपयाति। किं च, बन्धच्छेदात्। यथा बीजकोशबन्धच्छेदादेरण्डबीजस्य गतिर्दृष्टा तथा मनुष्यादिभवप्रापकगतिजातिनामादिसकलकर्मबन्धच्छेदान्मुक्तस्य ऊर्ध्वगतिरवसीयते। किं च, तथागतिपरिणामात्। यथा तिर्यक्प्लवनस्वभावसमीरणसम्बन्धनिरुत्सुका प्रदीपशिखा स्वभावादुत्पतति तथा मुक्तात्माऽपि नानागतिविकारकारण-

कहते हैं, पुष्कल भी हेतु दृष्टान्त द्वारा समर्थनके बिना अभिप्रेत अर्थकी सिद्धि करनेमें समर्थ नहीं १५ होते इसलिए आगेका सूत्र कहते हैं—

घुमाये गये कुम्हारके चक्रके समान, लेपसे मुक्त हुई तूमड़ीके समान, एरण्डके बीजके समान और अग्निकी शिखाके समान ॥ ७ ॥

पिछले सूत्रमें कहे गए सूत्रोंका और इस सूत्रमें कहे गए दृष्टान्तोंका क्रमसे सम्बन्ध होता है। यथा—कुम्हारके प्रयोगसे किया गया हाथ, दण्ड और चक्रका संयोगपूर्वक जो भ्रमण होता है उसके उपरत २० हो जानेपर भी पूर्व प्रयोगवश संस्कारका क्षय होने तक चक्र घूमता रहता है। उसी प्रकार संसारमें स्थित आत्माने मोक्षकी प्राप्तिके लिए जो अनेक बार प्रणिधान किया है उसका अभाव होनेपर भी उसके आवेश पूर्वक मुक्त जीवका गमन निश्चित होता है। असंगत्वात्—जिस प्रकार मृत्तिकाके लेपसे तूमड़ीमें जो भारीपन आ जाता है उससे जलके नीचे पड़ी हुई तूमड़ी जलसे मिट्टीके गीले हो जानेके कारण बन्धनके शिथिल होनेसे शीघ्र ही ऊपर ही जाती है उसी प्रकार कर्मभारके आक्रमणसे आधीन २५ हुआ आत्मा उसके आवेशवश संसारमें अनियमसे गमन करता है किन्तु उसके संगसे मुक्त होनेपर ऊपर ही जाता है। बन्धच्छेदात्—जिस प्रकार बीजकोषके बन्धनके टूटनेसे एरण्ड बीजकी गति देखी जाती है उसी प्रकार मनुष्यादि भवको प्राप्त करानेवाले गतिनाम और जातिनाम आदि समस्त कर्मोंके बन्धका छेद होनेसे मुक्त जीवकी ऊर्ध्वगति जानी जाती है। तथागतिपरिणामात्—जिस प्रकार तिर्यग्वहन स्वभाववाले वायुके सम्बन्धसे रहित प्रदीपशिखा स्वभावसे ऊपर की ओर गमन करती है उसी प्रकार

(१) पूर्वसूत्रोदितानां—मु.। (२)—विप्रमुक्तौ तूपर्येवोप—मु.।—विमुक्तं तूपर्येवोप—ता.।—विमुक्तोऽत्र—दि. १, दि. २।

णकर्मनिर्वारणे सत्यूर्ध्वगतिस्वभावा[1]दूर्ध्वमेवारोहति ।

आह, यदि मुक्त ऊर्ध्वगतिस्वभावो लोकान्तादूर्ध्वमपि कस्मान्नोत्पततीत्यत्रोच्यते—

धर्मास्तिकायाभावात् ॥ ८ ॥

गत्युपग्रहकारणभूतो धर्मास्तिकायो नोपर्यस्तीत्यलोके गमनाभाव.। तदभावे च लोकालोकविभागाभाव. प्रसज्यते ।　　५

आह, अमी परिनिर्वृत्ता गतिजात्यादिभेदकारणाभावादतीतभेदव्यवहारा एवेति ? अस्ति कथञ्चिद् भेदोऽपि । कुत.—

क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनान्तरसंख्याल्पबहुत्वतः साध्याः ॥ ९ ॥

क्षेत्रादिभिर्द्वादशभि[2]रनुयोगै. सिद्धा. साध्या विकल्प्या इत्यर्थ, प्रत्युत्पन्नभूतानुग्रहतन्त्रनयद्वयविवक्षावशात् । तद्यथा—क्षेत्रेण तावत्कस्मिन् क्षेत्रे सिध्यन्ति ? प्रत्युत्पन्नग्राहिनयापेक्षया सिद्धिक्षेत्रे स्वप्रदेशे आकाशप्रदेशे वा सिद्धिर्भवति । भूतग्राहिनयापेक्षया जन्म[3] प्रति पञ्चदशसु कर्मभूमिषु, संहरणं प्रति मानुषक्षेत्रे सिद्धि. । कालेन कस्मिन्काले　　१०

मुक्त आत्मा भी नानागति रूप विकारके कारणभूत कर्मका अभाव होनेपर ऊर्ध्वगति स्वभाव होनेसे ऊपरकी ओर ही आरोहण करता है ।　　१५

कहते है कि यदि मुक्तजीव ऊर्ध्व गति स्वभाववाला है तो लोकान्तसे ऊपर भी किस कारणसे नही गमन करता है, इसलिए आगेका सूत्र कहते है—

धर्मास्तिकायका अभाव होनेसे मुक्त जीव लोकान्तसे और ऊपर नहीं जाता ॥ ८ ॥

गतिरूप उपकारका कारणभूत धर्मास्तिकाय लोकान्तके ऊपर नही है इसलिए अलोकमे गमन नही होता। और यदि अलोकमें गमन माना जाता है तो लोकालोकके विभागका अभाव प्राप्त होता है ।　　२०

कहते है कि निर्वाणको प्राप्त हुए ये जीव गति जाति आदि भेदके कारणोंका अभाव होनेसे भेद व्यवहारसे रहित ही है । फिर भी इनमें कथञ्चित् भेद भी है क्योकि—

क्षेत्र, काल, गति, लिङ्ग, तीर्थ, चरित्र, प्रत्येकबोधित, बुद्धबोधित, ज्ञान, अवगाहना, अन्तर, संख्या और अल्पबहुत्व इन द्वारा सिद्ध जीव विभाग करने योग्य हैं ॥९॥

क्षेत्रादिक तेरह अनुयोगोंके द्वारा सिद्ध जीव साध्य है अर्थात् विभाग करने योग्य है और यह विभाग वर्तमान और भूतका अनुग्रह करनेवाले दो नयोकी विवक्षासे किया गया है । यथा–क्षेत्रकी अपेक्षा किस क्षेत्रमें सिद्ध होते है ? वर्तमानको ग्रहण करनेवाले नयकी अपेक्षा सिद्धि क्षेत्रमे, अपने प्रदेशमे या आकाशप्रदेशमें सिद्धि होती है । अतीतको ग्रहण करनेवाले नयकी अपेक्षा जन्मकी अपेक्षा पन्द्रह कर्मभूमियोमे और अपहरणकी अपेक्षा मानुष क्षेत्रमे सिद्धि होती है ।　　२५

(१)–भावत्वादू–मु.। (२)-दिभि· त्रयोदश–ता., ना.। (३) जन्मप्रभृति पञ्चदशकर्म–मु.।

सिद्धि: ? प्रत्युत्पन्ननयापेक्षया एकसमये सिद्ध्यन् सिद्धो भवति । भूतप्रज्ञापननयापेक्षया
जन्मतोऽविशेषेणोत्सर्पिण्यवसर्पिण्योर्जातः सिध्यति । विशेषेणावसर्पिण्यां सुषमदुःषमाया
अन्त्ये भागे दुःषमसुषमायां च जातः सिध्यति । न तु दुःषमायां जातो दुःषमायां सिध्यति ।
अन्यदा नैव सिध्यति । संहरणतः सर्वस्मिन्काले उत्सर्पिण्यामवसर्पिण्यां च सिध्यति ।
५ गत्या कस्यां गतौ सिद्धिः ? सिद्धिगतौ मनुष्यगतौ वा । लिङ्गेन केन सिद्धिः ?
अवेदत्वेन त्रिभ्यो वा वेदेभ्यः सिद्धिर्भावतो न द्रव्यतः? द्रव्यतः पुल्लिङ्गेनैव । अथवा निर्ग्रन्थ-
लिङ्गेन। संग्रन्थलिङ्गेन वा सिद्धिर्भूतपूर्वनयापेक्षया। तीर्थेन[1], तीर्थसिद्धि द्वेधा, तीर्थकरेतर-
विकल्पात् । इतरे द्विविधाः सति तीर्थकरे सिद्धा असति चेति । चारित्रेण केन सिध्यति ?
अव्यपदेशेनैकचतुःपञ्चविकल्पचारित्रेण वा सिद्धिः । स्वशक्तिपरोपदेशनिमित्तज्ञानभेदात्
१० प्रत्येकबुद्धबोधितविकल्पः । ज्ञानेन केन ? एकेन द्वित्रिचतुर्भिश्च ज्ञानविशेषैः सिद्धिः ।
आत्मप्रदेशव्यापित्वमवगाहनम् । तद् द्विविधम्, उत्कृष्टजघन्यभेदात् । तत्रोत्कृष्टं पञ्च-

काल—कालकी अपेक्षा किस कालमें सिद्धि होती है ? वर्तमानग्राही नयकी अपेक्षा एक समयमें
सिद्ध होता हुआ सिद्ध होता है । अतीतग्राही नयकी अपेक्षा जन्मकी अपेक्षा सामान्यरूपसे उत्सर्पिणी
और अवसर्पिणीमें उत्पन्न हुआ सिद्ध होता है । विशेष रूपसे अवसर्पिणी कालमें सुषमा दुःषमाके अन्त
१५ भागमें और दुःषमा-सुषमामें उत्पन्न हुआ सिद्ध होता है । दुःषमामें उत्पन्न हुआ दुःषमामें सिद्ध नहीं
होता । इस कालको छोड़कर अन्यकालमें सिद्ध नहीं होता है । संहरणकी अपेक्षा उत्सर्पिणी और
अवसर्पिणीके सब समयोंमें सिद्ध होता है ।

गति—गतिकी अपेक्षा किस गतिमें सिद्धि होती है ? सिद्धगतिमें या मनुष्यगतिमें सिद्धि होती है ।

लिङ्ग—किस लिङ्गसे सिद्धि होती है ? अवेद भावसे या तीनों वेदोंसे सिद्धि होती है । यह कथन
२० भावकी अपेक्षा है द्रव्यकी अपेक्षा नहीं । द्रव्यकी अपेक्षा पुलिङ्गसे ही सिद्धि होती है अथवा
निर्ग्रन्थलिङ्गसे सिद्धि होती है । भूतपूर्वनयकी अपेक्षा सग्रन्थ लिङ्गसे सिद्धि होती है ।

तीर्थ—तीर्थसिद्धि दो प्रकारकी है—तीर्थङ्करसिद्ध और इतरसिद्ध । इतर दो प्रकारके हैं, कितने
ही जीव तीर्थङ्करके रहते हुए सिद्ध होते हैं और कितने ही जीव तीर्थङ्करके अभावमें सिद्ध होते हैं ।

चारित्र—किस चारित्रसे सिद्धि होती है ? नामरहित चारित्रसे सिद्धि होती है या एक, चार
२५ और पाँच प्रकारके चारित्रसे सिद्धि होती है ।

प्रत्येकबुद्ध-बोधितबुद्ध—अपनी शक्ति रूप निमित्तसे होनेवाले ज्ञानके भेदसे प्रत्येकबुद्ध होते हैं
और परोपदेश रूप निमित्तसे होनेवाले ज्ञानके भेदसे बोधितबुद्ध होते हैं, इस प्रकार ये दो प्रकारके हैं ।

ज्ञान—किस ज्ञानसे सिद्धि होती है । एक, दो, तीन और चार प्रकारके ज्ञानविशेषोंसे सिद्धि
होती है ।

३० अवगाहना—आत्मप्रदेशमें व्याप्त करके रहना इसका नाम अवगाहना है । वह दो प्रकारकी है—

(१) तीर्थेन केन तीर्थेन सिद्धिः मु. ।

धनुःशतानि पञ्चविंशत्युत्तराणि । जघन्यमर्धचतुर्थारत्नयो देशोनाः । मध्ये विकल्पाः । एकस्मिन्नवगाहे सिध्यति । किमन्तरम् ? सिध्यतां सिद्धानामनन्तरं[1] जघन्येन द्वौ समयौ उत्कर्षेणाष्टौ । अन्तरं जघन्येनैकः समय उत्कर्षेण षण्मासा. । संख्या, जघन्येन एकसमये एकः सिध्यति । उत्कर्षेणाष्टोत्तरशतसंख्याः । क्षेत्रादिभेदभिन्नानां परस्परतः संख्या- विशेषोऽल्पबहुत्वम् । तद्यथा—प्रत्युत्पन्नन्यापेक्षया सिद्धिक्षेत्रे सिध्यन्तीति नास्त्यल्प- बहुत्वम् । भूतपूर्वनयापेक्षया तु चिन्त्यते, क्षेत्रसिद्धा द्विविधा—जन्मतः संहरणतश्च । तत्राल्पे संहरणसिद्धाः । जन्मसिद्धाः संख्येयगुणाः । क्षेत्राणां विभागः कर्मभूमिरकर्मभूमिः समुद्रो द्वीप ऊर्ध्वमधस्तिर्यगिति । तत्र स्तोका ऊर्ध्वलोकसिद्धाः । अधोलोकसिद्धाः संख्येय- गुणाः । तिर्यग्लोकसिद्धाः संख्येयगुणाः । सर्वतः स्तोकाः समुद्रसिद्धाः । द्वीपसिद्धाः संख्येय- गुणाः । एवं तावदविशेषेण । सर्वतः स्तोका लवणोदसिद्धा. । कालोदसिद्धाः संख्येयगुणाः । जम्बूद्वीपसिद्धा संख्येयगुणाः । धातकीखण्डसिद्धा. संख्येयगुणाः । पुष्करद्वीपार्धसिद्धाः[2] संख्येयगुणाः इति । एवं कालादिविभागेऽपि यथागममल्पबहुत्वं वेदितव्यम् ॥ १० ॥

जघन्य और उत्कृष्ट । उत्कृष्ट अवगाहना पाँच सौ पच्चीस धनुष है और जघन्य अवगाहना कुछ कम साढ़े तीन अरत्नि है । बीचके भेद अनेक हैं । किसी एक अवगाहनामें सिद्धि होती है ।

अन्तर—क्या अन्तर है ? सिद्धिको प्राप्त होनेवाले सिद्धोंका जघन्य अनन्तर दो समय है और उत्कृष्ट अनन्तर आठ समय है । जघन्य अन्तर एक समय है और उत्कृष्ट अन्तर छह महीना है ।

संख्या—जघन्य रूपसे एक समयमे एक जीव सिद्ध होता है और उत्कृष्ट रूपसे एक समयमें एक सौ आठ जीव सिद्ध होते हैं ।

अल्पबहुत्व—क्षेत्रादि भेदोंकी अपेक्षा भेदको प्राप्त हुए जीवोंकी परस्पर संख्याका विशेष प्राप्त करना अल्पबहुत्व है । यथा—वर्तमान नयकी अपेक्षा सिद्धिक्षेत्रमें सिद्ध होनेवाले जीवोंका अल्पबहुत्व नहीं है । भूतपूर्व नयकी अपेक्षा विचार करते हैं—क्षेत्रसिद्ध जीव दो प्रकारके हैं—जन्मसिद्ध और संहरणसिद्ध । इनमेंसे संहरणसिद्ध जीव सबसे अल्प हैं । इनसे जन्मसिद्ध जीव संख्यातगुणे हैं । क्षेत्रोंका विभाग इस प्रकार है—कर्मभूमि, अकर्मभूमि, समुद्र, द्वीप, ऊर्ध्वलोक, अधोलोक और तिर्यग्लोक । इनमेंसे ऊर्ध्वलोकसिद्ध सबसे स्तोक हैं । इनसे अधोलोक सिद्ध संख्यातगुणे है, इनसे तिर्यग्लोकसिद्ध संख्यातगुणे हैं ।

समुद्रसिद्ध सबसे स्तोक है । इनसे द्वीपसिद्ध संख्यातगुणे हैं । यह सामान्य रूपसे कहा है । विशेष रूपसे विचार करनेपर लवण समुद्रसिद्ध सबसे स्तोक हैं । इनसे कालोदसिद्ध संख्यातगुणे हैं । इनसे जम्बूद्वीपसिद्ध संख्यातगुणे हैं । इनसे धातकीखण्डसिद्ध संख्यातगुणे है । इनसे पुष्करार्द्धद्वीपसिद्ध संख्यातगुणे हैं । इसी प्रकार कालादिका विभाग करनेपर भी आगमके अनुसार अल्पबहुत्व जान लेना चाहिए ।

---

(१) सिद्धानामन्तरं मु. । (२)–द्वीपसिद्धा. मु. ।

स्वर्गापवर्गसुखमाप्तुमनोभिरार्यै

जैनेन्द्रशासनवरामृतसारभूता ।

सर्वार्थसिद्धिरिति सद्भिरुपात्तनामा

तत्त्वार्थवृत्तिरनिशं मनसा प्रधार्या ॥ १ ॥

तत्त्वार्थवृत्तिमुदितां विदितार्थतत्त्वाः

शृण्वन्ति ये परिपठन्ति च धर्मभक्त्या ।

हस्ते कृतं परमसिद्धिसुखामृतं तैः–

र्मर्त्यामरेश्वरसुखेषु किमस्ति वाच्यम् ॥ २ ॥

येनेदमप्रतिहतं सकलार्थतत्त्व–

मुद्द्योतितं विमलकेवललोचनेन ।

भक्त्या तमद्भुतगुणं प्रणमामि वीर–

मारान्नरामरगणार्चितपादपीठम् ॥ ३ ॥

इति तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसंज्ञिकायां दशमोऽध्यायः समाप्तः ।

शुभं भवतु सर्वेषाम् ॥

स्वर्ग और अपवर्गके सुखको चाहनेवाले आर्य पुरुषोंने इस तत्त्वार्थवृत्तिका सर्वार्थसिद्धि यह नाम रखा है। यह जिनेन्द्रदेवके शासनरूपी अमृतका सार है, अतः मनःपूर्वक इसे निरन्तर धारण करना चाहिए ॥१॥ सब तत्त्वोंके जानकार जो इस तत्त्वार्थवृत्तिको धर्मभक्तिसे सुनते हैं और पढ़ते हैं मानो उन्होंने परम सिद्धिसुखामृतको अपने हाथमें ही कर लिया है, फिर चक्रवर्ती और देवेन्द्रके सुखके विषयमें तो कहना ही क्या है ॥ २ ॥ जिन्होंने अपने विमल केवल-ज्ञानरूपी नेत्रके द्वारा इस निर्विवाद सकल तत्त्वार्थका प्रकाश किया है, मनुष्यों और देवोंके द्वारा पूजित अद्भुतगुणवाले उन वीर भगवानको भक्तिपूर्वक प्रणाम करता हूँ ॥३॥

इस प्रकार सर्वार्थसिद्धि नामक तत्त्वार्थवृत्तिमें दसवाँ अध्याय समाप्त हुआ ।

परिशिष्ट १

प्रथम अध्याय

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः।	५
तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्।	८
तन्निसर्गादधिगमाद्वा।	१२
जीवाजीवास्रव[1]बन्धसंवरनिर्जरामोक्षास्तत्त्वम्।	१४
नामस्थापनाद्रव्यभावतस्तन्न्यासः।	१७
प्रमाणनयैरधिगमः।	२०
निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः।	२२
सत्संख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च।	२६
मतिश्रुतावधिमनःपर्यय[2]केवलानि ज्ञानम्	९३
तत्प्रमाणे।	९६
[3]आद्ये परोक्षम्।	१०१
प्रत्यक्षमन्यत्।	१०२
मतिः स्मृतिः संज्ञा चिन्ताऽभिनिबोध इत्यनर्थान्तरम्।	१०६
तदिन्द्रियानिन्द्रियनिमित्तम्।	१०८
अवग्रहेहावाय[4]धारणाः।	१११
बहुबहुविधक्षिप्राऽनिः[5]सृताऽनुक्तध्रुवाणां सेतराणाम्।	११२
अर्थस्य।	११५
व्यञ्जनस्यावग्रहः।	११६
न चक्षुरनिन्द्रियाभ्याम्।	११८
श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम्।	१२०
[6]भवप्रत्ययोऽवधिर्देवनारकाणाम्।	१२५
[7]क्षयोपशमनिमित्तः षड्विकल्पः शेषाणाम्।	१२७
ऋजुविपुलमतीमनःपर्ययः[8]।	१२९
विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः	१३०
विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्यययोः[9]।	१३२
मतिश्रुतयोर्निबन्धो[10] द्रव्येष्वसर्वपर्यायेषु।	१३३

---

१ आश्रव–हारिभ०। २ मनःपर्याय–त० भा०। ३ तत्र आद्ये–हारिभ०।

४ –हेहापाय–त० भा०, हारिभ०, सि०। तत्त्वार्थवार्तिकमे 'अवाय और अपाय' दोनों पाठ हैं।

५ –निश्रिता–त० भा०, क्षिप्रनिःसृतानु० स०, श्रितनिश्रितध्रु० सि वृ० पा०।

६ त० भा० में भवप्रत्ययो इत्यादि सूत्रके स्थान पर द्विविधोऽवधिः ॥ २१ ॥ भवप्रत्ययो नारकदेवानाम् ॥ २२ ॥ ऐसे दो सूत्र हैं। ७ यथोक्तनिमित्तः। त० भा०।

८ मनःपर्यायः। त० भा०। ९ –मनःपर्याययोः। त० भा०। १० सर्वद्रव्ये–त० भा०।

दूसरा अध्याय

---

१ मनःपर्यायस्य त० भा० । २ -श्रुतविभङ्गा विप-र्ययाश्च भा० । ३ -सूत्रशब्दा नयाः । त०भा० । ४ त० भ० में आद्यशब्दौ द्वित्रिभेदौ ॥३५॥ यह सूत्र अधिक है । ५ दानादिलब्धय-त० भा० । ६ त० भा० में 'यथाक्रमम्' इतना पाठ अधिक है । ७ सिद्धत्व-त०भा० । ८ भव्यत्वादीनि-त० भा० । ९ 'स' पाठ नहीं है सि० वृ० पा० । १० 'पृथिव्यम्बुवनस्पतयः स्थावराः' त० भा० । ११ तेजोवायू द्वीन्द्रियादयश्च त्रसाः त० भा० ।

[1]स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि। १७७
स्पर्शरसगन्धवर्णशब्दास्तदर्थाः।[2] १७८
श्रुतमनिन्द्रियस्य। १७९
[3]वनस्पत्यन्तानामेकम्। १८०
कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि। १८०
संज्ञिनः समनस्काः। १८१
विग्रहगतौ कर्मयोगः। १८२
अनुश्रेणि गतिः। १८३
अविग्रहा जीवस्य। १८४
विग्रहवती च संसारिणः प्राक् चतुर्भ्यः। १८५
एकसमयाऽविग्रहा[4]। १८६
एकं द्वौ[5]त्रीन्वाऽनाहारकः। १८६
सम्मूर्च्छनगर्भोपपादा[6] जन्म। १८७
सचित्तशीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः। १८७
जरायुजाण्ड[7]जपोतानां गर्भः। १८९
देवनारकाणामुपपादः[8]। १९०
शेषाणां सम्मूर्च्छनम्। १९०
औदारिकवैक्रियिका[9]हारकतैजसकार्मणानि शरीराणि। १९१
परं परं सूक्ष्मम्। १९१
प्रदेशतोऽसंख्येयगुणं प्राक् तैजसात्। १९२
अनन्तगुणे परे। १९३
अप्रतीघाते[10]। १९३
अनादिसम्बन्धे च। १९४
सर्वस्य। १९४
तदादीनि भाज्यानि युगपदेकस्मिन्ना[11]चतुर्भ्यः। १९५
निरुपभोगमन्त्यम्। १९५
गर्भसम्मूर्च्छनजमाद्यम्। १९६
औपपादिकं वैक्रियिकम्[12]। १९७
लब्धिप्रत्ययं च। १९७
तैजसमपि[13]। १९७
शुभं विशुद्धमव्याघाति चाहारकं[14] प्रमत्तसंयतस्यैव। १९८

१ 'स्पर्शनरसन'-इत्यादि सूत्रके पूर्व 'उपयोगः स्पर्शादिषु' ॥ १९ ॥ यह सूत्र त० भा० मे अधिक है। २शब्दास्तेषामर्थाः। त०भा०। ३ वाय्वन्तानामेकम् त० भा०। ४ एकसमयोऽविग्रहः त० भा०। ५ द्वौ वाऽनाहारकः त० भा०। ६ –गर्भोपपाता त० भा०। ७ जराय्वण्डपोतजानां त०भा०। ८ नारकदेवानामुपपातः त०भा०। ९ –वैक्रियाहारक–। त०भा०। १०अप्रतिघाते। त० भा०। ११ युगपदेकस्या। १२ वैक्रियमौपपातिकम्। त० भा०। १३ त० भा० मे यह सूत्र नही है। १४ चतुर्दशपूर्वधरस्यैव। त० भा० मे इतना पाठ अधिक है।

इति द्वितीयोऽध्यायः ।

तीसरा अध्याय

---

१ त० भा० में यह सूत्र नहीं है । २ 'चरमदेहा' यह भी पाठान्तर है । स०, त० वा० । ३ औपपातिकचरमदेहोत्तमपुरुषाऽसंख्येय- । त० भा० ।
४ त० भा० में पृथुतराः पाठ अधिक है ।
५ त० भा० में तासु नरकाः इतना ही सूत्र है । नरकोंकी संख्याएं तत्त्वार्थ भाष्यमें दी हैं ।
६ त० भा० में नारकाः यह पाठ नहीं है । ७ -लवणादयः त० भा० ।
८ त० भा० में 'तत्र' इतना पाठ अधिक है । ९ वंसधरपर्वताः सि० ।
१० यहांसे लेकर आगे 'द्विर्धातकीखण्डे' इस सूत्रके पूर्वतकके २१ सूत्र तत्त्वार्थभाष्यमान्य सूत्र पाठमें नहीं हैं ।

तद्द्विगुणद्विगुणा ह्रदाः पुष्कराणि च । २१७
तन्निवासिन्यो देव्यः श्रीह्रीधृतिकीर्त्तिबुद्धिलक्ष्म्यः पल्योपमस्थितयः ससामानिकपरिषत्काः । २१८
गङ्गासिन्धुरोहिद्रोहितास्याहरिद्धरिकान्तासीतासीतोदानारीनरकान्तासुवर्णरूप्यकूलारक्तारक्तोदाः
सरितस्तन्मध्यगाः । २१८
द्वयोर्द्वयोः पूर्वाः पूर्वगाः । २१९
शेषास्त्वपरगाः । २१९
चतुर्दशनदीसहस्रपरिवृता गङ्गासिन्ध्वादयो नद्यः । २२०
भरतः षड्विंशतिपञ्चयोजनशतविस्तारः षट्चैकोनविंशतिभागा योजनस्य । २२१
तद्द्विगुणद्विगुणविस्तारा वर्षधरवर्षा विदेहान्ताः । २२१
उत्तरा दक्षिणतुल्याः । २२२
भरतैरावतयोर्वृद्धिह्रासौ षट्समयाभ्यामुत्सर्पिण्यवसर्पिणीभ्याम् । २२२
ताभ्यामपरा भूमयोऽवस्थिताः । २२४
एकद्वित्रिपल्योपमस्थितयो हैमवतकहारिवर्षकदैवकुरवकाः । २२४
तथोत्तराः । २२५
विदेहेषु संख्येयकालाः । २२५
भरतस्य विष्कम्भो जम्बूद्वीपस्य नवतिशतभागः । २२६
द्विर्धातकीखण्डे । २२६
पुष्करार्धे च । २२७
प्राङ् मानुषोत्तरान्मनुष्याः । २२८
आर्या म्लेच्छा[१]श्च । २२९
भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः । २३२
नृस्थिती परावरे[२] त्रिपल्योपमान्तर्मुहूर्ते । २३३
तिर्यग्योनिजानां[३] च । २३४

इति तृतीयोऽध्यायः ।

चौथा अध्याय

देवाश्चतुर्णिकायाः[४] । २३६
आदितस्त्रिषु पीतान्तलेश्याः[५] । २३७
दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः । २३८
इन्द्रसामानिकत्रायस्त्रिंशपारिषदात्म[६]रक्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्बिषिकाश्चैकशः । २३८
त्रायस्त्रिंशलोकपालवर्ज्या व्यन्तरज्योतिष्काः । २३९

---

१ म्लिशश्च । त० भा०, हारिभ० । २ परापरे । त० भा० । ३ तिर्यग्योनीनां च त० भा० ।
४ –श्चतुर्निकायाः त० भा० । ५ त० भा० मे तृतीयः पीतलेश्यः ऐसा सूत्र है ।
६ –पारिषद्यात्म०–त० भा० ।

---

१ त० भा० में इस सूत्र के आगे 'पीतान्तलेश्याः' सूत्र अधिक है। २ त० भा० में द्वयोर्द्वयोः इतना पाठ अधिक है। ३ -गान्धर्व०—त० भा०। ४ सूर्याश्चन्द्रमसो। त० भा०। ५ -प्रकीर्णतारकाश्च। त० भा०। ६ —ब्रह्मलोकलान्तकमहाशुक्रसहस्रारेष्वानत—त० भा०। ७ सर्वार्थसिद्धे च त० भा०। ८ पीतमिश्र-पद्ममिश्र-शुक्ललेश्या द्विद्विचतुश्चतुःशेषेषु इति त० वा०।

९ लोकान्तिकाः त० भा०। १० —व्याबाधमरुतोऽरिष्टाश्च। त०भा०। ११ औपपातिक- त०भा०।

१२ इस एक सूत्र के स्थान पर त० भा० में चार सूत्र हैं। वे इस प्रकार हैं:—स्थितिः ॥ २९ ॥ भवनेषु दक्षिणार्धाधिपतीनां पल्योपममध्यर्धम् ॥ ३० ॥ शेषाणां पादोने ॥ ३१ ॥ असुरेन्द्रयोः सागरोपममधिकं च ॥ ३२ ॥ १३ त० भा० में इस एक सूत्र के स्थान पर 'सौधर्मादिषु यथाक्रमम् ॥ ३३ ॥ सागरोपमे ॥ ३४ ॥ अधिके ॥ ३५ ॥ ऐसे तीन सूत्र हैं।

१४ त० भा० में 'सप्त सानत्कुमारे' ऐसा सूत्र है।

१५ त० भा० में 'विशेषत्रिसप्तदशैकादशपञ्चदशभिरधिकानि च' ऐसा सूत्र है।

इति चतुर्थोऽध्यायः।

पाचवाँ अध्यायः

---

१ सर्वार्थसिद्धे च त० भा०। २ —मधिकं च त० भा०।

३ त० भा० में इस सूत्र के पूर्व दो सूत्र और पाये जाते हैं। वे इस प्रकार हैं:—सागरोपमे. ॥ ४० ॥ अधिके च ॥ ४१ ॥ ४ ज्योतिष्काणामधिकम् त० भा०।

५ इस सूत्र के स्थान पर त० भा० में निम्नलिखित सूत्र हैं:—
ग्रहाणामेकम् ॥ ४६ ॥ नक्षत्राणामर्धम् ॥ ५० ॥ तारकाणां चतुर्भागः ॥ ५१ ॥ जघन्या त्वष्टभागः ॥ ५२ ॥ चतुर्भागः शेषाणाम् ॥ ५४ ॥ ६ त० भा० में यह सूत्र नहीं है।

७ त० भा० में 'द्रव्याणि जीवाश्च' ऐसा दो सूत्रों के स्थान पर एक सूत्र है।

८ त० भा० में 'आकाशदेकद्रव्याणि' सूत्र है।

९ इस सूत्र के स्थान पर त०भा० में दो सूत्र हैं:—असंख्येया. प्रदेशा धर्माधर्मयोः ॥७॥ जीवस्य ॥८॥

इति पञ्चमोऽध्यायः ।

---

१ विसर्गाभ्यां— त० भा० । २ स्थित्युपग्रहो— त० भा० ।
३ वर्तना परिणामः क्रिया त० भा० । ४ संघातभेदेभ्यः त० भा० । ५ चाक्षुषाः ।
६ त० भा० में यह सूत्र नहीं है । ७ बन्धे समाधिकौ पारिणामिकौ त० भा० ।
८ —पर्यायवद् द्रव्यम् त० भा० । ९ कालश्चेत्येके त० भा० ।
१० इस सूत्रसे आगे त० भा० में तीन सूत्र और पाये जाते हैं । वे इस प्रकार हैः अनादिरादिमांश्च ॥४२॥ रूपिष्वादिमान् ॥४३॥ योगोपयोगौ जीवेषु ॥४४॥

छठवाँ अध्याय

१ इसके स्थान पर त० भा० में दो सूत्र है—शुभः पुण्यस्य ॥ ३ ॥ अशुभः पापस्य ॥ ४ ॥

२ अव्रतकषायेन्द्रियक्रियाः। त० भा०।

३ —ज्ञाताज्ञातभाववीर्याधिकरणविशेषेभ्यस्तद्विशेषः। त० भा०।

४ भूतव्रत्यनुकम्पा दानं सरागसंयमादि योगः। त० भा०।

५ कषायोदयात्तीव्रात्मपरिणाम—त० भा०। ६ —परिग्रहत्वं च त० भा०।

७ १७-१८ नं० के सूत्रोंके स्थान पर त० भा०में एक सूत्र है:—अल्पारम्भपरिग्रहत्वं स्वभावमार्दवार्जवं च मानुषस्य। ८ त० भा० मे यह सूत्र नहीं है।

९ —अभीक्ष्णं ज्ञानोपयोग—त० भा०। १० संघसाधुसमाधिवैयावृत्त्य —त० भा०।

११ तीर्थकृत्त्वस्य। त० भा०। १२ —गुणाच्छाद—त०भा०।

इति षष्ठोऽध्यायः ।

सातवाँ अध्याय

---

१ तद्विपर्ययौ त० भा० । २ इससे आगेके भावनावाले पाँचों सूत्र त० भा० में नहीं हैं ।
३ –मुत्र चापाया –त० भा० । ४ –माध्यस्थ्यानि त० भा० । ५ त० भा० में 'च' पद नहीं है ।
६ त० भा० में 'वा' के स्थान में 'च' पाठ है ।
७ –पौषधोप –त० भा० । ८ संलेखनां त० भा० । ९ –रतिचाराः त० भा० ।
१० –बन्धच्छविच्छेदा– त०भा० । ११ –रहस्याभ्याख्यान–त०भा० ।

---

१ –करणेत्वरपरिगृहीता-त०भा०। २ –क्रीडातीव्रकामाभि– त०भा०। ३ –स्मृत्यन्तर्धानानि त०भा०।
४ –भोगाधिकत्वानि त० भा० । ५ –नुपस्थापनानि त० भा० ।
६ —निक्षेपसंस्तारोपक्रमणानादरस्मृत्यनुपस्थापनानि । त० भा० । ७ —संबद्ध– त० भा० ।
८ —निक्षेपपिधान– त० भा० । ९ —निदानकरणानि । त० भा० ।
१० —त० भा० में 'सम्बन्ध' इतना अंश पृथक् सूत्र है ।
११ - त्यनुभाव–त भा० । १२ —नीयायुष्कनाम–त० भा० ।
१३ –त० भा० में 'मत्यादीनाम्' इतना ही सूत्र है । १४ –स्त्यानगृद्धिवेदनीयानि च त० भा० ।
१५ –दर्शनचारित्रमोहनीयकषायाकषायवेदनीयाख्यास्त्रिद्विषोडशनवभेदाः सम्यक्त्वमिथ्यात्वतदुभयानि कषायानन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनविकल्पाश्चैकशः क्रोधमानमायालोभा हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदाः ॥ १० ॥ त० भा० ।

अनित्याशरणसंसारैकत्वान्यत्वाशुच्या[1]स्रवसंवरनिर्जरालोकबोधिदुर्लभधर्मस्वाख्यातत्वानुचिन्तनमनुप्रेक्षाः । ४१३
मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः । ४१६
क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याऽऽक्रोशवधयाचनालाभरोगतृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाऽज्ञानादर्शनानि । ४२०
सूक्ष्मसाम्परायछद्मस्थवीतरागयोश्चतुर्दश । ४२८
एकादश जिने । ४२९
बादरसाम्पराये सर्वे । ४३१
ज्ञानावरणे प्रज्ञाऽज्ञाने । ४३२
दर्शनमोहान्तराययोरदर्शनालाभौ । ४३३
चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्काराः । ४३३
वेदनीये शेषाः । ४३४
एकादयो भाज्या युगपदेकस्मिन्नैकान्नविंशतेः[2] । ४३५
सामायिकच्छेदोपस्थापना[3]परिहारविशुद्धिसूक्ष्मसा[4]म्परायथाख्यात[5]मिति चारित्रम् । ४३६
अनशनावमौदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशाः बाह्यं तपः । ४३८
प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरम् । ४३९
नवचतुर्दशपञ्चद्विभेदा[6]यथाक्रमं प्राग्ध्यानात् । ४३९
आलोचनप्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारोपस्थापनाः[7] । ४४०
ज्ञानदर्शनचारित्रोपचाराः । ४४१
आचार्योपाध्यायतपस्विशैक्ष[8]ग्लानगणकुलसंघसाधु[9]मनोज्ञानाम् । ४४२
वाचनापृच्छनानुप्रेक्षाऽऽम्नायधर्मोपदेशाः । ४४३
बाह्याभ्यन्तरोपध्योः । ४४३
[10]उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमान्तमुहूर्तात् । ४४४
आर्तरौद्रध[11]र्म्यशुक्लानि । ४४५
परे मोक्षहेतू । ४४६
आर्तममनोज्ञस्य[12]सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः । ४४६
विपरीतं मनोज्ञस्य[13] । ४४६
वेदनायाश्च । ४४७
निदानं च । ४४७

---

१ —शुचित्वास्रव०—त० भा० । २ —युगपदेकोनविंशतेः त० भा० ।
३ —पस्थाप्यपरिहार— त० भा० । ४ सूक्ष्मसंपराय० —त० भा० ।
५ यथाख्यातानि त० भा० । ६ —द्विभेदं त० भा० । ७ —स्थापनानि त० भा० ।
८ —शक्षक— त० भा० । ९ —साधुसमनोज्ञानाम् त० भा० ।
१० इस सूत्र के स्थान में त० भा० में उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानम् ॥ २७ ॥ और आ अन्तर्मुहूर्तात् ॥ २८ ॥ ये दो सूत्र हैं । ११ —धर्म त० भा० । १२ मनोज्ञानां त०भा० ।
१३ त० भा० में 'विपरीतं मनोज्ञानाम्' ऐसा पाठ है और यह सूत्र 'वेदनायाश्च' इस सूत्र के बाद में है ।

दसवाँ अध्याय

---

१ धर्ममप्रमत्तसंयतस्य त० भा० । २ इस सूत्र के पूर्व त० भा० में 'उपशान्तक्षीणकषाययोश्च' ऐसा एक सूत्र और है । ३ निवृत्तीनि त० भा० ।
४ तत् त्र्येककाययोगा–त० भा० । ५ सवितर्के पूर्वे त० भा० । ६ अविचारं त० भा० ।
७ –लेश्योपपातस्थान–त० भा० ।
८ त० भा० में 'बन्धहेत्वभावनिर्जराभ्याम् ॥२॥ कृत्स्नकर्मक्षयो मोक्षः ॥३॥ इस प्रकार के दो सूत्र हैं ।
९ त० भा० में तीसरे-चौथे सूत्रके स्थान पर 'औपशमिकादिभव्यत्वाभावाच्चान्यत्र केवलसम्यक्त्व-ज्ञानदर्शनसिद्धत्वेभ्यः' ऐसा एक सूत्र है ।
१० 'परिणामाच्च तद्गतिः' त० भा० । ११ त०भा० में सातवें और आठवें नम्बर के दो सूत्र नहीं हैं ।

उद्धृत वाक्य-सूची

[सर्वार्थसिद्धिमें हस्तलिखित प्रतियोंके आधारसे जो गाथा, श्लोक या वाक्य उद्धृत मिलते हैं वे किन ग्रन्थोंके हैं या किन ग्रन्थोंके अंग बन गये हैं यहाँ उन ग्रन्थोंके नाम निर्देशके साथ यह सूची दी जा रही है]।

शब्दानुक्रमणिका

ज्ञानपीठके सांस्कृतिक प्रकाशन

[प्राकृत, संस्कृत ग्रन्थ]

१. **महाबन्ध** [महाधवल सिद्धान्त शास्त्र]—प्रथम भाग, हिन्दी अनुवाद सहित १२)
२. **महाबन्ध**—[महाधवल सिद्धान्तशास्त्र]—द्वितीय भाग ११)
३. **करलक्खण** [सामुद्रिक शास्त्र]—हस्तरेखा विज्ञानका नवीन ग्रन्थ [स्टाक समाप्त] १)
४. **मदनपराजय** [भाषानुवाद तथा ७८ पृष्ठकी विस्तृत प्रस्तावना] ८)
५. **कन्नडप्रान्तीय ताडपत्रीय ग्रन्थसूची** १३)
६. **न्यायविनिश्चयविवरण** [प्रथम भाग] १५)
७. **न्यायविनिश्चयविवरण** [द्वितीय भाग] १५)
८. **तत्त्वार्थवृत्ति** [श्रुतसागर सूरिरचित टीका] हिन्दी सार सहित १६)
९. **आदिपुराण** [भाग १] भगवान् ऋषभदेवका पुण्य चरित्र १०)
१०. **आदिपुराण** [भाग २] भगवान् ऋषभदेवका पुण्य चरित्र १०)
११. **नाममाला सभाष्य** [कोश] ३॥)
१२. **केवलज्ञानप्रश्नचूडामणि** [ज्योतिष ग्रन्थ] ४)
१३. **सभाष्यरत्नमंजूषा** [छन्दशास्त्र] २)
१४. **समयसार**—[अंग्रेजी] ८)
१५. **थिरूकुरल**—तामिल भाषाका पञ्चमवेद [तामिल लिपि] ४)
१६. **वसुनन्दि-श्रावकाचार** ५)
१७. **तत्त्वार्थवार्तिक** [राजवार्तिक] भाग १ [हिन्दी सार सहित] १२)
१८. **जातक** [प्रथम भाग] ४)
१९. **जिनसहस्रनाम** ४)
२०. **सर्वार्थसिद्धि** १२)

[हिन्दी ग्रन्थ]

२१. **आधुनिक जैन कवि** [परिचय एवं कविताएँ] ३॥)
२२. **जैनशासन** [जैनधर्मका परिचय तथा विवेचन करनेवाली सुन्दर रचना] ३)
२३. **कुन्दकुन्दाचार्यके तीन रत्न** [अध्यात्मवादका अद्भुत ग्रन्थ] २)
२४. **हिन्दी जैन साहित्यका संक्षिप्त इतिहास** २॥=)

भारतीय ज्ञानपीठ, दुर्गाकुण्ड रोड, बनारस ५